श्री भागवत श्रवण रस के लिये जानना। जैसे राधिकावल्लभ श्रीकृष्ण रसरूप हैं और उनकी क्रीड़ा रसरूप है तैसे श्री भागवत रसरूप है। वक्ता प्रेमयुक्त होय तो श्रवण में रस उत्पन्न होता है ॥४३॥

द्वितीय स्कन्ध में कहा है—भगवान से कही हुई यह भागवत है। समस्त विभूति का संग्रह रूप जानना। तुम इसका विस्तार करो जिससे मनुष्यों का भगवान् में भक्ति होय। अवतारों में अवतारी श्रीकृष्ण के धर्मत्व देखना ही अवतारधर्मत्वेक्षा है। प्रथम स्कन्ध में कहा है और सब अवतार अंश तथा कलादि रूप हैं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अवतारस्य- श्रीभागवते प्रथमे ।
धर्म्मत्वेत्ता- एते चांशकलाः पुंसो कृष्णस्तु भगवान्स्वयं ।
तद्भक्तेषु तथा कृष्णभक्तानां धर्म्मता स्मृता ।
अवतारेषु यत्प्रेम कृष्णप्रेमांगमेव तत् ॥

शुष्केश्वरस्य हेयत्वं-क्षुधा पिपासापेक्षा च भयं शीतं तथोष्णता ।
इत्यादि धर्म्महीनत्वं शुष्कत्वं सद्भिरीरितं ।
भक्तार्थमेव तत्सर्वमित्येवं भक्तसंमतं ॥
तद्धेयत्वं तु भक्तयगं श्रीभागवतमानतः ॥

"यद्यज्जनो भगवते विदधीतमानं तच्चात्मने प्रतिमुखस्य यथा मुखश्री" रित्यादिकं तु अविदुषः अ भक्तस्यतु करुणया वृणीते भक्तस्यतु स्वार्थं वृणीते । नायकाकृत भगवति न किन्तूभयत्र समं ॥

नायिका कृत शृंगार उभयत्र सुखात्मकं ।
तथा श्रीकृष्णविषयाकृतिर्ज्ञेया मनीषिभिः ॥४४॥

शुष्केश्वरोपा- विष्णुचिन्हाङ्किता दृश्या गुरुत्वेनापि विश्रुताः ।
सकानांहेयत्वं- अभेदोपासनारताः उपेक्ष्याः कृष्णवल्लभैः ॥

स्वयम् भगवान् श्रीकृष्ण ही सब के अवतारी यानी धर्मी हैं । इस तरह अन्य अवतारों का भक्त समूह में तथा कृष्ण भक्तों में धर्म्मत्व भाव है । अन्य अवतारों में जो प्रेम है उसको कृष्ण प्रेम का अंग जानना । क्षुधा, पिपासा, अपेक्षा, भय, शीत, तथा उष्णतादि धर्म से रहित शुष्कत्व है । भगवान् के क्षुधादिक धर्म्म का ग्रहण भक्तों के लिये जाने ॥ ४४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शुष्केश्वरोपासकेषु भक्तिचिन्हादिकं च यत् ।
आभासं तु विजानीयान्मुख्यंगं तु न भावकृत् ॥

श्रवणादिविवेकस्तद्रसे पूर्वोक्तसाधनासाध्यभक्तेराविर्भाव अंकारंवत्कुं प्रेमस्वरूपमुच्यते ।

चित्तं मसृणतां कुर्वन्मदीयत्वाधिक्याग्रहात् ।
श्रीकृष्णविषयो भावः प्रेमशब्देन कथ्यते ॥

यद्वा—
अन्तःकरणवृत्ति र्या नित्यत्वेन द्रवात्मिका ।
श्रीकृष्णविषया सा तु प्रेमा विद्वद्भिरीरिता ॥
चित्तं किञ्चिन्मसृणतां नयन्ती साधनादरात् ।
श्रीकृष्णविषया वृत्तिर्भावत्वेन प्रकीर्त्तिता ॥

तदुक्तंरसार्णवसुधाकरे—निर्विकारस्य चित्तस्यभावः स्यादादि विक्रिया ॥ साहित्येदर्पणे निर्विकारात्मके चित्ते भावः प्रथमविक्रिया ॥

यद्यपि अखण्डो नित्यसिद्ध एव प्रेमा तत्साधकाश्च तथापि अंगांगिनोः क्रमेण सम्बन्धस्यैवोत्पत्तिः, सम्बन्धोत्पत्तिरेव सम्बन्धि-

---

विष्णुचिन्हों से युक्त तथा अभेद उपासना रत साक्षात् गुरु का भी परित्याग कर्त्तव्य है। शुष्क ईश्वर उपासकों में जो भाव चिन्ह देखने में आता है उसको आभास जानना, वास्तविक भाव नहीं है। चित्त मसृणता द्रव) कारी मदीयत्व भाव के आधिक्य युक्त श्रीकृष्ण विषय का भाव ही प्रेम है। किम्वा श्रीकृष्ण विषयक नित्या द्रवात्मिका अन्तकरण वृत्ति प्रेम है। साधन गौरव से चित्त को किञ्चित् मसृणता पूर्वक श्रीकृष्ण में जो वृत्ति यह भाव है। रसार्णवसुधाकर नामक ग्रन्थ में कहा है निर्विकार चित्त में

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न्युपचर्य्यते राजासम्बन्धवत् नामादृथु च्चारेण यत्र लक्षणार्थो हि दृश्यते ।

भावं परं विजानीयान्नतु नामोक्तिमात्रतः ॥ इति सामान्य प्रेमभावयो लक्षणं ॥ ४५ ॥

इदानीमवधिभूतयोर्लक्षणमुच्यते ।

स्वान्तयोः सर्वभावेन सेव्यसेवकयोस्तथा ।
क्षीरनीरवदाश्लेषो विषयाधारता तथा ।
अंगानामपि तादृक्तं स प्रेमा विनिगद्यते ।
द्वाविंशति विधः श्लेषो विज्ञेयोऽत्र सुबुद्धिभिः ॥

तथाहि प्रियवर्ग श्रीकृष्णमनसोः सर्वांशेन संश्लेषः क्षीरनीरवत् ॥ १ ॥ प्रियवर्गश्रीकृष्णयोः संश्लेषः ॥ २ ॥ क्षीरनीरालिंगनवत् प्रियवर्गस्य श्रीकृष्णो विषयः ॥३॥ आधारश्च ॥४॥ चन्द्र चन्द्रिका-

---

प्रथम-विक्रिया, भाव है साहित्यदर्पण में भी ऐसी उक्ति है । यदि प्रेम नित्यसिद्ध तथा अखण्ड है तथा प्रेमसाधक भी नित्यसिद्ध और अखण्ड है तथापि अंग-अंगी भाव से सम्बन्धकी उत्पत्ति सम्बन्धिनी में उपचार है जैसे राजा का सम्बन्ध है ॥ ४५ ॥

अब सीमा प्राप्त भाव तथा प्रेमका लक्षण कहेते हैं । सेव्य, सेवक दोनोके चित क्षीरनीर मिश्रणके समान २२ प्रकार आश्लेष (मिश्रण) प्रेम है । विषय तथा आधार भेदसे मिश्रण होता है यथा—प्रियवर्ग तथा श्रीकृष्ण दोनों का मनका मिश्रण, प्रियवर्ग तथा श्रीकृष्णका मिश्रण, प्रियवर्ग का श्रीकृष्ण विषय, तथा आधार, श्रीकृष्ण का प्रियवर्ग विषय तथा आधार, प्रियवर्ग

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यत् श्रीकृष्णस्य प्रियवर्गः विषयः ॥५॥ आधारश्च ॥ ३ ॥ अन्यैक तराभावे आभासः स्यात् । प्रियवर्गस्यान्तरस्य श्रीकृष्णो विषयः॥ ७॥ आधारश्च ॥ ८॥ श्रीकृष्णमनसः प्रियवर्गो विषयः ॥ ९ ॥ आ-धारश्च॥ १० ॥ प्रियवर्गस्य श्रीकृष्णांगं विषयः ॥११॥ आधारश्च ॥ १२ ॥ श्रीकृष्णस्य प्रियवर्गांगं विषयः ॥ १३ ॥ आधारश्च ॥ १४ ॥ प्रियवर्गमनसः श्रीकृष्णांगं विषयः ॥ १५ ॥ आधारश्च ॥ १६ ॥ श्री कृष्णमनसः प्रियवर्गांगं विषयः ॥ १७ ॥ आधारश्च ॥ १८ ॥ प्रियव र्गस्य मनसः श्रीकृष्णस्य चित्तं विषयः ॥ १९ ॥ आधारश्च ॥ २० ॥ श्रीकृष्णस्य चित्तस्य प्रियवर्गचित्तं विषयः ॥ २१ ॥ आधारश्च । २२। यथा चक्षुः श्रीकृष्णो विषयः श्रीकृष्णचक्षुश्च तद्वत् ॥ ४६ ॥

रसार्णवसुधाकरे—"स प्रेमा भेदरहितं युनोर्यद्भावबन्धनं ।"

तथोक्तमेकादेश—कपोतौ स्नेहगुणित हृदयौ गृहधर्म्मिणौ ।

दृष्टिं दृष्ट्यागंमंगेन बुद्धिं बुद्ध्या बबन्धतुः

मनका श्रीकृष्ण विषय तथा आधार, श्रीकृष्ण मनका प्रियवर्ग विषय, तथा आधार, प्रियवर्ग का 'कृष्णांग विषय तथा आधार, श्रीकृष्ण का प्रियवर्ग अंग विषय तथा आधार, प्रियवर्ग मनका श्रीकृष्ण अंग विषय, तथा आधार, श्रीकृष्ण मनका विषय, तथा आधार, मनका श्रीकृष्ण चित्त विषय, तथा आधार। श्रीकृष्ण चित्त का प्रियवर्ग चित्त विषय तथा आधार ॥ ४३ ॥

दोनों का भेदरहित भावबन्धन प्रेम है, रसार्णवसुधाकर में कहा है। एकादशस्कन्ध में वे कबूतर-कबूतरी परस्पर प्रेम बन्धन से बँधे हुए दृष्टि से दृष्टि, अंग से अंग और मन से मन मिलाये

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शय्यासनाटनस्थानवार्त्ता क्रीड़ाशनादिकं ।
मिथुनीभूय विस्रब्धौ चेरतुर्वनराजिषु ॥

अथावधिभूतोभावः । स्वान्तयोरीशदंशेन सेव्यसेवकयोस्तथा ।
एकत्वेनैव यः श्लेषः स भावः परिकीर्त्तितः ॥

उक्तं च तन्त्रे- प्रेम्णस्तु प्रथमावस्था भाव इत्यभिधीयते ।
सात्विकाः स्वल्पमात्राः स्युरत्राश्रुपुलकादयः ॥
भावोत्पत्तौ हि हावः स्योत्ततो हेला प्रवर्त्तते ।
अतः प्रेमप्रवृत्तिस्तु तत्र क्रीड़ात्मिका भवेत् ॥
भ्रूनेत्रादिविकारैस्तु सम्भोगेच्छाप्रवर्त्तकः ।
भाव एवाल्पसंलक्ष्यविकारो हाव इष्यते ॥
हाव एव विलासस्य पूर्णता प्रतिपद्य वै ।
हेला नाम समाख्याता प्रेमपूर्वं गतांगता ॥

हुए रहते थे, और एक साथ ही भ्रमण, बैठना, बातचीत करना, सोना, भोजन करना प्रभृति क्रिया थी। सेव्य सेवक दोनों के चित्तों का किञ्चित् अंश से भेदरहित पूर्वक जो आश्लेष यह भाव है। तन्त्र में कहा है प्रेम की प्रथमावस्था भाव है भाव में सात्विक भाव थोड़ा सा होता है। भाव से हाव तथा हाव से हेला भी होता है इसलिये प्रेम की प्रवृत्ति क्रीड़ामयी है। भावभ्रू तथा नेत्रादिका विकार से सम्भोगेच्छा प्रवृत्ति, तथासात्विक विकारों की ईषत प्रतीति होने से हाव होता है। विलास की पूर्णता प्रकाश होने से हेला होता है। साधन दो प्रकार का है। कृपा तथा श्रवणादिक। किसी का कृष्ण कृपा से तथा किसी का तदीय भक्तों की

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्रसामान्य-। साधनंद्विविधं प्रोक्तं कृपा च श्रवणादिकः ।
भावसाधनं— केषाञ्चित्कृष्णकृपया तदियानामथापि वा ॥
श्रीभागवते— तद्गच्छतं मत्परमौ नलकूबरसादनं ।
संजातो मयि भावो वामीप्सितः परमो भव ॥४७॥
दैत्यपुत्रेऽपि गर्भस्थे नारदस्य प्रसादतः ।
प्रल्हादे बालभावोऽपि भावः कृष्णमयो भवेत ।
स्कान्देच-- अहो धन्योऽसि देवर्षे कृपया तस्य तत्क्षणात् ।
नीचोप्युत्पुलकं लेभे लुब्धको रतिमुच्यते । इति ।
अथश्रवणं-- जन्म कर्म्मगुणाख्यानां श्रुतिः श्रवणमिष्यते ।
अन्यनिष्ठाद्यभावेन श्रवणं भावसाधकम् ।
यथा— श्रुत्वा गुणान्भुवनसुन्दर ते निर्विश्य कर्णविवरैर्हरतेऽगंतापं ।

कृपा से जानना । श्रीभागवत में श्रीकृष्ण नलकुवेर चरित्र में ।-
भो ! नलकुवेर ! तुम दोनों मेरे कृपा के भाजन हो । मुझ में तुम दोनों का भाव उत्पन्न हो गया है ॥ ४७ ॥

दैत्यपुत्र प्रहलाद गर्भ में से ही श्रीनारदजी की कृपा पाकर बाल्यकाल से कृष्णमय भाव को प्राप्त हुआ था । श्रीकृष्ण कृपासे भगवान नारदजी को भी जानना । स्कन्धपुराण में उक्ति है कि अहो ! देवर्षि तुम धन्य हो । नीच लुब्धक भी पुलकायमान भाव को प्राप्त हुआ है । जन्म, कर्म्म, गुणों का सुनना श्रवण है ।

अन्य निष्ठा के अभाव का कारण केवल भाव साधक है ।—
रुक्मिणजी पत्र भेजी । यथा हे भुवन मनोहर आपके गुणों को

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रूपंदृशां दृशिमतामखिलार्थलाभं त्वय्यच्युता
विसति चित्तमपत्रपं मे।

यथावा— तत्र न्वहं कृष्णकथाः प्रगायता मनुग्रहेणा श्रवणं
मनोहराः।

ताः श्रद्धया मेनुसवं विश्रृण्वतः प्रियश्रवस्यंगममा
भवद्रतिरिति.॥४८॥

श्रवणादिना (तु) भावस्य ह्युत्पत्तिभक्तसंगता।

भक्तनिन्दाद्यभावश्चेदन्यनिष्ठाद्यभावतः॥

यन्त्र तन्त्रे तत्तु मर्य्यादासाधनसाध्यो भाव एव न प्रेमा
साष्टर्यादिजनकत्व विरोधात्। तथाहि पञ्चरात्रे।

माहात्म्यज्ञानयुक्तस्तु सुदृढः सर्वतोऽधिकं।

स्नेहो भक्तिरिति प्रोक्तस्तया साष्ट्र्योदि नान्यथा।

हेतुं विना तु यो भावः सहसा यत्र दृश्यते।

दृढैरनुभावैर्गम्य स प्रासादज दृष्यते॥

इदानीं भावज्ञापकाः अनुभावा उच्यन्ते।

अनुभावास्त्रिधा ज्ञेया भावसाधनभेदतः।

सुना वर्णविवर में जाकर शरीर का ताप हरण किया। नेत्रधारियों का अखिलार्थ लाभकारी आपका रूप है। हे अच्युत तुम में चित्त प्रवेश कर रहा है। मेरे को लज्जा नहीं है। ॥४८॥

श्रवणादिकों से भाव का होना भक्त संग से यदि भक्तनिन्दा तथा अन्यनिष्ठादि का अभाव होय जानना। एतद्भिन्न तन्त्र में जो दीखने में आया है सो मर्य्यादा साधन से जो साध्य हाव हो उस

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रवणादि सिद्धो भावः भक्त कृपासिद्धो भावः श्रीकृष्णकृपासिद्धो भावः सभावो द्विविधः माधुर्य्यविषयकः ऐश्वर्य्यविषयकः ऐश्वर्य्यश्रवणादिना ऐश्वर्य्यविषयकः माधुर्य्यश्रवणादिना माधुर्य्यविषयकः ॥४९-

श्रवणादीनि भावस्य स्वरूपेणैव कारणं ।
तान्येव स्वादुपूर्वाणि भावकार्य्यं वदन्ति हि ॥

कस्यचिच्छ्रवणाद्भावः कस्यचित्कीर्त्तनात् कस्यचिद्वैष्णवदर्शनादित्यादि तद्भेदादनुभावभेदोऽपि ज्ञेयः ॥

ते चानुभावाः— श्रवणे कीर्त्तने नृत्ये तस्यैव वसतिस्थले ।
वैष्णवस्य गृहे मालाग्रन्थने तुलसीवने ॥
इत्यादौ सहजाशक्तिर्महोत्सवकृतौ तथा ।
विरक्तिरक्षणिकता मानशून्यसहिष्णुते
आशाबन्धः समुत्कण्ठा प्रार्थना सर्वकर्मसु ॥

को जानना प्रेम नहीं है। पञ्चरात्र में कहा हैं। महिमाज्ञान से दृढ़ता सब से अधिक होती हैं। किन्तु यह भक्ति है उस से साष्ट्यार्दि मुक्त हाती है किन्तु प्रेम नहीं है। बिना कारण से जो भाव दीखने में आता है सो प्रसाद ज जानना। भावज्ञापक अनुभाव तीन प्रकार है। श्रवणादि से सिद्धभाव, भक्तकृपा से सिद्धभाव कृष्ण कृपा से सिद्धभाव। फिर माधुर्य्यविषयक तथा ऐश्वर्य्यविषयक से दो भेद है। माधुर्य्यश्रवण से माधुर्य्यभाव तथा ऐश्वर्य्यश्रवण से ऐश्वर्य्य भाव होता है ॥४९॥

श्रवणादि भाव उत्पत्ति का स्वरूप कारण है श्रवणादि रस स्वादपूर्वक हो कर भावकार्य्य का प्रकाश करते हैं। किसी का

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रवणे यथा मम— यदवधि ममकर्णे कृष्णराधेतिशब्दो
न्यविशदतितृष्णो माधुरीणां धुरीणः ।
तदवधि मम चित्तं लोकवेदातिगं सन्
न गणयति कथश्चित् कृष्णराधे विहाय ॥

कीर्त्तने यथा। प्रयागतः स्ववीर्याणि तीर्थपादः प्रियश्रवाः
श्रीभावगते— आहूतइव ते शीघ्रं दर्शनं याति चेतसि ॥ ५० ॥

श्रवण से, किसी का कीर्त्तन से, तथा किसी का वैष्णवदर्शनादिकों से भाव उदय होता है। श्रवणादिकों का भेद से अनुभाव भेद भी जानना। अनुभाव-श्रवण में आसक्ति, कीर्त्तन में आसक्ति, नृत्य में आसक्ति, वसति स्थान में आसक्ति, वैष्णवगृह में आसक्ति, मालागूंथने में आसक्ति, तुलसीवन में आसक्ति, महोत्सवादिकों में आसक्ति, विरक्ति, अक्षणिकता, मान्यशून्यता, सहिष्णुता; आशाबन्ध, उत्कण्ठा, तथा सर्वकर्मों में प्रार्थनादिक हैं।

श्रवण में।—जब से उत्कंठा पूर्वक मेरे कान में कृष्ण-राधा इस शब्द ने प्रवेश किया तब से मेरा चित्त लोक तथा वेद में अतीत हो कर "कृष्ण तथा राधा" बिना किसी वस्तु को नहीं चाहता है। मेरे पराक्रम को गाने वाले भक्तों के चित्त में शीघ्र दर्शन होता है। श्रीभागवत् में श्रीवैयासकि मुखपद्म विनिर्गत माधुर्य्य धारामयी तथा गोपांगनाओं के विलास समूह से उदारमयी पद्यावली छोड़कर जिह्वा अन्यत्र नहीं जाती है। क्या करूँ ॥ ५० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आचार्य-चरणदास, ग्रंथसंग्रह, वाराणसी

ममैव— वैयासिके मुखविनिःसृतमाधुरीणां
गोपांगनागुणविलासभरैरुदाराम् ।
पद्यावलीं परिविहाय न कुत्रचिन्मे
जिह्वा सदैव परिधावति किं करोमि ॥

नृत्ये यथा । रासोत्सवात्मकरसे वलते शरीरं
स्वान्तं तथैव सकलेन्द्रियवृत्तिरुद्धा ।
संसारतारकगुणे परमार्थभूते
हेयत्वमेव विपुलो कुरुते दृगादिः ॥ ममैव

वसतिस्थले रुचिः॥--यद्यपि सन्ति सहस्रं पुर्यः परमाद्भुताः पुण्याः ।
तदपि मनोमम मथुरा हरति न जाने कुतः हेतोः ॥
भावतारतम्येन रुचितारतम्यं ॥

वैष्णवगृहे । बहुशो नगरवरेऽस्मिन्यद्यपि धनिनां गृहाः सन्ति ।
तदपि मनो मम रमते वैष्णवसदनेऽति जीर्णेऽपि ॥

श्रीरासोत्सव रस में शरीर डूबा हुआ है मन तथा समस्त इन्द्रियों की वृत्ति भी रुक गई। संसारतारक गुण परमार्थ भूत मुक्ति में हेयत्वभाव बढ़ रहा है यदि हजारों परम अद्भुत नगर मौजूद हैं तथापि नहीं जानताहूँ किस कारण मथुरा मनको हरती है। इस नगर में यदि धनिकों के बहुत गृह मौजूद हैं तथापि अति जीर्ण वैष्णव गृह में मन रम रहा है॥ कोई कोई भोजन भूलकर माला गूंथ रहे थे कोई कोई तुलसी की रक्षा माता की तरह कर रहे थे॥ वसन्तादि महोत्सव प्रसिद्ध हैं। अपनी अभिलषित वस्तु जो कि भक्ति की विरोधी हैं उनका त्याग विरक्ति है इतर वस्तु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मालातुलस्यो रुचिः। केचिद्गुम्फन्ति मालां वै विस्मृत्यैव तु भोजनं।
केचित्पुष्णन्ति तुलसीं बालकानिव मातरः ॥

महोत्सवकृतिः।— महोत्सवः वसन्तादिः प्रसिद्धः।

विरक्तिः॥ स्वस्याभिलषितं वस्तु यद्भक्तौ न प्रयुज्यते।
तस्य त्यागो विरक्तिः स्यान्नेतरस्येति मे मतिः॥

अक्षणिकता। अनुरागोपयोगि यः क्षणः सार्थकः स्मृतः।
तत्रस्थो क्षणिको ज्ञेयोऽन्यत्रस्थः क्षाणिको मतः॥
स्वापादनि वर्ह्यस्तु प्रतिवन्धनिरासकं।
स्वापादिघातकश्चेत्स्यात् रागमेव विनाशयेत्॥

उक्तमेकादशे। "मुहूर्त्तं क्षणिको भवेदेति" ॥ ५१ ॥

मानशून्यता— गुरुत्वेऽपि ह्यमानित्वं कथिता मानशून्यता।
तं मोपयातं प्रतियान्तु विप्रा गंगा च देवीधृतचित्तमीशे॥
द्विजोपसृष्टः कुहकं स्तक्षको वा दशत्वलं गायत कृष्णगाथाः।

का त्याग विरक्ति नहीं है यह मेरा मत है॥ अनुराग उपयोगी क्षण सार्थक है। जिस क्षण में अनुराग नहीं है सो अक्षणिकत जानना।॥ ५१ ॥

बड़े होने पर भी अभिमान से शून्य हो मानशून्यता है। भागवत में यथा—परीक्षितजी कहते हैं–हे विप्रगण! मुझको आक्रमणकारी तक्षक को, मत रोकिये। गंगा देवी है। चित्त ईश श्रीकृष्ण में लगा हुआ है। आप लोक कृष्णचरित्र गाइये।

क्रोधादि के कारण उपस्थित होने पर भी चित्त क्षोभ नहीं होना सहिष्णुता है। जैसे:—दत्तक्त्तृक शप्त होकर भी भगवत्प्रिय

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सहिष्णुता ॥ क्रोधादि हेतौ संप्राप्तेऽक्षोभः स्यात्सहिष्णुता ॥

यथा ॥ दक्षेणशप्तो भगवान्नारदो भगवत्प्रियः ।
गायन्हृष्यन्स्त्विदं विश्वं प्रपन्नं परिपालयन् ॥

आशाबन्धः ॥ आशाबन्धस्तु कृष्णस्य प्राप्तिर्निश्चय उच्यते ॥

यथाश्री रुक्मिणी वाक्यं । जर्ह्यम्बुजाक्ष न लभेय भवत्प्रसादं
जह्यामसून्व्रतकृशान् शतजन्मभिः स्यात् ॥

समुत्कण्ठा ॥- इष्टानवाप्ते रुत्कण्ठा कालक्षेपासहिष्णुता ॥

यथा श्रीदशमे ॥ . अप्यायास्यति गोविन्दः स्वजनान्सकृदीक्षितुम् ।
तर्हि द्रक्ष्याम तद्वक्त्रं सुनसं सुस्मितेक्षणम् ॥

सर्वकर्मसुप्रार्थना॥ लौकिकालौकिके पक्षे श्रीकृष्णं प्रार्थयेद्यदा ।
स प्रार्थना तु विज्ञेया भावोद्बोधप्रवर्त्तिका ॥

यथा ॥-दशमे ।- ददुः स्वन्नं द्विजाग्रेभ्यः कृष्णो नो भक्तिर स्त्विति ॥ ५२ ॥

भगवान् नारदजी गान करते हुए हर्षपूर्वक शरणागत विश्व की रक्षा करते हैं। अवश्य भगवत्प्राप्ति होगी यह 'आशाबन्ध' है जैसे रुकमणि देवी का वाक्य है कमलनेत्र! यदि आपकी कृपा नहीं होगी तो मैं शतशत जन्म में भी प्राण को परित्याग करूँगी।

इष्ट की अप्राप्ति में कालक्षेपण नहीं सहना उत्कण्ठा है। यथा दशममें गोविन्द क्या अपने जनों को एक बार भी देखने को आयेंगे। तब हम सब सुन्दर नासा वाले, मन्दहास्यकारी सुन्दर नेत्रयुक्त मुखारविन्द को देखेगें।

प्रार्थना भावोद्बोधिका है। यथा दशमें में कहा है—श्रीकृष्ण

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इदानीं भावाभासो विचार्य्यते ॥

चित्ते द्रवत्वं रोमाञ्चो दृश्यते चेन्मुमुक्षुषु ।
शान्तानुभावो विज्ञेयो रत्याभासो नवै रतिः ॥
एतादृशेषु भक्तश्चेत् कृपयेन्न द्रुतिर्भवेत् ।
भाग्यं विना न वै तादृगनुभावोऽपि जायते ।
रत्याभासेन पुरुषो मोक्षमेवाप्नुयाद्ध्रुवं ॥

उक्तं च साहित्यदर्पणे "शान्तारतु नारायण दैवत्या संसारस्याऽवास्तुतया परमात्मस्वरूपज्ञानवानालम्बनं पुण्याश्रमतीर्थादयउद्दीपनाः अश्रुपुलकादयोऽनुभावा इति" अतो मुमुक्षुषु शान्तरसस्यैवानुभावा न तु रतेरिति । इदानीं प्रेमविवरणं

से हम सब की भक्ति रहे, इसलिये उत्तम ब्राह्मणों को अन्नादि देने लगे ॥ ५२ ॥

अब भावाभास पर विचार करते हैं। मुमुक्षुओं के चित्त में द्रवता तथा रोमाञ्चादिक प्रेमविकार यदि दीखने में आवे तो शान्तरास का अनुभाव जानना। वह रत्याभास है किन्तु रति नहीं है। यदि उन पर किसी भक्त की कृपा हो तो चित्त की द्रवता होती है। किन्तु शान्त का अनुभाव भी विना भाग्य के नहीं होता है। रति का आभास होने पर मनुष्य मोक्षको अवश्य पाता है। साहित्यदर्पण में कहा हैं:शान्त रसके देवता श्रीनारायण हैं। संसार की तुच्छता पूर्वक परमात्मस्वरूप जानने वाला आलम्बन, तथा पुण्याश्रम तीर्थादि उद्दीपन, अश्रुपुलकादि अनुभाव हैं। इसलिये मुमुक्षु में शान्तरस का ही अनुभाव है किन्तु रति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

षड्गुणापूर्णं सर्वज्ञाऽव्यापकत्वादयस्तथा ।
श्रीकृष्णे प्रविशन्त्येते प्रेमादावपि कृत्स्नशः ।
यमादय प्रवृत्तस्तु तस्यैवास्वादको भवेत् ।
अन्यस्य गौणता ज्ञेया गुणेष्वेव परस्परं ॥
स्वरूपे चेत्प्रवृत्ताः स्याद् गुणास्वादोऽनुषगंजः ।
यथा ब्राह्मण जातीये शिष्यस्त्रीणां स्वभावतः ॥५३॥

अस्यमर्थः । श्रीकृष्णे षड्गुणाः पूर्णत्वसर्वज्ञत्वादयश्चवर्त्तन्ते माधुर्य्यसौन्दर्य्यादयश्च स्वरूपमेव । यथा चन्द्रे प्रकाशोऽमृतत्वं च । तथा प्रेम्णाप्येते विषयत्वेन प्रविष्टः ततश्च प्रेमैश्वर्य्यादिकं पुरस्कृत्य श्रीकृष्णे प्रवृत्त स्तत्प्रधानप्रेमस्वादं प्राप्नोति । धर्म्मज्ञानादयः स्वादस्तु तत्संलग्नतया नतु सर्वस्वरूपास्वादः । स्वरूपं पुरस्कृत्य चेत्प्रवृत्त स्तर्हि स्वरूपविषयं प्रेमाणमास्वादयेत् । सर्वे धर्म्मास्तु प्रेम्नि विषय-

---

नहीं हैं । पूर्णता, सर्वज्ञता, व्यापकतादि और षट् गुणादिक धर्म्म श्रीकृष्ण तथा श्रीकृष्ण के प्रम में प्रवेश करते हैं. किन्तु वे सब अनुसंगिसे आस्वादन होता है । जैसे कोई ब्राह्मण में शिष्यत्व आनुषगिक है । किन्तु अपनी स्त्रीके लिये पति स्वरूप है ॥५.॥

इसका भाव यह है श्रीकृष्ण में षट् गुण समूह तथा पूर्णत्व, सर्वज्ञत्व प्रभृति गुण समूह रहते हैं, माधुर्य्य सौन्दर्य्यादिक स्वरूप सम्बन्धी गुण जानना । जैसे चन्द्र में प्रकाश गुण, तथा अमृतमय भाव हैं । स्वरूप आगे करके यदि आस्वादित किया जाता है तो सम्पूर्ण स्वरूप का आस्वादन होता है । ऐश्वर्य्यादिक आगे रखकर आस्वाद करने पर ऐश्वर्य्यादिक का प्रधान आस्वाद होता है । कारण

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्वेन वर्त्तन्त एव । तत्र दृष्टान्तः यथा ब्राह्मणजातीये विप्रत्वं पाठकत्वं पाचकत्वमित्यादिधर्म्मः सौन्दर्य्यादिकं स्वरूपं दातुर्विप्रत्वमेव मुख्यं शिष्यस्य पाठकत्वं भोक्तुः पाचकत्वं स्त्रियाः स्वरूपं । स्वरूपविषयक प्रेमज्ञापकं पञ्चरात्रे ।—

मनोगतिरविच्छिन्ना हरौ प्रेम परिप्लुता ।
अभिसन्धिविनिर्मुक्ता भक्तिर्विष्णुवशंकरी ॥

अथप्रेमाविर्भावकं—भावानुभावातिशयः प्रेमाविर्भावको मतः ।
अनुभावो द्विधाज्ञेयो मर्य्यादारसमार्गतः ॥ ५४ ॥

मर्य्यादारसमार्गाभ्यां भावः द्विविधः भावद्वैविध्यं विषयकृतमेव तदनुभावोऽपि द्विविधस्तज्जनितः प्रेमापि द्विविधः । श्रीकृष्णप्रसादजश्च एवं त्रिविध प्रेमा यद्यपि प्रेम्णि भेदो नास्ति तथापि कारणत्रैविध्यात्त्रैविध्यं परंतु मर्य्यादामार्गेण प्रेमांशप्राप्तिं यथा

प्रेम में समस्त धर्म्म मौजूद हैं । जैसे ब्राह्मण जाति में विप्रत्व, पाठकत्व, पाचकत्वादि धर्म्म तथा सौन्दर्य्यादिक स्वरूप सम्बन्धी धर्म्म है । दाता के लिये विप्रत्वधर्म्म शिष्य को पाठकत्व धर्म्म भोक्ता के लिये पाचकत्व धर्म्म मुख्य है किन्तु स्त्रियों के लिये स्वरूप ही मुख्य जानना । स्वरूप विषयक प्रेम का ज्ञापक पञ्चरात्र है । यथा अभिसन्धियों से रहित हरि प्रेम परिप्लुत अविच्छिन्न मनोगति भक्ति भगवत् वशकारिणी है । भाव में अनुभाव का अतिशयत्व ही प्रेमविर्भावक है ॥ ५४ ॥

मर्य्यादा तथा रसमार्ग से दो प्रकार के भाव हैं । दो प्रकार का भेद विषयकृत् जानना । मर्यादा तथा रस भेद से अनुभाव भी दो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शीतार्त्तस्य किरणप्राप्ति रेव सूर्य्यप्राप्तिः रसमार्गश्रीकृष्णप्रसाद-श्यामेक एक प्रेमा। तत्र मर्य्यादामार्गभावानुभावजनितप्रेमाण-माह।=एकादेश।=कवियोगेश्वरसंवादे।—एवं व्रतः स्वप्रिय-नामकीर्त्या जातानुरागो द्रुतचित्तउच्चैः। हसत्यथो रोदिति रौति गायत्युन्मादवन्नृत्यति लोकवाह्यः॥

रसानुगभावानुभावोत्थ प्रेमा यथा-पाद्मे-

न पतिं कामयेत्किंचित् ब्रह्मचर्य्यस्थिता सदा।
तमेव मूर्त्तिं ध्यायन्ती चन्द्रकान्ति वरानना॥
श्रीकृष्णगाथां गायन्ती रोमाञ्चोद्भेद लक्षणा।

श्रीकृष्णप्रसादो- अस्मिन्मन्वन्तरे स्निग्धा श्रीकृष्णप्रियवार्त्तया॥
त्थनाह दशमे- सूग्रात्तातिरयं मह्यं धाता तदनुमादत्तां।

प्रकार हैं अनुभावजनित प्रेम भी दो प्रकार हैं और श्रकृष्णप्रसाद जात भी है। इस तरह त्रिविध प्रेम है प्रेम में कोई भेद नहीं है तौं भी कारण त्रिविध से तीन प्रकार हैं। किन्तु मर्य्यादा मार्ग में प्रेमांश प्राप्ति होती है। जैसे शीतातुर व्यक्ति को किरण प्राप्ति ही सूर्य्य प्राप्ति है। रसमार्ग तथा श्रीकृष्णप्रसाद द्वारा प्रेम एक प्रकार है। मर्य्यादामार्ग को भावानुभावजनित प्रेम कहते हैं। एकादश में कवियोगेश्वर संवाद में-इस प्रकार शास्त्रबुद्धि से अपनी प्रि नाम समूह कीर्त्तन करने से अनुराग का उत्पन्न तथा चित्त की द्रवता होती है। तब भक्त उच्चस्वर से हँसता है तथा रोदन करता है, फिर चीत्कारादिक करता है, उन्माद युक्त होकर कभी गाता, कभी नाचता है। रसानुगभावानुभावजनित प्रेम यथा। -चन्द्र कान्ति,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति सर्वाः पृथक् कृष्णे भावेन हृदयंदधुः ॥ भावेन प्रेम्णा यत्र श्रीकृष्णप्रसादजस्तत्र सपरिकर एव न त्वनुक्रमतः अतएवतासां अंग संगादिना कृष्णप्रसादः सुष्ठु स्फुट एव ॥ ५५ ॥

तेनाधीतश्रुतिगणा नोपासितमहत्तमाः ।
अव्रता तप्त-मत्संगान्मामुपगताः ।
एतादृशं तु यत्प्रेम दुर्ल्लभं सर्वसाधनैः ।
रसाध्वनैव संप्राप्यं यतः कृष्णवशंकरं ।

यथा पञ्चमे— राजन्पतिर्गुरुरलं भक्तां यदूनां दैवं प्रियः कुलपतिः क्व च किंकरो वः ।
अस्त्वेवमंग ! भजतां भगवान्मुकुन्दो मुक्तिं ददाति कर्हिचित्स्मन भक्तियोगं ॥

नाम्नी वरांगना कोई तरह भी पति कामना दिन करती हुई ब्रह्मचर्य्यव्रत धारण पूर्वक उसी श्रीकृष्णमूर्ति का ध्यान करती हुई तथा श्रीकृष्ण चरित्र गाती हुई रोमञ्चादि सात्विक भाव युक्त उसी बात की हो कर तत्समथी हो गई हैं । अब कृष्णप्रसादजात कहते हैं । पति मुझे असूया करे तथा धाता भी अनुमोदन करे किन्तु श्रीकृष्ण में हम ने प्राणादिक सर्वस्व अर्पण किये हैं । ऐसा कह कर श्रीकृष्ण में हृदय अर्पण ॥ ५५ ॥

गोपियाँ वेदादिक नहीं पढ़ीं तथा उन्होंने महत्पुरुषकी उपासना भी नहीं की । किन्तु भगवान् में सहज प्रेम उत्पन्न हुआ ॥ ऐसा प्रेम समस्त साधना में दुर्ल्लभ है किन्तु रसमार्ग से प्राप्त होता है जिस से श्रीकृष्ण वश होते हैं । पञ्चम में कहा है—हे राजन्ः! आप

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तन्त्रे च — ज्ञानतः सुलभामुक्तिर्भुक्तिर्यज्ञादिपुण्यतः।
सेयं साधनसाहस्रैर्हरिभक्तिः सुदुर्ल्लभा ॥
इत्थं प्रेम्णा तदंगैश्च साधकैश्चानुभावकैः।
सर्वांशेन विरोधोऽस्ति मुक्तीनां साधनैः सह ॥
सामान्यभक्त्या सायुज्यमुक्तेरेव विरोधिता।
उक्तं च भागवते— आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे।
कुर्वन्त्यहैतुकीं भक्तिमित्थम्भूतगुणो हरिः ॥
"कुर्वन्ति कृतिनः केचिच्चतुर्वर्गं तृणोपमं"
सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत।
दीयमानं न गृह्णन्ति बिना मत्सेवनं जनाः।
स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः ॥
इत्यादि ॥५६॥

सब यादवों के श्रीमुकुन्द पति, गुरु देवता, प्रिय, कुलरक्षक तथा किंकर भी हैं। ऐसा है तोभी निज अपने को भगवान् मुकुन्द मुक्ति प्रदान करते हैं कभी भी भक्तियोग नहीं देते हैं। इससे भक्तियोग दुर्ल्लभ तथा ज्ञानादिक सुलभ हो तन्त्र में भी कहा हैः ज्ञानसे मुक्ति सुलभ तथा यज्ञादि पुण्यों से भुक्ति की सुलभता है। किन्तु हरि-भक्ति हजार हजार साधनों से भी महादुर्ल्लभ है। ऐसा प्रेम, तथा प्रेम के अंग, तथा साधक और अनुभावादि से मुक्तियों का साधन तथा अंगादिकों से सर्वांश में विरोध है। सामान्य भक्ति में ही सायुज्यादिक मुक्ति विरोधी है रसरूपा भक्ति में तो क्या कहे ना। आत्माराम मुनिगण भी भगवान् के गुणों से मुग्ध

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

केचन वैकुण्ठमपि न वाञ्छन्ति-पाद्मे कार्त्तिकमाहात्म्ये ।—

वरं देव मोक्षं न मोक्षावधिं वा न चान्यं वृणेऽहं वरेशादपीह ।
इदं ते वपु र्नाथ गोपालबालं सदा मे मनस्याविरास्तां किमन्यैः ॥

मोक्षावधिं वैकुण्ठमित्यर्थः । अत्र सामान्यतः केचन साधनावस्थाया मेकसाधननिष्ठाः केचन बहुसाधननिष्ठाः । तथा प्रेमावस्थायामपि केचनैकानुभावनिष्ठाः केचन बहुलानुभावनिष्ठाः केचिदनियताः ।

यथा— श्री विष्णोः श्रवणे परीक्षिदभवद्वैयासकिः कीर्त्तने
प्रल्हाद स्मरणे तदङ्घ्रिभजने लक्ष्मीः पृथुः पूजने ।
अक्रूरस्त्वभिवन्दने कपिपति र्दास्येऽथ सख्येऽर्जुनः
सर्वस्वात्मनिवेदने बलिरभूत्कृष्णाप्तिरेषां परं ॥

श्रीशुकादयोऽनुभवनिष्ठाः अक्रूरबली साधननिष्ठौ । बहुलांगानमेवमे-यथा-सवैमनः कृष्णपदारविन्दयो र्वचांसि वैकुण्ठगुणानुवर्णने करौ हरे र्मन्दिरमार्जनादिषु श्रुतं चकाराच्युतसत्कथोदये ॥

होकर भक्ति करने लगे। कोई कोई चतुर्वर्ग को तृण के बराबर देखने लगे। मेरे भक्तगण केवल मेरी सेवा बिना दीयमान सालोक्यादि नहीं ग्रहण करते हैं ॥ ५६ ॥

कोई कोई वैकुण्ठ भी नहीं चाहते हैं। जैसे पद्मपुराण में कार्त्तिक महिमा में कहा है। हे देव! वरेश आप से मोक्ष, मोक्षावधि तथा और कुछ भी नहीं चाहता हूँ। आपका सुन्दर यह गोपालबालक शरीर मन में सदा उदय हो। यहाँ पर मोक्षावधि शब्द का अर्थ वैकुण्ठ है। साधन अवस्था में कोई कोई एक साधन-निष्ठ कोई कोई बहु साधन-निष्ठ हैं। तथा प्रेम अवस्था में भी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मुकुन्दलिंगालयदर्शने दृशौ तद्भृत्यगात्रस्पर्शेऽगंसंगमं।
घ्राणञ्च तत्पादसरोजसौरभे श्रीमत्तुलस्या रसनां तदर्पिते ॥५०॥

पादौ हरेः क्षेत्रपदानुसर्पणे शिरोहृषीकेशपदाभिवन्दने।
कामञ्च दास्ये न तु कामकाम्यया यथोत्तमं श्लोक
जनाश्रयारति ॥

व्रजेत्वतकर्यानिष्ठा।-यथा--

तथा यशोदा रोहिरायावेकं शकटमास्थिते।
रेजतुः कृष्णरामाभ्यां तत्कथाश्रवणोत्सुके ॥

"अतृप्तमुत्सृज्य यवेन सा ययावुत्सिच्यमाने पयसि त्वधिश्रिते"
इत्यादौ स्वरुपास्वादे विद्यमानेऽपि श्रवणे दुग्धरक्षणे च निष्ठा ॥

कोई कोई एक अनुभाव निष्ठ कोई कोई बहु अनुभाव निष्ठ हैं। यथा श्रावण में परीक्षित कीर्त्तन में वैयासकि स्मरण में प्रल्हाद चरण भजन में लक्ष्मी पूजा में पृथु वन्दना में अक्रूर दास्य में हनुमान, सख्य में अर्जुन आत्मनिवेदन में बलि महाराज हैं। शुकादि अनुभावनिष्ठ, अक्रूर और बलि साधननिष्ठ है। बहु अंग साधन यथा।—श्रीकृष्ण पदारविन्द में मन, भगवद्गुण समूह वर्णन में वाणी मन्दिरमार्जनादि कर्म्मों में हस्तश्रीकृष्ण सत कथा में कर्ण, मुकुन्दचिन्हादि दर्शन में नेत्र, भगवद्दासके अंग स्पर्श में शरीर, कृष्णचरणकमल सौरभ में घ्राण, भगवत् अर्पित तुलसी में रसना ॥ ५० ॥

हरि के क्षेत्र तथा धामादिगमन में चरण, हृषीकेश के चरण वन्दन में मस्तक, दास्य में कामनादिक लगाने लगे। व्रज में अत-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रद्धा गुरूपसत्तिश्च भजने सर्वथोद्यमः ।
ततो निष्ठा रुचिश्चैव व्यसनं तत्र तत्र ह ।
प्रेममार्गे क्रमोऽयं वै साधकानामुदाहृतः ॥५८॥

इति श्री श्री नारायणभट्टविरचितायां भक्तिरसतरंगिण्यां

प्रथमोल्लासः

इदानीं रसो निरूप्यते—

विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा ।
रसतामेति रत्यादिः स्थायी भक्तिरसो भवेत् ॥
सात्विकानुभावरूपत्वान्न पृथगुक्ताः ।

यद्वा— विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः ॥
स्वाद्यत्वं हृदि भक्तानामानीता श्रवणादिभिः ।
एषा कृष्णरतिः स्थायीभावो भक्तिरसो भवेत् ॥१॥

क्ये निष्ठा जानना। जैसे--यशोदा तथा रोहिणी एक शकट में स्थित हो कर श्रीकृष्ण तथा राम के साथ श्रीकृष्ण की कथा सुनने में उत्कण्ठा पूर्वक विराजित होने लगी। अतृप्त बालक श्रीकृष्ण को त्याग यशोदा उफने हुए दुग्ध की रक्षा करने को गई। यहाँ पर स्वरूपास्वाद मोजूद रहने से भी दुग्ध रक्षा करने में निष्ठा देखने में आई। साधकों के--श्रद्धा, गुरुशरण, भजन में सर्वथा चेष्टा, निष्ठा, रुचि, व्यसन, यह प्रेममार्ग का क्रम है ऐसा जानना॥५८॥

अब रस निरूपण करते हैं। रत्यादि स्थायीभाव, विभाव, अनुभाव तथा संचारीभाव द्वारा प्रकाश होकर रसको (भक्तिरस) प्राप्त होता है। अनुभाव होने का कारण सात्विक भाव पृथक नहीं कहा गया है॥ १॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एषोऽखंण्डो नित्यः स्वप्रकाशश्च आनन्दमयरूपवांश्च श्रीकृष्ण-वत् प्रतीयते भक्तानां चैतन्यात्मकेष्विन्द्रियेषु । सूर्य्यः कांस्यादिपात्रेष्विव "चिन्मात्राणीन्द्रियाण्याहु र्मुक्तानामन्यदेवत्विति" वैष्णवैरुक्तं पौराणिकं पदं । एकादशे च "सात्विकः कारकोऽसंगी रागान्धो राजसः स्मृतः । तामसं स्मृतिविभ्रष्टो निर्गुणो मयपाश्रयः" इति श्रीमुखोक्तं

ब्रह्मानन्दचमत्कारिकोटिं जनयते रसः ।
इत्युक्तिस्तु भक्तानां लज्जां जनयति स्फुटं ॥ ० ॥

श्रीभागवते ।— तस्यारविन्दनयनस्य पदारविन्दकिञ्जल्कमिश्र
तुलसीमकरन्दवायुः
अन्तर्गतः स्वविवरेण चकार तेषां संक्षोभमक्षरयुषा
मपि चित्ततन्वोः ।

रस अखण्ड, स्वप्रकाश, आनन्दमय है तथा श्रीकृष्ण के सदृश रूपवान प्रतीत होता है । भक्तों की सकल इन्द्रियाँ चिन्मय हैं उन चिन्मय इन्द्रिय समूहों में कांस्यादि पात्रों में सूर्य्य की प्रतीति की तरह रस प्रतीति होता है "भक्तों के इन्द्रिय समूह चिन्मय है" यह वैष्णवगण कथित पौराणिक वचन है । एकादश स्कन्ध में भी कहा है:-संगरहित सात्विकी, रागसे अन्ध राजसिक, स्मृति से विभ्रष्ट तामसिक, मुझ में निष्ठा करने वाले लोग निर्गुण हैं । रस कोटि-कोटि आश्चर्य्य ब्रह्मानन्द को जन्म देता है ऐसी उक्ति भक्तों को तुच्छ तथा लज्जा दायिनी है ॥ २ ॥

श्री भागवत में कहा है कमलनेत्र श्रीकृष्ण के चरण कमलों

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विषयरसस्यामूर्तिमत्वं वदन्तः सत्यमेव वदन्ति। रसत्वाभावादेव। रसस्तु भक्तिरस एव मूर्त्तिमान्। उक्तं प्रथमे "अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे अपश्यदिति" पूर्वेण सम्बन्धः। विषयरसमुदस्य-स्थं साहित्यदर्पणे। सत्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।

वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः।
लोकोत्तरचमत्कारप्राणः कैश्चित्प्रमातृभिः
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः॥ ३ ॥

अखण्ड एको विभावादिरित्यादि प्रकाशसुचमत्कारात्मकः। ततोऽस्य प्रकाशत्वमखण्डत्वं च सिद्धमित्युक्तं। किमुत वक्तव्यं भक्तिरसस्य। ततश्चाखण्डो नित्यस्वप्रकाशः स्वतन्त्रः सान्द्रानन्द रूपो भक्तिरसो नित्यसिद्धैर्विभावानुभावसात्विकव्यभिचारिभि

पर चढ़ी हुई तुलसी की मकरन्द-स्पर्शि वायु ने अक्षरध्यानपरायण ब्रह्मनिष्ठ ज्ञानियों के नासिका मार्ग से प्रवेश करके उनके चित्त तथा शरीर क्षुब्ध कर दिया। विषयरस को अमूर्त्त कहने वाले सत्य कहते हैं। कारण, विषयरस में रसका अभाव है। मूर्तिमान् भक्तिरस हीरस है। प्रथमस्कन्ध में अनर्थ नाशक भक्ति-योग को देखा ऐसी उक्ति है। विषयरस का परित्याग पूर्वक भग-वत्सम्बन्धिरस का लक्ष्य ही साहित्यदर्पण. कार का आशय है। जब लौकिक रस आस्वाद काल में विभावादि द्वारा प्रकाश होकर चमत्कार भाव को धारण करता है तो भक्ति रस का क्या कहना? अखण्ड, नित्य, स्वप्रकाश, स्वतन्त्र, सान्द्रानन्दरूप भक्तिरस नित्य सिद्ध विभाव, अनुभाव, व्यभिचारिभावों के द्वारा भक्तों के

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भक्तानां हृदये रम्यमानः स्वाद्यतां प्राप्नोति। केश्चिदेवायं रसः प्रतीयते न सर्व्वैः ये पुन वैष्णवत्वेन भासमानाः। प्रसिद्धाश्चाभेद पर्य्यवसायिनस्ते शृंगारित खड्गवत्—धातुचित्रितकाष्ठपाषाणवत् ज्ञेयाः॥ ४॥

उक्तं च साहित्यदर्पणे—पुण्यवन्तः प्रमिण्वन्ति यागिवद्रससन्ततिम्। तथा धर्म्मदत्तेनोक्तं।—सवासनानां सभ्यानां रसस्यास्वादनं भवेत्।

निर्वासनान्तु रंगान्तः काष्ठकुड्यमसंनिभा इति। अथविभाव उच्यते।—विभावो द्विविधः आलम्बनमुद्दीपनं च। तत्रा-लम्बनं—आलम्बनं द्विधा ज्ञेयं श्रीकृष्णे भक्त एव च॥ तत्र सामान्यरतेरा-लम्बनस्वरूपं—

रसरूपे स्वरत्यादिज्ञानस्य विषयो हरिः।
नन्दनन्दन एव स्यादाश्रयो रसवर्त्मसु॥

हृदय में सरस होकर आस्वादित होता है। अभेद उपासकों के हृदय में चित्र विचित्र खड्ग सदृश तथा चित्रित काष्ठ पाषण सदृश आस्वादित नहीं जानना॥ ३।४॥

साहित्यदर्पण में कहा है पुण्यशाली रससमूह का अनुभव करते हैं। धर्म्मदत्त ने भी कहा है।— रसकी वासना जिसमें है ऐसे सभ्यगण का रसास्वादन होता है। जिनकी वासना नहीं है उनकी रंगस्थल में काठ, पत्थर के सदृश जानना। अब विभाव कहते हैं। विभाव दो प्रकार का है। आलम्बन तथा उद्दीपन। श्रीकृष्ण तथा भक्तों में दो प्रकार आलम्बन है। सामान्य रति का आलम्बन स्वरूप यथाः— रसरूप में अपने रत्यादिज्ञानका विषय

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुत्रचित् द्विभुजत्वेन चतुर्भुजतया क्वचित् ।
पूर्णत्वेनैव कुत्रापि बालत्वेनापि कुत्रचित् ॥
अवतारतया क्वापि निर्गुणत्वेन च क्वचित् ।
इत्यादि विषयत्वेन तथाधारतयापि च ॥
उभयोरुभयं ज्ञेयं न रतेर्भिन्नता क्वचित् ।
चतुर्भुजादिके प्रायो रतेरंशांशता मता ॥५॥
तत्र ज्ञेया विभावास्तु रत्यास्वादनहेतवे ।
आलम्बनस्तु कृष्णादिस्तमालक्ष्य रसो भवेत् ॥
कृष्णस्यैव गुणा नाना भक्तानामेकरूपिणः ।
उदासीनानुकूल्याभ्यां नानात्वं भक्तिवर्त्मनि ॥
भक्तिवर्त्मानुकूल्येन गुणानामेकरूपता ।
श्रीकृष्णस्य गुणाः प्रोक्तास्त उच्यन्ते यथाक्रमं ॥

हरि है। रसमार्गमें श्रीनन्दनन्दन ही आश्रय हैं। कहीं पर द्विभुज, कहीं चतुर्भुज, कहीं पूर्णत्व, कहीं कहीं बालत्व, कोई स्थान में अवतार रूप, तथा कहीं निर्गुणरूप कहीं रति का विषय, कहीं पर रति के आधार रूपसे प्रकाशित होते हैं। विषयका आधार तथा आधारका विषय होने से रति से अलग नहीं हैं। चतुर्भुजादि स्वरूप में प्रायः रति का अंशांश जानना ॥ ५ ॥

रति का आस्वदन हेतु के लिये विभाव जानना जिसको लक्ष्य करके रस उत्पन्न हो, सो आलंबन जानना। जैसे कृष्ण प्रभृति। श्रीकृष्ण का गुण नाना प्रकार का तथा भक्तों का एकरूप का गुण जानना। उदासीन तथा आनुकूल्य से अनेक, और केवल भक्ति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सत्यं शौचं दया क्षान्तिस्त्यागः सन्तोष आर्जवं ।
शमो दमस्तपं साम्यं तितिक्षोपरतिः श्रुतं ॥
ज्ञानं विरक्तिरैश्वर्य्यं शौर्य्यं तेजो वलं स्मृतिः ॥
स्वातन्त्र्यं कौशलं कान्तिं धैर्य्यं मार्द्दवमेव च ।
प्रागल्भं प्रश्रयः शीलं सह ओजो वलं भगः ॥
गाम्भीर्य्यं स्थैर्य्यमास्तिकर्य कीर्त्तिमानोऽनहंकृतिः॥
एते चान्ये च भगवन्नित्या यत्र महागुणाः ॥
प्रार्थ्या महत्वमिच्छद्भिर्न वियन्ति स्म कर्हिचित् ॥६

इतिप्रथमस्कन्धोक्ताः ।

सत्यशौचे- यथार्थभाषणं सत्यं शौचं शुद्धत्वमुच्यते ॥

सत्यं यथा- तस्मान्मच्छरणं गोष्ठं मन्नाथं मत्परिग्रहं ।
गोपाये स्वात्मयोगेन सोऽयं मे व्रत आहितः ।

मार्ग के आनुकूल्य से एकरूप जानना। अब श्रीकृष्ण के गुण समूह कहते हैं—सत्य, शौच, दया, शान्ति, त्याग, सन्तोष, आर्जव शम, दम, तप, साम्य, तितिक्षा, उपरति, श्रुत, ज्ञान, विरक्ति ऐश्वर्य्य, शौर्य्य, तेज, बल, स्मृति, स्वातंत्र्य, कौशल, कान्ति, धैर्य्य, मार्द्दव, प्रागल्भ्य, प्रश्रय, शील, सह, ओज, बल, भग, गाम्भीर्य्य, स्थैर्य्य, आस्तिक्य, कीर्त्तिमान, अहंकार, प्रभृति, गुण, तथा और महागुण समूह भगवान में विराजित हैं, वे गुण समूह नित्य तथा महाद्गण द्वारा प्रार्थित हैं ॥ ६ ॥

यथार्थ भाषण सत्य, तथा पवित्रता ही शौच है। सत्य-यथा- इसलिये मेरे में शरण आने वाले तथा मैं हूँ जिनके रक्षक, मुझसे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शौचं-यथा— अथ कृष्णश्च रामश्च कृतशौचौ परंतप !
मल्लदुन्दुभिनिर्घोषं श्रुत्वा द्रष्टुमुपेयतुः ।

सर्वैश्वर्ये प्रकटितेऽपि कंसाभिभवितुमिच्छतीति मातुलवधे दोषोऽस्माकमिति शुद्धत्वं ।

दया— भक्तदुःखासहिष्णुत्वं दयाशब्देन कथ्यते ॥

यथा— यो नो जुगोप वनमेत्य दुरन्तकृच्छ्राद्दुर्वाससो रचितादयुताग्रभुग्भ्यः । शाकान्नशिष्टमुपयुज्य यतस्त्रीलोकीं तृप्तामममंस्त सलिले विनिमग्नसंघः

क्षान्तिः— क्रोधहेतौ समुत्पन्ने क्षान्तिश्चित्तस्य संयमः ॥

यथा-माघकाव्ये— प्रतिवाचमदत्त केशवः शपमानाय न चेदिभूभुजे । अनुहुंकुरुते घनध्वनिं नहि गोमायुरुतानि केशरी

त्यागः— याचके मुक्तहस्तत्वं त्यागः संकीर्त्तितो बुधैः ।

सन्तोष— स्नेहदत्ते ह्यलंबुद्धिः सन्तोष समुदाहृतः ॥ ७ ॥

अन्य वस्तु न चाहने वाले गोपों (व्रजवासियों) को अपने आत्मबल से रक्षा करूँगा, यह मेरा व्रत है। शौच-यथा-हे परंतप! अनन्तर राम और कृष्ण कृतशौच हो कर मल्ल तथा दुन्दुभि शब्द सुन कर रंगभूमि देखने को उपस्थित हुए। समस्त ऐश्वर्य प्रकट करने पर भी मातुल कंस के वध की इच्छा करनी निर्दोष तथा शुद्ध है। दया-भक्तों के दुःख न सहने को कहते हैं।

क्षान्ति।—क्रोध के कारण उपस्थित होने पर भी चित्त का संयम क्षान्ति है। श्रीकृष्ण ने गालि देने वाले चेदिराज के लिये एक उत्तर नहीं दिया। सिंह क्या शृगालों का भूकना सुनता है। याच

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथा— पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥

आर्जवं— शत्रावपि ह्यवक्रत्वमार्जवं परिकीर्त्तितं ॥

यथा— असौ वृकोदरः पार्थस्तस्य भ्राताऽर्जुनो ह्ययं।
अनयोर्मातुलेय मां कृष्णं जानीहि ते रिपुं ॥

शमः— भक्तेषु मनसः स्थैर्य्यं श्रीकृष्णे शम ईरितः।

यथा— साधवो हृदयं मह्यं साधूनां हृदयं त्वहं।
मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपि ॥

दमः— भक्तेषु चेन्द्रियस्थैर्य्यं श्रीकृष्णेऽयं दमो मतः।
इन्द्रियाणां तथा स्थैर्य्यं दम इत्यभिधीयते ॥

यथा— साधुभिर्ग्रस्तहृदयो भक्तै र्भक्तजनप्रियः ॥
अहं भक्तपराधीनो ह्यस्वतन्त्रो इव द्विज ! ॥

के लिये मुक्तहस्त (खोला हाथ) ही त्याग है। स्नेह पूर्वक दी हुई वस्तु में अलंबुद्धि ही सन्तोष है ॥ ७ ॥

जो भक्त, भक्ति पूर्वक पत्र, पुष्प, फल, तथा जलादिक मुझको अर्पण करता है मैं भक्तिदत्त उस वस्तु को ग्रहण करता हूँ। शत्रु में भी सरलता आर्जव है। यथा।—यह वृकोदर पार्थ तथा अपर उसका भ्राता अर्जुन यह है। दोनों के मातुलेय तथा तुम्हारा बैरी कृष्ण मैं हूँ। भक्तोंमें मन की स्थिरता ही श्रीकृष्ण में शम है। यथा साधुगण मेरा हृदय मैं भी साधुगण का हृदय हूँ।

भक्तों में इन्द्रिय स्थिरता ही दम है। तथा-साधुओं से मैं ग्रस्त हृदय हूँ और पराधीन की तरह उनका अधीन भी हूँ। तप-श्रीकृष्ण

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तपः— तपः स्वधर्म्मो भक्तस्य येन रक्षादिकं भवेत् ।
क्रिया प्रज्ञाश्यो धर्म्मः सच भक्तिरक्षणादिः ॥

यथा-प्रथमे— परिभ्रमन्तमुल्काभां भ्रामयन्तं गदां मुहुः ।
अस्त्रतेजः स्वगदया नीहारमिव गोपतिः ॥
विधमन्तं सन्निकर्षे पर्य्यैक्षत क इत्यसौ ।
प्रतिज्ञादयोऽपि क्रियारूपा एव ज्ञेयाः ॥८॥

साम्यं ।— अरिमित्राद्यभावस्तु साम्यं विषयहेतुकः ।
यथा ।— निभृतमरुन्मनोक्षदृढयोगयुजो हृदि य
न्मुनय उपासते तदरयोऽपि ययुः स्मरणादिति
भक्तविषयकस्तु अरिमित्रभावः एव ।

तितिक्षा ।— स्वहेतुकापराधस्य तितिक्षा सहनं स्मृता ॥
यथा ।— नूनं नृपाणां त्रिमदोऽर्थानां महीं मुहुश्चालयतां चमूभिः ।
वधात् प्रपन्नार्त्तिजिहीर्षयेशो व्युपैक्षताघं भगवान्कुरूणाम् ।

का स्वधर्म्म ही तप है जिस से भक्तों का रक्षणादिक होता है।

उल्का तुल्य भ्रमणकारी अस्त्र तेज समूह को सूर्य्य जैसे अन्धकार को नाश करता है ऐसे अपने गदा द्वारा छिन्न भिन्न करने लगे। प्रतिज्ञादि क्रियारूपा जानना ॥८॥

शत्रु तथा मित्रादि भावका अभाव ही 'साम्य' है। मनोगति रोधपूर्वक दृढ समाधिपरायण मुनिगण जिनकी उपासना करते हैं अरिगण स्मरण मात्र से उस भावको प्राप्त हुए हैं। यहाँ पर

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उदासीनत्वं ।— वस्तुप्राप्तावुपरतिरुदासीनत्वमीरितं ॥

यथा।—— भूर्य्यप्यभक्तोपहृतं न मे तोषाय कल्पते ।

श्रुतं— श्रुतं शास्त्रविचारः स्यान्मुख्यार्थे ह्यविरोधतः ।

यथा— भगवान्ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया ।

तदध्यवस्यत्कूटस्थो रतिरात्मन्यतो भवेत् ॥

ज्ञानविरक्ती— ज्ञानं स्यादात्मविषयं विरक्तिः स्याद्वितृष्णता ॥

ज्ञानंयथा द्वितीये—विशुद्धं केवलं ज्ञानं प्रत्यक् सम्यगुपस्थितं ।

सत्यं पूर्णमनाद्यन्तं निर्गुणं नित्यमद्वयम् ॥

वैतृष्ण्यं—यथा— मातामहं तूग्रसेनं यदूनामकरोत्पतिं ॥ ६ ॥

प्रेरितृता तु जीवानामैश्वर्य्यं विनिगद्यते ।

भक्त विषयक अरि मित्र भाव है। स्वहेतुक अपराध का सहना तितिक्षा है। यथा—निश्चय राजा समूहका तीन प्रकार मद होता है। इत्यादि

वस्तु की प्राप्ति में उपरति ही उदासीनत्व है। जैसे—अभक्त द्वारा दिया प्रचुर उपहार भी मेरी प्रसन्नता के लिये नहीं जानना। शास्त्र विचार ही 'श्रुत' है बिना विरोध से मुख्यार्थ ग्रहण ही शास्त्र विचार जानना। भगवान् ब्रह्म इत्यादिक।

आत्म विषयक वृत्ति ज्ञान तथा विषय वितृष्णता विरक्ति है। यथा— भगवान् विशुद्ध, केवल ज्ञानमय, प्रत्यगात्मा, सत्य, पूर्ण, अनादि, निर्गुण, नित्य अद्वय स्वरूप है। वैतृष्ण्यं—माता-मह उग्रसेन को यादवों का राजा बनाया ॥६॥

जीवों के प्रेरयिता हि ऐश्वर्य्य है। भागवत में कहे हुए है। भक्तके लिये युद्ध विषयक उत्साह 'शौर्य्य' है। यथा दसम में—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथा॥ श्रीभागवते—प्रवुद्धकर्म्मदैवेन त्रयं त्रिंशतिको गणः ।
प्रेरितो जनयन्त्वाभिमात्राभिरधिपुरुषम ॥

शौर्य्यं— संग्रामविषयोत्साहः शौर्य्यं भक्तार्थमरितम् ॥

यथा दशमे— गोपालैः पशुभिर्मन्दत्रासितैः मिलत्तम् ॥
वज्रदर्प्पहा दुष्टानां स्त्रद्रियाणां दुरात्मनाम् ॥

तेजः— तेजः प्रभावा विशेषः दुः प्रत्यपेत्यमेव वै ॥

यथा— शाल्वश्च कृष्णमालोक्य हतप्राय वलेश्वरइति ।

वलं— वलं च दुःकरे कार्ये शीघ्रकारित्व मीरितं ।

स्मृतिः— कार्य्याकार्य्यविचारो यः सः स्मृतिः परिकीर्त्तिता ।

यथा—दशमे— कृत्यं किमत्रास्य खलस्य जीवनं
न वा अमीषां च सतां विहिंसनम् ।
द्वयं कथं स्यादिति संविचिन्त्य
ज्ञात्वाविशत्तु मशेषविद्धरिः ।

स्वातन्त्र्यं— स्वातन्त्र्यं भक्तितोऽन्यत्राऽपराधीनत्वमीरितं ।

यद्वा— क्रियानपेद्य कर्त्तृत्वं स्वातन्त्र्यं परिचक्षते ।

यथा— कालियस्यापि सिरसि नर्त्तनेनाकरोत्कृष्णम् ॥
स्तुवन्तमप्यजं कृष्णो न वक्ति न च हृष्यति ॥१०॥

असहनीय प्रभाव तेज है। जैसे—शाल्व श्रीकृष्ण के दर्शन मात्र ही मृतुल्य हो गया। दुःसाध्य कार्य्य को शीघ्र करना ही बल है। कार्य्य तथा अकार्य्य का विचार स्मृति है। तथा—अन्यत्र न न पराधीन रहना 'स्वातन्त्र्य' है किम्वा क्रिया की अपेक्षा न करता हुआ कर्त्तृत्व हि स्वातन्त्र्य है। जैसे-हरिने कालिय नाग के मस्तक

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आम्नाय-प्रष्ठ
धर्मनिधि, करो
वाराणसी-5

क्रियया सर्वसन्तोषजननं कौशलं विदुः ॥

यथाश्रीदशमे — प्रेष्ठं नासंसतस्त्वं न तत्त्वविद: श्रियः ॥

कान्तिः सौन्दर्य्यमेव स्यादंगस्य स्तावकं च यत् ।

यथाश्रीदशमे— रूपपेशलमाधुर्य्यहसितालापवीक्षितैः ।
धर्षितात्मा ददौ सान्द्रमुभयोरनुलेपनम् ॥

अत्याकुलत्वं देहस्य नेत्रादीनां तथैव च ।
धैर्य्यं मनीषिभिः प्रोक्तं मार्दवं चित्तमार्दवं ॥

उभयोर्यथा— सख्युरंशे भुजाभोगं प्रसार्य्यावस्थितो हरिरिति ।

अतीव कोमलौ तात चरणौ ते महामुने इति भृगुं प्रति प्रसाद विषयं ज्ञानं नूनन नूतनं भवेत् ।

प्रतिभा शब्दवाच्यं तत् प्रागल्भ्यं परिकीर्त्तितं ।

यथा— विलोक्य लतालये युवतंसहंसं पुर
पयः पतिदिशं विशन्नयमये मया लक्ष्यते ।
वदामि कलहंसकं तरुणि ते पादाश्रितो
हसन्निति स राधया चरतु नोऽजितोऽनुग्रहः ॥११॥

पर नृत्यादि द्वारा कृपा की परन्तु स्तुति परायण ब्रह्मा से न कुछ कहा न ऐसे प्रसन्न हुए ॥ १० ॥

कर्म्म द्वारा समस्त जीवों का सन्तोष उत्पादन ही कौशल है । अगं का सौन्दर्य्य ही कान्ति है

शरीर तथा नेत्रादि अंगों का व्याकुल न होना ही धैर्य्य है । चित्त की मृदुता ही मार्दव है । हरि सखा के कन्धेपर भुजा प्रसारण पूर्वक विराज मान होने लगे । यहाँ पर 'धैर्य्य' है । भृगु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

औद्धत्य परिहारो यः क्रियया वचनेन च ।
स एव प्रश्रयो ज्ञेयः विनयापरवाचकः ॥

यथा-दशमे- मयि भृत्य उपासिने भवतो विबुधादयः ।
बलिं हरंत्यवनताः किमुतान्ये नराधिपाः ॥

शीलं भक्ताभक्तस्य चरितं स्वस्मिन येनैवभावतः ।
तेनैव भावतः सर्वं तच्छीलं परिकीर्त्तितं ॥

यथा- रंगस्थितः श्रीकृष्णः एकैव च तथाकृतिः ।
स्वभावतः प्रतीतिस्तु पृथक् सर्वेषु दृश्यते ॥

यथा वा-- मल्लानामशनि नृंणांनरवरःस्त्रीणां स्मरो मूर्त्तिमान्
गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता
स्वपित्रोः शिशु ।

के चरण प्रहार करने पर आप कहने लगे कि हे महामुने । तुम्हारे चरण अत्यन्त कोमल हैं मुझ पर प्रहार करने से पीडा लगी होगी यहाँ मार्दव है । प्रतिभा शब्द कहेना प्रागल्भ्य है ॥११॥

क्रिया किम्बा वचन से उद्धत भाव परित्याग ही प्रश्रय तथा विनय पर्य्यायवाची है। यथा-दशम में:-मैं भृत्य उपस्थित हूं इस पर भी आप सब भय करते हैं देवतागण नीचमस्तक से पूजा करते हैं और राजाओं का तो क्या कहेना। जिस भाव से भक्त तथा अभक्त दोनों के विषय भागवान् होते हैं उस भाव को 'शील' कहते हैं। जैसे--एकमात्र श्रीकृष्ण रंगस्थल में एक रुप में स्थित हो कर पृथक् पृथक् व्यक्तिओं के लिये पृथक् पृथक् प्रतीति होने लगे यथा वा-मल्लों के लिये वज्र रुप, मनुष्यों के लिये नर-श्रेष्ठ, स्त्रीओं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मृत्युर्भोजपतेर्विराड् विदुषां तत्वं परं योगिनां
वृष्णीनां परदेवतेति विदितो रंगंगतः साग्रजः ॥
सह ओजो बलं चैव मन इन्द्रियपाटवं ।
पटुत्वं भक्तविषयं सर्वदा ग्रहणं स्मृतं ॥

यथाश्रीभागवते— साधवो हृदयं मह्यं साधूनां हृदयं त्वहं ।
मदन्यं ते न जानन्ति नाहं तेभ्यो मनागपि ॥१२॥

सर्वभोगास्पदत्वं हि भगः स्याच्छ्रीपतित्वतः ।

यथा— प्रस्थापनोपानयनैरपत्यानां महोत्सवान् ।
वीक्ष्य योगेश्वरेशस्य येषां लोका विसिस्मिरे ॥

गाम्भीर्य्यं क्षोभराहित्यं हर्षादिक्रोधहेतुतः ।

यथा— सहदेवस्तु तौ पञ्चान्निन्दायां वैरिणस्तथा ।
श्रीकृष्णाधारकक्षो भो नाविरासीत्कथञ्चन ॥

के कन्दर्प, गोपों के स्वजन, असत् राजाओं को शासक, अपने २ पिता माता के लिए बालक रूप, कंसको मृत्यु पण्डितों को विराट, योगियों को परमतत्व यादवों के परदेवता रूप से प्रतीत होने लगे सहिष्णुता, ओज, तथा बल, मन तथा इन्द्रियों की पटुता हो भक्त विषयक जानना । यथा श्रीभागवते ।- साधुगण मेरा हृदय है तथा मैं भी साधुओं का हृदय हूँ ॥ १२ ॥

समस्त भोगों का आधार ही 'भग' है । भगवान् योगेश्वर श्री कृष्ण के पुत्रों पौत्रों का विवाह तथा उपयन के उत्सवादि देखकर समस्त लोक विस्मित हो गये ॥ हर्ष, क्रोधादि कारण से क्षोभ रहित होना गाम्भीर्य्य है । श्रीकृष्णपरायण सहदेवजी बैरीयों की की हुई निन्दा सुनकर भी क्षोभ के लिये नहीं प्राप्त हुए । वैष्णवनिन्दा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वैष्णवनिन्दायां तु भवत्येव ।

देहेन नियतः स्थानादचलः स्थैर्य्यमुच्यते ।

यथा वाराहे— भूतेश्वरे गर्त्तेश्वरे द्वे कोटी दक्षिणोत्तरे ।
नित्यं वसामि वसुधे न त्यजामि कदाचन ॥

श्रीभागवते वा— मथुरा भगवान् यत्र नित्यं सन्निहितो हरिः ॥
साध्यसाधनकर्त्तादौ श्रद्धा ह्यास्तिक्यमुच्यते ।
नारदे कश्यपे दक्षे आस्तिक्यं दर्शनं ददत् ॥
कर्म्मादौ भगवान् लोकं प्रवर्त्तयति नित्यशः ॥
यश एव हि कीर्त्तिः स्यात् यतस्तुत्यादिकं भवेत् ।

यथा श्रीदशमे— राज्ञा सभाजिताः सर्वे सुरमानवखेचराः ।
कृष्णं क्रतुं प्रशंसंतः स्वधामानि ययु मुदा ॥१३॥

में क्षोभ होना ठीक है । शरीर द्वारा नियत स्थान से अचल रहना स्थैर्य्य है । यथा-बाराह पुराण में:-भूतेश्वरादि तीर्थों में मैं नित्यवास करता हूँ हे वसुधे कभी भी परित्याग न करूँ । श्रीभागवत में भी कहा है:-मथुरापुरी श्रेष्ठा है जहाँ भगवान् हरि नित्य ही स्थित रहते हैं । साध्न साधनादि में श्रद्धा आस्तिकता है । नारद कश्यप दक्षादिकों में आस्तिकता प्रदान कर कर्म्मादिओं में लोकों को नित्य प्रवृत्ति करते हैं । कीर्त्ति ही यश है जिससे स्तुति प्रभृति होता है । दशम में यथा !-समस्त सुर, मानव, खेचर, राजा युधिष्ठिर द्वारा सन्मानित हो कर कृष्ण तथा यज्ञ की प्रशंसा करते हुए अपने अपने स्थान में गये ॥ १३ ॥

हे गोपप्रिय ! तुम्हारा यश रूपी चन्द्रकिरण से समस्त जगत् शुभ्र हो गया है परन्तु श्रीव्रजेश्वर नन्द को कृष्णभाव कैसे उत्पन्न

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्वद्यशः सकलकौमुदीरसः शुभ्रभावमभितो जगन्नयन् ।
गोपवल्लभ ! कथं नु निर्ममे कृष्णभावकलितं व्रजेश्वरं ॥
मानः स्याल्लोकपूज्यत्वं गर्वाभावोऽनहंकृतिः ।
यथोभयोःश्रीभागवते । "ब्रह्मादयो लोकपाला वहन्ति बलि"
अहो देव महादेव ? पापोऽयं स्वेन पाप्मना ।
हतः कोनु महत्स्वीश जन्तुर्वै कृतकिल्विषः ॥
अथद्वितीयभक्ताख्यमालम्बनोच्यते ॥
भक्त्याश्रयस्तु भक्तः स्यात्स एवालम्बनो मतः ।
स च पञ्चविधः प्रोक्तः पुरुषस्त्रीपशुस्तथा ॥
वृक्षः पक्षीति नित्यत्वाद्भक्तेन विपरीतता ॥
प्राकृतरतिवत् न पश्वादिषु भक्तिरतेभावः ।
भक्तस्वरुपंपाद्मे—ये कण्ठलग्नतुलसी नलिनाक्षमालाः
ये बाहुमूलपरिचिन्हितशंखचक्राः ।
ये वा ललाटपटले लसदूर्द्ध्वपुण्ड्रा
स्ते वैष्णवा भुवनमाशु पवित्रयन्ति ॥

कथया। लोकपूज्यत्व, मान तथा गर्वाभाव, 'अनहंकृतित्व' है। दोनों के दृष्टान्त श्रीभागवत में यथा।--ब्रह्मादि लोक पालसमूह जिनकी पूजा ग्रहण करते हैं। हे महादेव ! यह पापी अपने पाप से खुद मरगया है। हे स्वामिन् ! महत जनों में अपराधी नाश को प्राप्त होता है। अनन्तर द्वितीयभक्ताख्य आलम्बन कहते हैं। भक्त्या श्रय भक्त ही आलम्बन है। भक्त-पुरुष, स्त्री, पशु, वृक्ष, पक्षी भेद से पाँच प्रकार के हैं। नित्यता का कारण विपरीतता नहीं है। प्राकृत रति की तरह पशु प्रभृतिओं में भक्ति रति का अभाव

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इदं तत्सर्गेण प्रायकं सेव्य ग्रीव मेघपुष्पवलाहकानां नित्यभक्तत्वश्रवणात्। स्त्रीणामपि तथैव। पशुवृक्षपक्षिणां तु भाव एव ज्ञापकः। भावाविर्भावकस्तु वैष्णवसंसर्ग एव। उक्तं च शाण्डिल्यस्मृतौ—पशुपुत्रादिकं सर्वं गृहोपकरणानि च।

अर्कयेच्छंखचक्राभ्यां नामकुर्य्याश्चवैष्णवः॥ १४॥

अथगुणाः— परदुःखासहिष्णुत्वं द्रोहराहित्यमेव च।

सत्यभाषा मृदुत्वं च मत्सरादिविवर्जनं।

भक्त्या सर्वोपकारित्वं कामराहित्यमेव च॥

इत्यादय एकादशस्कन्धोक्ताः

तथा तृतीये च— अलम्पटः शीलधरो गुणाकरो हृष्टः परर्द्ध्या व्यथितो दुःखेषु।

अभूतशत्रुर्जगतः शोकहर्त्ता नैदाघिकं ताप इवोडुराजः॥

नहीं है। भक्तस्वरूप पद्मपुराण में यथा!--जिनके कण्ठ में तुलसी माला, कपाल में तिलक तथा जो शंखचक्रचिन्हों से युक्त है वह भक्त है। यह सब तत्संसर्ग से जानना। पशु, पक्षि, वृक्ष, मेघ, प्रभृति का भी भाव प्रकाश होता है। भाव का प्राकट्य वैष्णवसंग से जानना। शाण्डिल्यस्मृति में कहा है वैष्णव-पशु, पुत्र, गृहोपकरण प्रभृति समस्त शंखचक्र से अंकित करे तथा भगवत्सम्बन्धि नाम रखे॥ १४॥

परदुःख न सहना, द्रोह से रहित, सत्यबोलना, मृदु, मत्सरादि शून्य, भक्ति से सब का उपकार करना, कामनाओं से रहित होना,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

केचिद्भगवद्गुणा अपि ज्ञेयाः । उदाहृतयस्तु प्रसिद्धा विस्तरभयान्न विचार्यंते । भक्तानां भेदास्तत्प्रकरणे वक्ष्यामः ॥

आलम्बनभेदाः

आलम्बनश्चतुर्द्धा धीरोदात्तश्च धीरललितश्च ।
धीरप्रशान्त नाम ततश्च धीरोद्धतः ख्यातः ।
इमं चतुर्विधं भेदं भक्तेष्वपि विनिर्दिशेत् ।
यदि स्त्री पशुवृक्षेषु सर्वांगानि विभागतः ।
न सन्ति तत्र भक्तत्वं भावेनैव विनिर्दिशेत् ।
यथा वात्सल्यकार्यं हि मधुरेण प्रदृश्यते ।
मधुरस्यापि तत्तत्र न भक्तत्वे भवेत्क्षतिः ।

ततश्च स्त्री पशु वृक्ष पक्षिषु भावेनैव भक्तव्यवहारः । अतएव सर्वग्रंथेषूत्तम मध्यमप्राकृतव्यवहार आलम्बने श्रीकृष्णभक्तयोस्तु पूर्ण-पूर्णतर पूर्णतमादिव्यवहारः ॥ १५ ॥

एकादशस्कन्ध उक्त गुण समूह भक्तों में होता है । तृतीयस्कन्ध में भी अलम्पट, सुन्दरस्वभाव वाले, गुणों से युक्त, प्रसन्नचित्त वाले, अपर का ऐश्वर्य में व्यथा न करने वाले जन समूह, चन्द्र द्वारा ग्रीष्म ताप हरण के तुल्य शोक समूह को हरण करते हैं ।

कोई कोई भगवत्सम्बन्धि गुण भी जानना । उदाहरण प्रसिद्ध है ग्रन्थ विस्तार भयसे नहीं विचार हुआ है । भक्तों के भेद, भक्त प्रकरण में वर्णन होगा । अब आलम्बन भेद कहते है । धीरोदात्त, धीरललित धीरप्रशान्त तथा धीरोद्धत भेद से आलम्वन चार प्रकार का है । भक्तों में भी धीरोदात्तादि भेदों का प्रयोग होता

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ धीरोदात्तः— दयावानतिगम्भीरो विनीतः सत्यसारवान् ।
दृढव्रतस्तितिक्षावानात्मश्लाघापराङ्मुखः ।
निगूढाहंकृति र्धीरैर्धीरोदात्त उदाहृतः ॥

यथा— निरातंकं शक्रे कलयति किलोपद्रवभरं
निगूढाहंकारं समनिदधता भूधरवरं ।
निरर्थाया सन्तं चरणरतितं चानुनयता
न कृष्णेन क्रोधो न परिकलितस्तोषनिवहः ॥

अम्बरीषादिभक्तेषु धीरोदात्तत्वमीरितं ।
तद्गुणा नवमे प्रोक्ताः शुकेनैव त्रिभागशः ॥
राजा तु न कृताहारः प्रत्यागमन कांक्षया ।
चरणावुपसंगृह्य प्रसाद्य समभोजयेदित्यादि ॥

है, स्त्री, पशु, वृक्ष, पक्षि प्रभृतिओं में भक्तव्यवहार को भावद्वारा जानना। इसलिये समस्त ग्रन्थों में उत्तम, मध्यम, प्राकृत व्यवहार है। आलम्बन में श्रीकृष्ण तथा भक्तों का पूर्ण, पूर्णतर, तथा पूर्णतम व्यवहार है ॥१५॥

दयावान्, अतिगम्भीर, विनीत, सत्यवान्, दृढव्रत, तितिक्षा-वान्, आत्म श्लाघासे रहित, निगूढ अहंकार युक्त, धीरोदात्त नाम से कथित है। इन्द्र निर्भय होकर उपद्रव समूह करने पर श्रीकृष्ण ने निगूढ अहंकार के साथ गोवर्द्धन धारण किया। इन्द्र के परा-जित हो चरणों में पतित होने पर न श्रीकृष्ण का कोई क्रोध न प्रसन्नता प्रगट हुई। अम्बरीष प्रभृति भक्तों में धीरोदात्त कथित है। श्रीशुकदेवजी ने नवम स्कन्ध में वर्णन किये है। यथा—राजा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ धीरललित:— निश्चिन्तो नवतारुण्यो वनितावशगः कृती ।
परिहासकलादिग्धो धीरलालित्य संस्तुतः ॥

यथा कस्यचित्— न हानिं न ग्लानिं न निजगृहकृत्यव्यसनितां ।
न घोरं नोद्घूर्णां न किल कदनं वेत्ति किमपि ।
वरांगीभिः सांगीकृतसुहृदनंगाभिरभितो
हरिर्वृन्दारण्ये परमनिशमुच्चैं विहरति ॥ १६ ॥
अत्र भक्तेषु राधेव परमावधिरिष्यते ।
मध्यप्राकृतभेदाभ्यामाश्रयोऽन्योपि संमतः ॥

धीरशान्तः— शमः प्रकृतिकः क्लेशसहनश्च विवेचकः ।
गम्भीरादिगुणोपेतो धीरशान्त उदाहृतः ॥

यथा— नयनयुगलवीक्ष्यालक्ष्यगाम्भीर्यसीमा
वचनरचनरीत्या नीतनीत्यंगभूमा ।
व्रजविपिनविहारे कंचिदाकल्य भूयं
हरिरिह सखि सौम्यो मन्त्रितामातनोति ॥

अम्बरीष ने प्रत्यागमन आकांक्षा से भोजनादिक न करता हुआ तथा चरण धारण पूर्वक प्रसन्न करता हुआ भोजन कराने लगे। निश्चिन्त, नवयुवा वनितावश, क्रियावान परिहासकला युक्त धीरललित है। यथा—न हानि न कोई ग्लानि, न गृहकृतिव्यसनी, न कोई दुःखादिक श्रीकृष्ण में है। परन्तु निश्चिन्त होकर सुहृद् व्रजागंनाओं के साथ निरन्तर श्रीवृन्दावन में विहारकरते हैं ॥१६॥

भक्तों में श्रीराधिका सर्वोपरि है। और और मध्यम तथा प्राकृत भेद से युक्त है। शमप्रकृतिक, क्लेशसहन, विचारयुक्त,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथधीरोद्धतः— मात्सर्य्यवानहंकारी मायावी रोषणश्चलः।
आत्मश्लाघी च विविधो धीरोद्धत उदाहृतः॥

यथातृतीये— सत्यं वयं भावेन गोचरा मृगा युष्यद्विधान्मृगये ग्रामसिंहान्
न मृत्युपाशैः प्रतिमुक्तस्य वीर विकत्थनं तव गृह्णत्यभद्रम्॥

भीमादयस्तु भक्तेषु भक्ता धीरोद्धताः स्मृताः।

प्रथमेभीमवाक्यं—तत्राहामर्षितो भीमस्तस्य श्रेयान्वधः स्मृतः।
न भत्तुर्नात्मन श्चार्थे.................. ॥१७॥

धीरोदात्तादिका भेदाः श्रीकृष्णस्य गुणात्मकाः।
विरोधेऽप्यविरोधित्वं विषयस्य विभेदतः।
तथा धीरविभेदेन नायके वत्सलो यथा॥

गम्भीरादि गुण शाली धीरशान्त है। यथा।—हे सखि देख श्रीहरि सौम्यमूर्त्ति धारण पूर्वक मन्त्रणा दे रहे हैं। नयन युगल से गाम्भीर्य्य समुद्र का भाव प्रतीति हो रहा है तथा वचन भंगी से नीति का साक्षात् विग्रह मालुम होता है। मात्सर्य्यवान्, अनहंकारी, मायावी, रोषयुक्त, चञ्चल, आत्मश्लाघी धीरोद्धत नाम से कथित है। यथा तृतीय में।—हम भाव से दृश्य होते हैं। तुम सब को मृग के सदृश्य ढूढ़ते हैं इत्यादिक भीमादि धीरोद्धत नायक है तथा प्रथम में भीमवाक्य है।॥१७॥

धीरोदात्तादिक भेद श्रीकृष्ण में गुणात्मक जानना। विषय के भेद से परस्पर विरोध होने से भी श्रीभगवान में अविरोध से

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तथा च श्रीकृष्णस्य चत्वारो धर्म्मा: तेषां चत्वारो विषयाः गुणास्तु त्रिविधास्तत्र न धीरोद्धतगुणस्य धीरललितविषये प्रवेशः। किन्तु धीरोद्धतविषये तस्मादन्यगुणस्यान्यविषये विरोध इति तात्पर्य्यं।

अथ भक्तानां भेदा:-भक्तास्तु द्विविधाः साधकाः सिद्ध श्च।

ये भक्तिसाधनरता अन्यनिष्ठाभिघाततः।
देहादिविषयस्पर्शाः साधकाः परिकीर्त्तिताः॥

यथा— ईश्वरे तदधीनेषु बालिषेषु द्विषत्सु च।
प्रेममैत्री कृपापेक्षा यः करोति स मध्यमइति

अथ सिद्धाः— अनित्यानन्दशून्या ये प्रेमानन्देन संयुताः।
सिद्धास्तु एव विख्याताः कृष्णवद्भक्तिसंश्रयाः॥
बैकुण्ठे पार्षदानां प्रेमनिष्ठत्वं प्रसिद्धमेव।
सिद्धास्तु द्विविधाः नित्यसिद्धाः साधनसिद्धाश्च।
प्रेम्णस्तु नित्यधिष्ठानं नित्यसिद्धाः प्रकीर्त्तिताः।
यतः प्रवर्त्तते भक्तिः सूर्य्यतोरश्मयो यथा॥

उपस्थित रहते हैं। अनन्तर भक्तों के भेद कहते हैं। साधक, सिद्ध भेद से भक्त दो प्रकार का है अन्यनिष्ठा से रहित हो कर देहादि विषयों का स्पर्श का साथ भक्तिसाधन में रत "साधक" परिकीर्त्तित है। यथा-ईश्वर में ईश्वर के आधीन भक्त,बालिष, द्वेषिजन में क्रम से प्रेम, मैत्री, कृपा, अपेक्षा करने वाले मध्यम भक्त हैं। अनित्य आनन्द से रहित, प्रेमानन्द युक्त, भक्ति आश्रित कृष्णसदृश, सिद्ध नाम से कथित हैं। नित्यसिद्ध, तथा साधनसिद्ध भेद से सिद्ध दो प्रकार के हैं। नित्यसिद्ध भक्तों में प्रेम का नित्य अधिष्ठान है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आत्मनो सर्वगुणानां कृष्णे प्रीति परांगताः ।
नित्यानन्द गुणाः सर्वे नित्यसिद्धा मुकुन्दवत् ॥१८

अयमभिसन्धिः नित्यानन्दादिगुणः श्रीकृष्णो नित्यानन्दादि गुणाः श्रीकृष्णभक्ता नित्याः सर्वभक्तिरसश्राविणी मूर्त्तिमती नित्य गुणाभक्ति र्नित्या ततश्च श्रीकृष्णो नित्यगुणः वत्सलो रसज्ञः सर्वज्ञः ईश्वरः सुखरूपः धीरोदात्तादिनित्यनायकगुणवान् ततः भक्तं विना गुणाः स्वरूपं न च निर्वहति श्रीकृष्णं विना भक्तत्वं न भक्तिं विना नोभयो निर्वाह इति त्रिषु स्वातन्त्र्यं निरपेक्षगुणत्वं निरपेक्षस्वरूपं च सिद्ध्यति । परस्परसापेक्षत्वेऽपि समतैव । अन्यतरस्यानित्यत्वे त्रितयानित्यत्वं स्यात् । श्रीकृष्णस्य भक्तभक्ती भक्तस्य श्रीकृष्णो भक्तिश्च भक्तेरालम्बनौ श्रीकृष्णभक्तौ इति सर्वत्र षष्ठ्यर्थस्य गौणत्वं नित्यसिद्धस्य रसस्यावधिभूता लम्बनः श्रीकृष्णः व्रजवासिनश्च त्रितयस्याधिकरणं श्रीमधुपुरी नित्यानन्दरूपा भक्तत्र्यविभाविका । तथा श्रीनारदवाक्यं —

जिन से भक्ति प्रवृत्त होती है। जैसे सूर्य से किरण हैं। कृष्ण में परप्रीति के प्राप्त तथा नित्यानन्दादि गुणों से युक्त, मुकुन्द-सदृश, नित्यसिद्ध जानना ॥ १८ ॥

भावार्थ यह है जैसे नित्य आनन्दादिगुण स्वरूप श्रीकृष्ण हैं वैसे ही नित्य आनन्दादि गुण स्वरूप भक्त गण हैं तथा समस्तरस-वाहिनी मूर्त्तिमती नित्यगुणमयी भक्ति है। तदनन्तर श्रीकृष्ण वत्सल, रसज्ञ, सर्वज्ञ, ईश्वर, सुखमय, धीरोदात्त प्रभृति नित्यनायक गुणों से नित्यगुणयुक्त है। किन्तु उक्त गुण समूह तथा स्वरूप

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तस्मिन्वृन्दावने पुण्यं गोविन्दस्य निकेतनं ।
तत्सेवकसमाकीर्णं तत्रैव स्थीयते मया ॥
भुवि गोविन्दवैकुण्ठः तस्मिन्वृन्दावने नृप ।
यत्र वृन्दादयो भृत्याः सन्ति गोविन्दलालसाः ॥

पाद्मनिर्वाणखण्डे-नित्यं मे मथुरां विद्धि वनं वृन्दावनं तथा ।
यमुना गोपकन्याश्च तथा गोपालबालकानिति-
भगवद्वाक्यं ॥ १६ ॥

तथा श्रीभागवते—मथुरा भगवान् यत्र नित्यं सन्निहितो हरिः ॥

स्वायम्भुवागमे— पञ्चाशीतिपटले श्रीगोपालध्यानप्रस्तावे—
ततो निर्वाणपदवीं मुनीनामूर्द्ध्वरेतसां ।
स्मरेत्तु परमव्योम यत्र देवाः सनातनाः ॥
ततोऽनिरुद्धलोकं च प्रद्युम्नस्य यथाक्रमं ।
संकर्षणस्य च तथा वासुदेवस्य च स्मरेत् ॥

बिना भक्त से प्रकाशित नहीं है। तथा बिना श्रीकृष्ण से भक्तोंका भक्तत्व, और बिना भक्ति से भक्त तथा श्रीकृष्ण का निर्वाह नहीं है। इस से तीनों में स्वातन्त्र्य, निरपेक्ष गुणत्व, तथा निरपेक्षस्वरूपत्व, सिद्ध होता है। परस्पर परस्परका सापेक्ष्य है इससे समता सिद्ध हैं एक का अनित्य होने से सब अनित्य होते हैं। सो नित्य है जानना। श्रीकृष्ण का भक्त भक्ति है तथा भक्त का श्रीकृष्णभक्ति है भक्ति का आलम्बन श्रीकृष्ण तथा भक्त है। यहाँ पर षष्ठि बिभक्ति का अर्थ गौण है। नित्यसिद्ध रसका अवधिभूत आलम्बन श्रीकृष्ण तथा व्रजवासी गण है। भक्ति, भक्त, तथा कृष्ण का अधिकरण मथुरा भी नित्य आनन्द रूपा है॥ १६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ततः यमुनाध्यानमुक्ता— स्वात्मानन्दसुखोत्कर्षशब्दादिविषयात्मकं।
वृन्दावने कुसुमितं नानावृक्षविहंगमैः।
संस्मरेत्साधको विद्वान्विलासैकनिकेतनं
तत्र सिंहासने रम्ये नानारत्नमये सुखे।
धर्मार्थकाममोक्षाख्य चतुःपादै विराजिते॥
ब्रह्मविष्णुमहेशानां शिरोभूषणभूषते।
यत्र प्रेम भराक्रान्तं किशोरं पीतवाससमिति

वायुपुराणे— चत्वारिंशद्योजनानां ततस्तु मथुरा स्मृता।
यत्र देवो हरिः साक्षात्स्वयं तिष्ठति सर्वदा॥
वत्सै र्वत्सतरीभिश्च सदा क्रीडति माधवः॥२०॥

श्री भागवत में यथा—मथुरापुरी है जहाँ नित्य श्रीहरि स्थित है। स्वायम्भुवागम में ८५ पटल गोपालध्यान प्रस्ताव में कहा है कि तदनन्तर ऊर्द्धरेतस मुनियों का निर्वाण पदवी स्थान है आगे परम-व्योम धाम है जहाँ देवता गण, नित्य हैं। तदनन्तर यथाक्रम से अनिरुद्धलोक, प्रद्युम्न लोक, संकर्षणलोक, तथा वासुदेवलोक का स्मरण करे। तदनन्तर यमुना ध्यान वर्णन पूर्वक वृन्दावन का वर्णन है। स्वात्मानन्द सुख-पराकाष्ठा मय शब्दादि विषयात्मक वृन्दावन है। नाना वृक्ष तथा पक्षियों से युक्त विलास मन्दिर है। इस तरह साधक चिन्तन करे। वहाँ नाना रत्नमय सिंहासन विराजित है, धर्म्म, अर्थ, काम, मोक्ष सिंहासन के चारिपाद है। ब्रह्मा, विष्णु, महादेव के शिरोभूषण का भूषण है। जहाँ पर प्रेमाक्रांत, पीताम्बरधारी, किशोर, श्रीकृष्ण विराजित हैं।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रुतिश्च । तां वां वास्तून्यूष्मसि गमध्यै यत्र गावो भूरिशृंगा अयसाः अत्राहृ तदुरुगायस्य वृष्णः परमं पदमवभाति भूरि तां तानि-वां रामकृष्णयोः वास्तूनि लीलास्थानानि यद्वा वां श्रीराधाकृष्ण-योः तानि वास्तूनि गोकुलसम्बन्धीति वस्तूनि प्रसादत्वेन गमध्यै प्राप्तुं उष्मसि कामयामहे । तच्छब्दार्थमाह । यत्र गोकुले भूरिशृंगाः दीर्घशृंगा गावः सन्तीति शेषः कथंभूताः अयसः शुभरुपा अयः शुभावहो विधिरिति कोशः अत्र स्थाने भूमौ तत् लोकवेदप्रसिद्धं गोकुलं उरुगायस्य बहुकीर्त्तेः श्रीकृष्णस्य वृष्णः प्रियासु कामान् वर्ष-तीति वृषा तस्य षष्ठ्यां वृष्णयः तत् गोकुलपदं स्थानं भूरि अधिकतरं वैकुण्ठादपि अधिकं अवभाति प्रकाशते कीदृशं परमं प्रकृतिकाला-तीतत्वेनातिप्रियत्वेन च श्रेष्ठं ॥ तैत्तिरियकेऽपि पठ्यते । —ते ते धामान्युष्मसि गमध्ये गावो यत्र भूरिशृंगा अयासः अत्राहृतदुरु-गायस्य विष्णोः परमं पदमवभाति भूरेः ते तव ते तानि धामानि

वायुपुराण में—४० योजन परिमाण की मथुरा हैं । जहाँ श्रीहरि साक्षात् रहते हैं, वत्स, वत्सतरी प्रभृति द्वारा निरन्तर क्रीड़ा करते हैं ॥२०॥

श्रुति-हम सब रामकृष्ण के लीलास्थल किम्वा श्रीराधाकृष्ण के गोकुल सम्बन्धि वस्तुओं की प्रसन्नता पूर्वक प्राप्ति के लिये कामना करते हैं । जिस गोकुल में कल्याणरुपा दीर्घशृंग की गौं रहती हैं । इस भूमि में बहुकीर्त्ति श्रीकृष्ण के लोकवेद प्रसिद्ध प्रियाजन की कामना पूरण कारी वैकुण्ठ से भी अधिक गोकुल नामक स्थान विराजित है । जो कि प्रकृति और कालादिओं से अतीत होने से

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्थानानि कुञ्जयमुनागोवर्द्धनादीनि गमध्यै प्राप्तुं उश्मसि कामयामहे। भूरेः रासोत्सवे बहुत्वेन प्रकटितस्य। शेषं पूर्ववत् ॥ २१ ॥

पाद्मे— सत्यभामां प्रति श्रीकृष्णवाक्यं।

एते हि यादवाः सर्वे मद्गुणा एव भामिनि।
सर्वदा मत्प्रिया देवि! मत्तुल्यगुणशालिनः॥

श्रीदशमे— अहोभाग्यमहोभाग्यं नन्दगोपव्रजौकसाम्।
यन्मित्रं परमानन्दं पूर्णंब्रह्मसनातनं॥

अथोद्दीपनविलास—उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये।
उद्दीपनाश्चतुर्धास्युरालम्बनसमाश्रयाः॥
गुणचेष्टालंकृतयस्तटस्थश्चेति भेदतः॥

तथा परमप्रियता के कारण श्रेष्ठ है। तैत्तिरियकउपनिषद् में भी कहे है। हम यह यह धाम समूह प्राप्ति के लिये कामना करते हैं। जहाँ शुभरुपा, दीर्घशृंगा गौ आँ है। और जहाँ पर आप उरुगाय कृष्ण के परम स्थान समूह विराजित है। उन कुञ्ज, यमुना, गोवर्द्धन प्रभृति स्थान समूहों की प्राप्ति के लिये कामना करते हैं। यहाँ पर भूरिशब्दका अर्थ रासोत्सव में बहुरुप प्रकाशकारी आपके ॥२१॥

पद्मपुराण में सत्यभामाके लिये श्रीकृष्ण वाक्य-यथा-हे देवि! यह यादव गण मेरे सदृश गुणशालि और मेरे परम प्रिय है। श्रीदशमस्कन्ध में-श्रीनन्द, गोप तथा व्रज वासियों के अहो भाग्य हैं। जिनों के मित्र परमानन्द श्रीमाधव हैं॥ उद्दीपनविभाव- रस का उद्दीपन कारक उद्दीपनविभाव है। उद्दीपनविभाव गुण, चेष्टा, अलंकृति, तथा तटस्थ भेदसे चारि प्रकार का है और आलम्बन का

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्रालम्बनो द्विधा— श्रीकृष्णः प्रियवर्गोऽस्य श्रितास्तत्तद्रसे बुधाः।
श्रीकृष्णश्रिताः उच्यन्ते।

तत्र गुणाः— वयो रूपं च लावण्यं सौन्दर्य्यमभिरूपता।
स्मितं च सौकुमार्य्यं चेत्यालम्बनगता गुणाः॥

तत्रवयः— वयः कौमारपौगण्डकैशोरमिति तत्त्रिधा।
कौमारं पञ्चमाद्यान्त पौगण्डं दशमावधिः।
आषोडशाच्चकैशोरं कृष्णोऽयं परमावधिः॥
धर्म्म एव हि कालोऽत्र तत्तद्रूपे सहायवान्।
अन्योन्यस्य सहायत्वं न तु कारणकार्य्यता॥
वात्सल्यविषयाकारी जानीतो मधुरं रसं।
स्वस्मिंस्तथापि हानिर्हि न स्यादन्यस्य संगतः।
वात्सल्ये हि अहं मातुः पुत्रोऽपि अस्याः पतिरिति
अहं पुत्रस्य मातापि पत्युः पत्नीति नविरोधः॥२२॥

आश्रय रूप है। आलम्बन-श्रीकृष्ण आश्रित, तथा प्रियवर्ग आश्रित भेदसे दो प्रकार का है। श्रीकृष्ण प्राश्रित आलम्बन कहते हैं। वयः, रूप, लावण्य, सौन्दर्य्य, अभिरूप, स्मित, सौकुमार्य्य, आलम्बन प्राप्त श्रीकृष्ण में गुण समूह हैं। कौमार, पौगण्ड, कैशोर भेदसे वयः तीन प्रकार है। पांचसालतक कौमार, दश-वर्ष तक पौगण्ड, षोडशवर्ष पर्य्यन्त कैशोर है। कौमार पौगण्डादि हर धर्म्म में काल ही सहाय कारी है। धर्म्म तथा कालका परस्पर सहायत्व जानना। किन्तु परस्पर कार्य्य कारणता नहि जानना। वात्सल्य रस में जो मधुर रस है वो अन्य संग से जानना। जैसे मैं माता का पुत्र हो कर हुआ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्रकौमारं-- कौमारंपञ्चमाद्वान्तं त्रैविध्यं तत्प्रकीर्त्तितं ।
मुख्यं मध्यं तथान्त्यं च कार्य्यमात्रविभेदतः ।

तत्रमुख्यं-- मातुराधीनता देहे पोषणे रक्षणे सुखे ।
रोदनस्यैव मुख्यत्वं मुख्यं कौमारमीष्यते ॥

यथा- रुदन्तं सुतमादाय यशोदा गृहशंकिता ।
कृतस्वस्त्ययनं विप्रैः सूक्तैः स्तनमपाययत् ॥

मध्यं- अव्यक्तोक्ति हुं हुंकारो जानुपाणिगतिस्तथा ।
मातृहस्ते भुजं चैव कृतौ स्वातन्त्र्यमेव च ।
धूलीधूसरता ह्यंगे मध्यं कौमारमिष्यते ॥

यथा- जानुभ्यां सह पाणिभ्यां रिंगमाणौ विजह्रतुरित्यादि

चरमं- पद्भ्यां गतिरनीतिश्च मातृतः कृतिगोपनं ।
मृद्भक्षणादिभिरुचिः कौमारं चरमं स्मृतं ॥

भी इस गोपी का पति हूँ। तथा मैं पुत्र की माता होती हुई भी पति की पत्नी हूँ। यहाँ पर अन्यसंयोग से विरोध नहीं है ॥२१॥

पांच साल पर्य्यन्त कौमार है। जोकि, मुख्य, मध्य, तथा अन्त्य भेदसे तीन प्रकार है शरीर के पोषण रक्षणादिक सब माता के अधीन, तथा रोना ही जिसमें सर्वस्व यह मुख्य कौमार है। यथा।- रोता हुए पुत्र को यशोदाजी ने लेकर डरती हुई विप्रगण द्वारा वेदमन्त्र से स्वस्त्ययन पाठ कराने लगी और दुग्ध(घुटने) पान कराई। अव्यक्तवचन, हूँहूँ कार, जानुतथा हस्तोंसे गमन, माता के हाथकी अंगुली पकड़ना, कार्य्य में स्वतन्त्रता, अंगमें धूलि धुसरता प्रभृति कार्य्य विशिष्ट मध्य कौमार है। यथा।-दोनों भुजा के साथ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

यथा- वत्सान्मुञ्चन्कचिदसमये क्रोशसञ्जातहासः
स्तेयं स्वाद्वत्त्यथ दधिपयः कल्पितैः स्तेययोगैः ।
मर्कान् भोक्ष्यन् विभजति स चेन्नात्तिभाण्डं भिनत्ति
द्रव्यालाभे सगृहकुपितो यात्युपक्रोश्य तोकान् ॥
वात्सल्यरससीमा हि मुख्ये कौमार इष्यते ।
अन्यत्र गौणता ज्ञेया प्रीति स्तत्रापि वर्द्धते ॥२३॥

पौगण्डं प्रेयोरसे वक्ष्यते। अथ कैशोरं-यद्यपि किशोरे धर्म्मि धर्म्मभावो नास्ति तथापि शर्करामाधुर्य्ययोरिव गुणगुणिभावमाश्रित्योच्यते। तत्र किशोरः श्रीकृष्ण एक एव त्रैविध्यं तु लौकिककिशोरे आषोडशाब्दं कैशोरं तद्गुणान् प्रवदन्ति--यथा-

वर्णस्योज्वलता ह्यंगे नेत्रान्ते चारुणच्छविः ।
रोमावली प्रकटता कैशोरे प्रथमे सति ॥
मूर्त्तेर्मधुरमाद्यं च त्रिवले व्यंक्तिता तथा ।
आस्वादयन्ति तान्भक्ता उज्वलस्यानुवर्त्तिनः ॥

जानु दोनों से रिंगण (घुटुअंन) पूर्वक विचरण करने लगे। चरण से चलना, अनीति करना, मातासे कार्य्य का गोपन, मृद्भक्षण में रुचि प्रभृति चेष्टाशाली शेष कैशोर है। श्रीकृष्ण असमय में वत्सों को खोलना, शोते हुए बालकों को रोवाना, अपने घर किम्वा गोपीयों के घर पर छिप कर दहि खाना, बालक तथा बन्दरों को खिलाना पीछे दहिका भाण्ड फोड़ देना प्रभृति कर्म्म करने लगे॥ मुख्य कौमार में ही वात्सल्य रसकी सीमा जानना, अन्यत्र गोण है परन्तु गौण में भी प्रीति बढ़ती है॥२३॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

केचित्तूक्तानि चिन्हानि त्रिविधं योजयन्ति हि ।
त्रिधा तेनैव संप्राहुः कैशोरं लोकदृष्टितः ॥

यथा-वीक्षालकावृतमुखं तव कुण्डलश्रीगण्डस्थलाधरसुधं हसितावलोकं दत्ताभयंचभुजदण्डयुगं विलोक्य वक्षःश्रियैकरमणञ्च भवाम दास्यः ।

अथरूपं— अलकृतिरलंकार्यं येन तद्रूपमुच्यते ॥

यथा— कृष्णस्य भूषणततिर्मधुरांगमूर्त्तेः
संसर्गतो लभत पुष्पगतं हि भावं ।
तत्सेवनात्पुनरभूदपि भूषणत्वं
पश्चादगादुभयतां सखि नातिचित्रं ॥ २४ ॥

पौगण्ड अवस्था सख्यरस में वर्णन होगी । अब कैशोर वर्णन करते हैं ॥ नित्य कैशोर के कारण यद्यपि कैशोर में धर्म्मी धर्म्मभाव नही है तो भी शर्करा तथा उसके माधुर्य्य की तरह गुण गुणीभाव लेकर वर्णन करते हैं । श्रीकृष्ण नित्य एककिशोर अवस्था से युक्त है । त्रिविध भेद किन्तु व्यवहारिक किशोर अवस्था में जानना । सोल साल पर्य्यन्त कैशोर है । अब कैशोर गुणसमूह वर्णन करते हैं । अंग में वर्ण की उजलाई नेत्रसीमा में अरुण च्छवि, रोमावली की प्रकटता प्रथम कैशोर में है । उज्वलरसानुयायीभक्तगण प्रथम मूर्त्ति की मधुरिमा पीछे त्रिवली का प्रकाश आस्वादन करते हैं । कोई२ उक्त चिन्ह समूह की तीन प्रकार भेद से योजना करते हैं । इसलिये लोकदृष्टि से कैशोर के तीन भेद हैं । यथा अलक आवृत मुख, कुण्डल द्वारा शोभा प्राप्त गण्ड, अधरसुधा, हास्यावलोकन, अभयदाता भुजयुगल, लक्ष्मी की विलास

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लावण्यं ।— मुक्ताफलेषु छायायास्तरलत्वमिवान्तरं त
प्रतिभाति यदंगेषु लावण्यं यदिहोच्यते ॥

यथा ।— कृष्णस्य कोमलांगेषु दर्शनीयेषु जृम्भते ।
अमला कोमला कान्ति र्ज्योत्स्नेव प्रतिविम्बिता ॥

यथा वा ।— गोविन्दचन्द्रकान्त्या पुरतः सखि पुण्डरीकाणि ।
तपनतनूजापुलिने नलिनायन्ते विचित्रमिदं ॥

सौन्दर्य्यं ।— अंगप्रत्यंगकानां यः सन्निवेशो यथोचितं ।
सुश्लिष्टसंवन्धः स्यात्तत्सौन्दर्य्यमुदीर्य्यते ॥

यथा ।— मुखं तद्दीर्घाक्षं मरकततटीपीवरमुरो
भुजद्वन्द्वं स्तम्भद्युतिमुवलितं पार्श्वयुगलं ।
परिक्षीणो मध्यः प्रथिमलहरीहारिजघनं
न कस्याः कंसारे र्हरति हृदयं पंकजदृशः ॥

भूमि वक्षः देखकर हम सब गोपीयाँ दासी हो रही हैं। अलकांर का प्रयोग ही अलं (वृथा) उसको रुप कहते हैं। हे सखि मधुर मूर्त्ति श्रीकृष्ण के अंग में अलंकार सकल वृथा है। अलंकार समूह श्रीकृष्ण की सेवा करके अलंकार आख्या पाते हैं॥ २४॥ मुक्ताफल कान्ति की तरलत्ता की तरह अंग समूहों में जो प्रतीति है वह लावण्य है। दर्शन योग्य श्रीकृष्ण के कोमल अंग समूह दर्शन करने पर प्रतिविम्बित ज्योत्स्ना की कोमल कान्ति प्रतिति होती है। यथा वा।—हे सखि आगे जमुनापुलिन में पद्मसमूह श्रीगोविन्दचन्द्र के कान्ति से कुमुदिनी सदृश हो रहे हैं यह विचित्र है। अंग प्रत्यंगों का यथोचित सन्निवेश ही सौन्दर्य्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथावा ।— आस्यं शारद शर्वरीशसदृशं बाले विशालदृशौ

भ्राजेते भुजंगेन्द्रभोगसुख-सौभाग्यभाजौ भुजौ,

वक्षो वक्षतरं कपाटपटली शोभातिरो-स्कारिणी

तत्सौन्दर्य्य सुधानिधि र्विजयते गोविन्दचन्द्रःपुरः॥

अभिरुप्य :— यदात्मीयगुणोत्कर्षैं वस्तवन्यन्निकटं स्थितं ।

सारुप्यं नयति प्राज्ञैराभिरुप्यं तदुच्यते ॥

यथा— नोद्धवोऽण्वपि मन्न्युनो यद्गुणै र्नार्दितः प्रभुः॥

अतो मद्वयुनं लोकं ग्राहयन्निहतिस्वतु ॥ २५ ॥

अथ स्मितं— स्मितं स्वलदयदशनं दृक्पोलविकाशकृत ।

यद्वा— ईषद्विकसितैर्गण्डैः कपोलैः सौष्ठवान्वितैः ॥

यथा — खखण्डनिर्वाणरसप्रवाहै विंखण्डिताशेषरसान्तराणि

अयन्त्रितोद्वान्तसुधार्णवानि जयन्ति शीतानि तव स्मितानि॥

है। यथा कृष्णका दीर्घनेत्र विशिष्ट मुख, मरकतशिला का सदृश विस्तार वक्ष, स्थूल मरकत स्तम्भसदृश भुज युगल, क्षीणकटी, विस्तारित जंघा, देख कर कौन रमणी का हृदय हरण नहिं होता है। यथावा।— हे बाले शरच्चन्द्रमा तुल्य मुख, विशाल नेत्र, सर्प राज के शरीर तुल्य भुजा तथा कवाट समूह की शोभा तिरस्कारि वक्षः है। आज सौन्दर्य्य सागर श्रीकृष्ण आगे विराजमान है। जब आत्मसम्बन्धि गुणों से निकटस्थित वस्तु को आपना सारुप्य करते हैं विज्ञगण उसको अभिरुप्य कहते हैं। यथा।- उद्धव मेरे से अणु मात्र ही न्यूंन नहीं है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथसौकुमार्य्यं— यत्स्पर्शासहतांगेषु कोमलस्यपि वस्तुनः।
तत्सौकुमार्य्यं विख्यातं मार्दवं त्वपरं विदुः॥

यथा— यत्ते सुजातचरणाम्बुरुहं स्तनेषु
भीताः शनैः प्रियदधीमहि कर्कशेषु।
तेनाटवीमटसि तद्व्यथते न किंस्वित्
कूर्पादिभिर्भ्रमति धीर्भवदायुषांनः उत्तरार्द्धं

अथ चेष्टा— देहेन्द्रियक्रियाचेष्टा तत्तद्भावानुसारतः।
तास्तु रासदिलीला सा तथा कंसवधादिच॥ तांच
तत्तत्प्रकरणे वक्ष्यामः

अथालकृति— चतुर्द्धालंकृति र्वासो भूषामाल्यानुलेपनैः।

तत्रवासः— नारंगस्य हरिद्रागाः काश्मीरस्यापि संनिभं।
कृष्णस्य नियतं वासो न त्यागोऽस्यान्यधारणे।
युग्मं चतुष्कं षट्कं च भूयिष्टं परिकीर्त्तितं॥

तत्रयुग्मं— संव्यानं परिधानं च युग्मरुग्मुदीरितं।
भोजनादौ सुप्रसिद्धं चतुष्कं नृत्यभेदगं॥ ३६॥

दन्त का अलक्ष्य रहना नेत्र तथा कपाल का विकाश 'स्मित' है। किम्वा गण्ड का ईषत् विकास, कपोल की सौष्ठवता स्मित है यथा।—अपर्य्याप्त निर्वाण रस धाराओं से अशेष अन्यरस समूह तिरस्कारि, निरन्तर सुधासमुद्र उद्गारण शील शुभ्रवर्ण आपके स्मित समूह जय प्राप्त हो। अत्यन्त कोमल वस्तु के संलग्न से अंग की जो असह्यता है यह सौकुमार्य्य है। अपर कोई कोई मार्दव के लिये सौकुमार्य्य कहते हैं। आपके सुन्दर चरण कमल जिनको

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चतुष्कं— शिरोवेष्टनं भेदश्च द्वयं कट्याश्रयं तथा ।
उत्तरीयं तथा ज्ञेयं चतुष्कं परिकीर्त्तितं ।
भाषया काछ-चोलना-टिपारो उपरेना

षट्कं— तुन्दवन्धो धटी चेति कञ्चुकं कटिवेष्टितं ।
अंगाच्छादनकोष्णीषे लास्यादौ षट्कमीरितं ॥

यथा— अम्बरमम्ब नितम्बे लुण्ठतपुरतद्युतिप्रकटं ।
नवछवितृछवि तदुपरिदधदम्भोजलोचनो जयति ॥
पुरटवहुलशोभानिन्दिवस्त्रं नितम्बे
ह्युपरि च नवमर्कं निन्दयन्संदधानः ।
प्रतिनिधिमिव सर्वं रागकान्त्यदिवर्णां
प्रणयतु सुदृशो मेऽभीष्टपुरं मुरारिः ॥ इत्याद्यूह्य

हम सब स्तनों में धीरे से भी रखने में डरते हैं ऐसे आप मुक पादुक वन-वन में भ्रमण करते हैं। काँटे तथा तृणों से क्यों व्यथा नहीं होती, और आपही जीवन जिनके ऐसी हम सबों हृदय में क्या व्यथा नहीं होती। देह तथा इन्द्रियों के क्रिया ही चेष्टा है। रासादिलीला तथा कंसवधादिक जानना। वास, भूषा, माला, अनुलेपन भेद से अलंकृति चार प्रकार है। नारंगी के समान पीतरंग तथा काश्मीर की कान्ति के सदृश श्रीकृष्ण का वस्त्र है, और वस्तु धारण में भी परित्याग नहीं होता है। युग्म, चतुष्क, षट्क तथा भूयिष्ठ भेद से वस्त्र चार प्रकार के हैं। दो वस्त्र परिधान ही युग्म है यह भोजनादिकों में प्रसिद्ध हैं। चतुष्क नृत्यादिकों में व्यवहृत हैं ॥ २६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ भूषा द्विविधा—आकल्पं मण्डलं भूषा द्विधा सा परिकीर्त्तिता।

आकल्पं— निर्योग पाशपत्रं च लगुडं गैरिकादिकं।
शृंगवंश्यौ तथा पिञ्छं गुञ्जेत्याकल्पमिष्यते॥

निर्योगपाशोपकृतलक्षणयो विचित्र गोवत्सयोः पानबन्धनरज्जुः। गवां धर्षणार्थं पाशः यथा श्रीदशमे "निर्योगपाशकृतलक्षणयोर्विचित्रं" पत्रं वादित्रार्थं भूषणार्थं च प्रसिद्धमेव। लगुडं वेत्रं त्रिहस्तं गैरिकादिकं धारकवर्णादिप्रसिद्धमेव॥ २७॥

शृंगं— शृंगं तु माहिषं ह्याजं गावयं मार्ममित्यपि।
अग्रपश्चान्निबद्धं तु हेमरत्नैस्तु त्रिविधा॥

दो प्रकारका शिरोवेष्टन कटिवेष्टन, तथा उत्तरीय भेद से चतुष्क चारिप्रकार हैं। भाषा में क्रम से काछनी, चोलना, टिपार, उपरेना नाम से प्रसिद्ध है। तुन्दबन्ध, धटी, कञ्चुक, कटिवेष्टन, अंगाच्छादन, उष्णीष, पटूक है, लास्यादिओं में व्यवहृत है। हे अम्ब! सुवर्णकान्तिप्रकाशि वस्त्र नितम्बदेश में तथा उसके उपरान्त नवीनसूर्य्य की कान्ति के बराबर वस्त्र धारण पूर्वक कमल लोचन श्रीकृष्ण जय युक्त हो रहे हैं। आकल्प, मण्डल भेद से भूषा दो प्रकार है। निर्योग, पाशपत्र, लगुड़, गैरिकादिक, शृंग, वँशी, पिञ्छ, गुञ्जा, आकल्प है। गौओं को बान्धने के लिये पाश है। दशम में कहा कि—निर्योगपाशदिलक्षणों से विचित्र हो कर। पत्र-बजाने के लिये तथा भूषणादिओं के लिये जानना। तीन हस्त परिमाण वेत्र लगुड़ है। इषद् रक्तिमादि गुणयुक्त गैरिकादिक है॥ २७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

अथ वंशी— वंशी तु त्रिविधा प्रोक्ता मुरलीवेणुवंशिका ।

तत्रमुरली— हस्तद्वयमितायामा मुखरन्ध्रसमन्विता ।
चतुः स्वरा च्छिद्रयुक्ता मुरलीचारुनादिनी ॥

अथवेणुः— द्वादशांगुलदीर्घस्तु स्थौल्येऽ गुष्ठमितस्तथा ।
षड्भिरन्धैः सुसंवृतो वेणुरित्यभिधीयते ॥

वंशी— शिरो वेदागु लिमितं पुच्छमग लिभिस्त्रिभिः ।
नवच्छिद्रान्विता वंशी तारघोरप्रवर्त्तिका
अंगु लैः सप्तदशभिः परिच्छिन्ना बुधैर्मता ॥

अथपिच्छं— चन्द्रकध्वजदण्डैश्च स्वग्भिः पिच्छं चतुर्विधं ।
स्वतन्त्रैरन्यमिश्रैर्वा कल्पत्वे रसिकैर्मता ॥

गुञ्जाप्रसिद्धेव— "बिभ्रद्वेणुं जठरपटयोः शृ गवेत्रे च कक्षे
सर्वोदाहरणं— वामे पाणौ मसृणकवलं तत्फलान्यंगु लीषु ।
तिष्ठन्मध्ये स्वपरिसुहृदो हासयन्नर्म्मभिः स्वैः
स्वर्गेलोके मिषति बुभुजे यज्ञभुग्बालकेलिः ॥ २८ ॥

आगे तथा पीछे हेम और रत्न से खचित माहिष सम्बन्धी अज तथा गो सम्बन्धी त्रिविध शृग है । मुरली, वेणु, वंशिका भेद से वंशी तीन प्रकार है । चारि स्वर तथा चारि छिद्रों से युक्त, मुख में छिद्र विशिष्ट, दो हाथ परिमाणक मुरली है तथा सुन्दर नाद-शाली है । दीर्घ में द्वादश अंगुल, एक अंगुल स्थूल में तथा षड् रन्ध्र से युक्त वेणु हैं । शिरो भाग चारि अंगुल, पुच्छ तीन अंगुल नवछेद युक्त वंशी है तथा सप्तदश छेद से युक्त घोर शब्द शाली है। चन्द्रक, ध्वज, दण्ड, छाल से पिच्छ चतुर्विध है । वे सब स्वतन्त्र

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथा वा ।— नौमीड्य तेऽभ्रवपुषे तडिदम्बराय
गुञ्जावतंसपरिपिच्छलसन्मुखाय ।
वन्यस्रजे कवलवेत्रविषाणवेणु
लक्ष्मीश्रिये मृदुपदे पशुपांगजाय ॥

अथ मण्डनं ।— मण्डनं रत्नहेमाभ्यां वस्त्रपुष्पैश्च विरुधां ।
हारांगुलीयवलयचतुष्कीनूपुराणि च ।
किरीटकुण्डले चाथ केयूराद्यं च मण्डनं ॥

माल्यं पुष्पमालादि । अनुलेपनं चन्दनादि प्रसिद्धमेव । अथ तटस्थाः गवांक क्षेत्र तुलसी भक्तास्तच्छब्द इत्यपि । गो लिखित

तथा अन्य द्वारा मिश्रित हो कर व्यवहृत है । गुञ्जा प्रसिद्धि है । यथा ।—जठरपट में वेणु, कक्ष में शृंग तथा वेत्र, वामहस्त में अन्नग्रास अंगुलीयों में फलादि धारण पूर्वक अपने सुहृद सखा-मण्डलीओं के मध्य में विराजित हो कर नर्म्म परिहास द्वारा अपने सखा गणों का हर्ष प्रदान पूर्वक बालक्रीडा कर रहे हैं ॥ २८ ॥

हेपूज्य ! मेघ का सदृश शरीर, विद्युत वस्त्र, गुञ्जा, अवतंसतथा पिच्छादिओं से शोभितमुख वनमाला धारी कवल वेत्र-विषाण, तथा वेणु चिन्ह से शोभित, कोमल चरण पशुपालक गोपबालक आपको नमस्कार करता हुँ, रत्न तथा सुवर्णों से और वृक्षलता के छाल, तथा पुष्पों से मण्डन निर्माण होता है। हार, अगुंलीय, वलय, चतुष्की, नूपुर, किरीट, कुण्डल, तथा केयूरादि समूह मण्डन है । पुष्प माला दिक माल्य है । चन्दनादि अनुलेप है । गो चिन्ह, क्षेत्र, तुलसी, तथा भक्तसमूहों के और इन सबों के श्रवण तटस्थ है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीकृष्णपदांक श्रीमधुपुरी तुलसी भक्तानां दर्शनात्। तेषां शब्दश्रवणाच्च भक्तिरसस्योद्दीपनं भवति उदाहरणं तु प्रकटमेव विस्तरभयान्न लिख्यते ॥ २६ ॥

इति भक्तिरसतरंगिण्यां श्रीनारायण
भट्टविरचितायां भक्तिरसोद्दीपन
नाम द्वितीयोल्लासः ॥

अथ सात्विकाः— कृष्णतद्भक्तसम्बन्धाक्रान्तचित्तमिहोच्यते ।
सत्वं तत्प्रभवा ज्ञेयाः सात्विकाः सात्वतैर्मताः ॥

ततश्च भगवत्सम्बन्धविशिष्टमन्तः करणं सत्वमिति फलितोऽर्थः ।

ते च — स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभंगोऽथ वेपथुः ।
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्विकाः स्मृताः ।
ते द्विधा सुविनिर्दिष्टाः मुख्यगौणतया बुधैः ।

गो चिन्ह, श्री कृष्णचिन्ह, श्री मधुपुरी, तुलसी, तथा भक्तों के दर्शन तथा श्रवण से भक्तिरसका उद्दीपन होता है। उदाहरण स्पष्ट है। विस्तरभयसे नहि लिखे गये ॥ २६ ॥

कृष्ण तथा तद्भक्तों का सम्बन्ध से आक्रान्त चित्त सत्व है। उस से उत्पन्न सात्विक है। भगवत्सम्बन्ध विशिष्ट अन्तः करण सत्व है फलितार्थ।—स्तम्भ, स्वेद, रोमाञ्च, स्वरभगं, वेपथु, वैवर्ण्य अश्रु, प्रलय भेद से अष्ट सात्विक भाव है। फिर प्रत्येक मुख्य, गौण भेदसे द्विधा है। भक्ति में मुख्य तथा भक्तिका आभास में गौण है। ऐश्वर्याभिलाष ज्ञानियों के सदाहि भक्त्याभास जानना। सालोक्यादि मुक्तियाँ अभिलाष कारी भक्तों में सात्विकांश है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भक्तौ मुख्यस्तु विज्ञेया भक्त्याभासे गुणाः स्मृताः ।
ऐक्याभिलाषिणो ज्ञेयो भक्त्याभासः सदैव हि ।
सालोक्याद्यभिलाषे तु सात्विकांशः प्रकीर्त्तितः ॥
पूर्णः सात्विकसिन्धुस्तद्रसज्ञेष्ववतिष्टति ॥

तत्र स्तम्भः — स्तम्भश्चेष्टाप्रतीघातो हर्षामर्षविषादतः ।
भयादद्भुतादितश्चैव सिद्धसाधकयोः समः ।
अनुभावास्तु विज्ञेया स्तम्भस्यापि सुबुद्धिभिः ।
वाक्यनिर्म्माणराहित्यं शून्यता निः प्रकम्पता ॥

हर्षाद्यथा ।—यस्यानुरागप्लुतहासरासलीलावलोकप्रतिलब्धमानाः
व्रजस्त्रियो दृग्भिरनुप्रवृत्तधियोऽवतस्थुः किल कृत्यशेषा

अमर्षाद्यथा ।— यदुपतिनिन्दकवदनं पुरतः प्रसमीक्ष्य चेदिपं पार्थः ।
अतिशयरोषज्वालावलीढ़ चित्रोऽगमज्जडतां ॥ १ ॥

विषादाद्यथा— कालियवलितशरीरं धीरं नीराशयस्थितं वीक्ष्य ।
गोकुललोकाः शोकाकुलमनसस्तंभमभ्यायुः ॥

किन्तु केवल रसज्ञ भक्तों में परिपूर्ण सात्विक समुद्र जानना ॥
हर्ष, अमर्ष, विषाद, भय, तथा अद्भुत भावों से चेष्टा की प्रती
घात स्तंम्भ है । और वाक्यनिर्म्माणशून्य, शून्यता, निष्कम्प
प्रभृति अनुभाव जानना । हर्ष से तथा ।—जिनके अनुराग परिप्लुत
हास्य,रासलीला सुख नेत्र से दर्शन प्राप्त हो कर व्रजस्त्रियाँ समस्त
क्रिया से रहित हो कर बुद्धि शून्या हो गईं । अमर्ष-अर्ज्जुन ने यदु
पति निन्दक, शिशुपाल को समक्ष में देख कर अत्यन्त रोषरूपी
अग्नी से युक्त हो कर जड़ता के लिये प्राप्त हो गये ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भयाद्यथा— चाणूरमुद्धतमवेक्ष्य तदा जनित्री
कृष्णं प्रति प्रतिभटं भिदुराभमग्रे ।
पूर्वं स्वयं जड़तया परिरम्भिताभू
न्नात्मानमस्मरदथ व्यथिता भयेन ॥

अद्भुताद्यथा— मुरलीनादविनोदे विस्मितहृदया व्रजाम्बुजाक्षीयं।
निर्निमेषचक्षुर्युग्मा चित्रस्थितपुत्रिकेवासीत् ॥

अथस्वेदः— हर्षश्रमभयक्रोधैः क्लेदः स्वेद इहोच्यते ।
व्यजनग्रहणादिस्तु ह्यनुभावः प्रकीर्त्तितः ॥

अथरोमाञ्चः— रोमाञ्चो विस्मयोत्साहहर्षाद्यैस्तत्र विक्रिया ।
रोमोद्गमो भ्रमोल्लासगात्रसंस्पर्शनादयः ॥

अथस्वरभंगः— विषादविस्मयामर्षहर्षभीत्यादिसम्भवं ।
वैस्वर्यं स्वरभंगः स्यात् श्रीकृष्णरसभावगं ॥

अथवेपथुः— कृष्णतद्भक्तसम्बन्धे वित्रासामर्षहर्षतः ।
वेपथुर्गात्रकम्पः स्याद्भक्तस्यैव यथायथं ॥

आज गोकुल वासी कालियनाग से वेष्टित निराश्रय के सदृश स्थित, धीर श्रीकृष्ण को देखकर शोकाकुल स्तम्भ जडता के लिये प्राप्त हुए। कृष्ण के लिये आक्रमणशाली उद्धत चाणूर मल्ल को देखकर जनित्री देवकी पहिले से ही जड के सदृश हो गई थी। पीछे भय से व्यथित हो कर आपना के लिये भी भूल गई। मुरली शब्द विनोद में विस्मित हृदया व्रजकमलाक्षी श्रीराधा, पलक शून्य नेत्र पूर्वक चित्रस्थित प्रतिमा की सदृश हो गई। हर्ष, श्रम, भय तथा क्रोधों से शरीर का क्लेद स्वेद है तथा व्यजन ग्रहणादि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आम्नाय-ग्रन्थालय, भरतमिलाप, करौंदी वाराणसी-5

अथवैवर्ण्यं — विषादामर्षभीत्याद्यैर्वर्णान्यत्वं विवर्णता ।
तत्रानुभावा भक्तेषु कार्श्याद्याः परिकीर्त्तिताः ॥२॥

अथाश्रुः— विषादरोषहर्षाद्यैरश्रुनेत्रजलोद्गमः ।
शीतं हर्षाश्रु विज्ञेयमुष्णं क्रोधादिजं विदुः ॥
सर्वत्र नयनक्षोभरागसंमार्जनादयः ॥

अथप्रलयः— प्रलय सुखदुःखाभ्यां चेष्टा ज्ञाननिराकृतिः ।
तत्रानुभावा भक्तेषु महीनिपतनादयः ॥
अन्तः करणजन्यत्वात्सर्वे भावास्तु सात्विकाः ।
तथाप्यमीषां सत्वैकमूलत्वात्सात्विकप्रथा ।
ते भावास्तु चतुर्भेदाः कचिद्धूमायिता मताः ।
कचित्तूज्वलिता दीप्ताः कचिदुद्दीपितास्तथा ।

अनुभाव है । विस्मय, उत्साह, हर्षों से विक्रिया रोमाञ्च है, रोमोद्गम, भ्रम, उल्लास, गात्रसंस्पर्श प्रभृति अनुभाव है । विषाद, विस्मय, अमर्ष, हर्ष, भयादिकों से उत्पन्न वैस्वर्य्य स्वरभंग है । विशेष भय, अमर्ष, हर्ष से कृष्ण तथा तद्भक्त सम्बन्ध में गात्रकम्प वेपथु है । विशाद, अमर्ष भीतीओं से वर्णका अन्य प्रकार विवर्णता है कृशता प्रभृति अनुभाव भक्तों में परिकीर्त्तित है ॥ २ ॥

विषाद, रोष, हर्षादिओं से नेत्र में जलका उद्गम 'अश्रु' है । हर्षाश्रु शैत्य तथा क्रोधादि से जात 'अश्रु' उष्ण है । नयनक्षोभ, ज्वलन, तथा मार्जन प्रभृति अनुभाव हैं । सुख दुःखों से ज्ञाननिराकरण चेष्टा 'प्रलय' है । महीपतनादिक अनुभाव भक्तों में होते हैं । अन्तः करण जन्य होने से समस्त भाव सात्विक हैं । तो भी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथधूमायिता:- मिलिता स्मद्वितीया वा यत्रेषद्व्यक्तिमागताः।
अपन्होतुं हि शक्या ये ते भावा धूमसंज्ञिता:॥

अथज्वलिता:-- द्वित्रास्तु युगपद्याति प्राकट्यं सुविविक्तिमत्।
शक्याऽकृष्टेन निन्होतुं ज्वलितत्वेन कीर्त्तिता:॥

अथदीप्ता:-- चत्वार: पञ्च वा यत्र प्रौढ़ावस्थां यदागता:।
संवरीतुमशक्याश्च दीप्तास्ते परिकीर्त्तिता:॥

अथउद्दीप्ता:-- एकदा व्यक्तिमापन्नास्तम्भाद्या: सर्वएवहि।
परमोत्कर्षतां नीता उद्दीप्ता: परिकीर्त्तिता:॥३॥

अथसत्वाभासः— ब्रह्मज्ञ कर्म्मठौ श्रुत्वा श्रीकृष्णस्य विचेष्टितं।
शुष्कब्रह्मक्रियात्मानौ बिभ्रत: पुलकं बहु॥

अथनि:सत्वा:— निसर्गसाद्र्र हृदये तदभ्यासपरेऽपि च।
सत्वाभासं विनापि स्यु: काप्यश्रुपुलकादय:॥

सत्वैक मूल से सात्विक प्रथा जानना। धूमायित, उज्वलित, दीप्त, उद्दीपित भेदसे सात्विक भाव चारिप्रकार उक्त हैं। एक, किम्वा दो, भाव ईषद् प्रकाशित प्राप्त हो कर गोपन करने के योग्य हों तो यह धूमायित है। एक समय ही दो किम्वा तीन भाव प्रकाश होकर कष्ट पूर्वक गोपन न होए तो उज्वलित है। चारि, किम्वा पाञ्च, भाव प्रौढ़ा अवस्था को प्राप्त होकर, गोपन करने में अशक्त हों तो दीप्त है। समस्त सात्विक भाव एक ही समय प्रकाश हो कर परम उत्कर्षता को प्राप्त हो तो उद्दीप्त हैं॥३॥

ब्रह्मज्ञ तथा कर्म्मपटु ने श्रीकृष्ण की चेष्टा समूह शुन कर, शुष्कब्रह्म तथा क्रियाशील होने पर भी बहु पुलक समूह धारण

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अतीवमृदुतां प्राप्ताः गृहस्था अपि केच न।
श्रीरामविरहं श्रुत्वा रुदन्त्येव स्वभावतः॥
नटो भक्तिविहीनोऽपि म्रियतेऽभ्यासपटुत्वात्।
पितृरुपानुकारेण श्रीरामगमने सति॥
प्रतारकेऽपिदृश्यन्ते कम्पादया योषिदादिके।
चित्रकेतोः पुत्रनाशे यथा स्त्रीणां विचेष्टितं।

अथ प्रतीपाः— श्रीकृष्णस्यारिपक्षेषु प्रतीपाः परिकीर्तिताः।
यथा श्रीकृष्णविषयक क्रोधादिना कंसादिषु कम्पादयः॥

अथव्यभिचारिणः—विभीइत्युपसर्गौ द्वौ विशेषाभिमुखत्वयोः।
विशेषेणाभिमुख्येन चरन्ति स्थायिनं प्रति।
वागगसत्वयुक्ता ये ज्ञेया स्ते व्यभिचारिणः
सञ्चारयन्ति भावस्य गतिसञ्चारिणोऽपि ते॥४॥

करने लगे। बिना सत्वाभास से भी कहीं अश्रु पुलकादि होते हैं। कोई कोई अत्यन्त 'मृदु प्राप्त गृहस्थ गण भी श्रीरामचन्द्रजी का विरह सुनकर रोते हैं। भक्ति हीन नट भी अभ्यास पटुता वशतः मरण अवस्था प्राप्त होता है। श्रीराम जी का बन-गमन से पिता दशरथ रुप अनुकारी प्रतारक व्यक्ति में भी कम्पादि देखने में आये हैं। स्त्री आदि नाट्य कारों में भी कम्पादि भाव देखने में आये हैं। चित्रकेतु का पुत्र मरने पर जैसी स्त्रियों की चेष्टा हुई। वैरीयों में प्रतीप भाव है। जैसे श्रीकृष्ण विषयक क्रोधादि से कंस प्रभृति वैरीओं में कम्पादि भाव हैं। वि, तथा ऽभि दो उपसर्ग हैं। विशेष तथा अभिमुख से स्थायि के लिये चलते हैं तथा वागंगसत्व

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निर्वेदोऽथविषादो दैन्यं ग्लानिश्रमौ च मदगर्व्वौ ।
शंकात्रासावेगा उन्मादापस्मृती तथा व्याधिः ॥
मोहो मृतिरालस्यं जाड्यं व्रीडावहित्था च ।
स्मृतिरथ वितर्कचिन्तामतिधृतयो हर्षउत्सुकत्वञ्च ॥
औग्र्यामर्षासूयाश्चापल्यञ्चैव निद्रा च ।
सुप्तिर्बोध इतीमे भावा व्यभिचारिणः समाख्याताः॥

अथ निर्वेदः— विवेकार्त्तिप्रवासेभ्यः ईर्ष्यया च प्रकल्पितं ।
निर्वेद इति विख्यातं स्वावमाननमेव हि ॥
अत्र चिन्ताश्रुवैवर्ण्यं दैन्यनिश्वसितादयः ॥ इति॥

यथा— विना गोविन्दं ये हृतवपुरेतत्समवहन्
सखि ! प्राणान्वाणानहमिह ममावै मिहृदये ।
मुकुन्दस्येन्दुश्रीगलदमलपीयूषलहरी
परीतात्मन्येतान्नगरतरुणीनां सुखमयान् ॥

युक्त व्यभिचारि भाव है भाव का गति सञ्चारित करने से सञ्चारीभी है ॥ ४ ॥

निर्वेद, विषाद, दैन्य, ग्लानि, श्रम, मद, गर्व्व, शंका, त्रास, आवेग, उन्माद, अपस्मार, व्याधि, मोह, मृति, आलस्य, जाड्य, व्रीडा, अवहित्था, स्मृति, वितर्क, चिन्ता, मति, धृति, हर्ष, उत्सुकता, उग्रता, अमर्ष, असूया, चापल्य, निद्रा, सुप्ति, बोध, भेद से ३३ व्यभिचारि भाव हैं ।

विवेक, आर्त्ति, प्रवास, तथा ईर्ष्यादिओं में अपना अवमानना ही निर्वेद है । चिन्ता, अश्रु, वैवर्ण्य, दैन्य, निश्वसित प्रभृति अनुभाव

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथविषादः- कृष्णानवाप्तितः कृष्णकार्य्यासिद्धे विपत्तितः।
अपराधपरिज्ञानाचाप एव विषादता।
तत्र निश्वास उच्छ्वास सहायान्वेषणादयः॥ ५॥
अथदैन्यं— दुःखत्रासाऽपराधाद्यैरनोर्जित्यं तु दीनता।
चाटुमालिन्यचिन्तांगजडिमास्वान्तमन्दता।
अथग्लानिः— श्रमाधिरतितर्षाद्यैर्ग्लानिर्निः प्राणता मता।
कम्पः कार्श्यमनुत्साह वैवर्ण्यंभ्रमणादयः॥
अथश्रमः— अध्वनृत्यरतोत्पन्नः खेदः श्रम इतीर्य्यते।
अंगमर्द्दननिः श्वासौ पादसंवाहन तथा।
जृम्भणं मन्दयानं च मुखनेत्रविकूणनं।
सीत्कृतिश्चेति विज्ञेयाः अनुभावाः श्रमोद्भवाः।

इस में होते हैं। यथा हे सखि! गोविन्द के बिना मृत्यु प्राप्त शरीर का बहन वृथा है। प्राण समूह मेरे लिये बाण के तुल्य हो रहे हैं। इत्यादिक॥ श्रीकृष्ण की अप्राप्ति, श्रीकृष्ण के कार्य्य की असिद्धि, विपत्ति, तथा अपना अपराध परिज्ञानों से ताप ही विषाद है। उस में निश्वास का उच्छ्वास, अन्वेषण प्रभृति अनुभाव होता है॥ ५॥

दुःख, त्रास, अपराधादिओं से औद्धत्य न करना दीनता है। मीठी बात, मालिन्य, चिन्ता, अंगजड़ता, अन्तर में मन्दभावादि, अनुभाव है॥

श्रम, रति विलास, तथा तर्षादिसे निष्प्राणता ग्लानि है। कम्प, कृशता, निरुत्साह, विवर्णता, भ्रमणादिक अनुभाव है। मार्गगमन, नृत्य, विलासादिओं से खेद श्रम है। अंगमर्द्दन, निश्वास, पादसं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथमदः— अनंगविक्रियोद्भूतो मधुपानादिजस्तथा ।
विवेकहर आनन्दो मद इत्यभिधीयते ॥
दृष्टिः स्मेरो मुखे रागः सस्मिताकुलितं वचः ।
लुलिता विद्धगत्याद्या श्चेष्टाः स्युः पुष्टिगे मदे ॥

अथगर्व्वः— रूपयौवनसौभाग्यगुणैः कृष्णाश्रयैस्तथा ।
इष्टलाभादिना चान्यहेलनं गर्व उच्यते ।
तत्र सोल्लुण्ठवचनं लीलानुत्तरदायिता ।
स्वांगेक्षानिन्हवोऽन्यस्य वचनाश्रवणादयः ॥

अथशंका— शंका चौर्य्यापराधादेः स्वानिष्टोत्प्रेक्षणं मतं ।
अत्रास्यशोषवैवर्ण्यादिक्प्रेक्षालीनतादयः ।

अथत्रासः— त्रासस्तु चित्तविक्षेपः क्रूरसत्वादिनिस्वनैः ।
पार्श्वस्थालम्बं रोमाञ्चकम्पस्तम्भभ्रमादिकृत् ॥६॥

चाहन, जँभाई, मन्दगमन, मुख और नेत्रका सीत्कार, अनुभाव है। अनंगविकार, तथा मधुपान से विवेकहारी आनन्द 'मद' है।

श्रीकृष्णसम्बन्धि, रूप, यौवन, सौभाग्यादिगुणों से तथा इष्टलाभदिओं से अन्य का हेला करना 'गर्व' है। उच्चहास्य से बोलना, उत्तर न देना, अपना अंग दिखाना, और का गोपन, वचन न सुनना अनुभाव है। चौर्य्य, तथा अपराधों से अपना अनिष्ट देखना शंका है। जिसमें मुख शोषण, विवर्णता दिशाओं के दर्शन, छिपना अनुभाव है। दुष्ट प्राणियों के शब्दों से चित्तविक्षेप त्रास है। अनुभाव पार्श्वालम्बन, रोमाञ्च, कम्प, स्तम्भ, भ्रमणादि है ॥६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आवेगः— चित्तस्य संभ्रमो यः स्यादावेगोऽयं सचाष्टधा ।
प्रियाप्रियानलमरुत्वर्षोत्पातगजारितः ॥

अथोन्मादः— उन्मादो हृद्भ्रमप्रौढानन्दापद्विरहादिजः ।
अत्रातिहासनटनं संगीतं व्यर्थचेष्टितं ।
प्रलापधावनाक्रोशविपरीतक्रियादयः ॥

अथापस्मृतिः— धातुवैषम्यदुःखाभ्यामुद्भूतश्चित्तविप्लवः ।
अपस्मारोऽत्र पतनं धावनास्फोटनादयः ॥

अथव्याधिः— दोषोद्रेकवियोगाद्यैर्ज्वरात्मा व्याधिरत्रतु ।

अथमोहः— आपद्भीतिवियोगाद्यैर्मोहश्चित्तस्य मूढता ।
विक्रियास्तत्र विज्ञेया इन्द्रियाणां च शून्यता ॥

अथमृतिः— स्पष्टार्थः ॥

अथालस्यं:— इन्द्रियाणां तु सामर्थ्ये कृतौ विमुखता हि या ।
तृप्तिश्रमादिजनिता तदालस्यमिहेष्यते ॥

चित्तका संभ्रम 'आवेग' है। प्रियोत्थ, अप्रियोत्थ, अग्नि, पवन, वर्षा, उत्पात, गज, वैरिओं से उत्थित, आवेग अष्ट प्रकार हैं। अत्यन्त आनन्द, आपद विरहादिकों से हृदय का भ्रम उन्माद है। अतिहंसना, नृत्य, संगीत, व्यर्थ चेष्टा, प्रलाप, धावन, आक्रोश, विपरीत क्रिया अनुभाव जानना। धातुविषमता तथा दुखों से चित्तका विप्लव 'अपस्मार' है। महीपतन, भागना, आस्फोटादिक अनुभाव है। दोषों को होना तथा बियोगादिकों से उत्पन्न ज्वरादिक 'व्याधि' है। आपद, भय, वियोगादिकों से चित्त कीमूढ़ता मोह है। इन्द्रियों की शून्यता अनुभाव है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथजाड्यं:— जाड्यमप्रतिपत्तिः स्यादिष्टानिष्टार्थयोःश्रुते
दृष्टेवा विरहादेश्च क्रिया तत्रानिमेषता ॥

व्रीड़ा:— अकार्य्यकरणावज्ञा स्तुति नूतनसंगमैः ।
अधृष्टता भवेद्व्रीड़ा तत्र मौनावगुण्ठने ॥७॥

अवहित्था— अवहित्थाकारगुप्ति जैह्म्यप्राभवभीतिभिः ।
लज्जासाध्वसदाक्षिण्यप्रागल्भ्यापजयादिभिः ।

स्मृति:— स्वस्थचित्तादृढ़ाभ्याससदृशालोकनादिभिः ॥
स्मृतिः पूर्वानुभूतार्थप्रतीतिस्तत्र विक्रिया ॥
कम्पभ्रू विक्षेपादयः ॥

वितर्क:— संशयादे र्विचाराच्च वितर्कं स्तूह इष्यते ।
तत्राङ्गुलिसंचारादयः ॥

चिन्ता— इष्टवस्त्वपरिप्राप्ते रनिष्टाप्ते स्तथैव च ।
चिन्ता ध्यानमितिज्ञेयं तत्र कार्श्यादयो मताः ।

मरण-स्पष्ट है। तृप्ति तथा श्रमादिकों से इन्द्रियों के कार्य्य में समर्थ होते हुए भी न कर सकना आलस्य है। इष्टार्थ तथा अनिष्टार्थ का शुनना किम्वा दिखना, तथा विरहादिकों से अचेष्ट क्रिया जाड्य है। निमेष हीनता जिसमें अनुभाव है। अकार्य्यकरना, अवज्ञा, स्तुति तथा नवसंगमों से धृष्टता न करना व्रीड़ा है। मौन तथा नत-मुख जिस में अनुभाव है ॥७॥

जृम्भण, भय, लज्जा साध्वस, दाक्षिण्य, प्रागल्भ्य, आजय, स्थस्थचित्त, दृढ़ाभ्यास, सदृशवस्तु दर्शनादि से आकार गोपन अवहित्था है। पूर्वानुभूतार्थ प्रतीति स्मृति है। कम्प भ्रू विक्षेप जिसका

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मतिः— नानाशास्त्रार्थमथनादर्थनिर्द्धारणं मतिः ॥
धृतिः— ज्ञानविज्ञानगुर्व्वादिभक्तिनानार्थसिद्धिभिः ।
लज्जादिभिश्च चित्तस्य नैस्पृहत्यं धृतिरुच्यते ॥
हर्षः— मनः प्रासादो हर्षः स्यादत्र नेत्रास्यफुल्लता ।
उत्सुकता— कालाक्षमत्वमौत्सुक्यमिष्टवस्तु वियोगतः ।
औग्र्यं— अपराधावमानादेर्जातं चण्डत्वमुग्रता ॥
अमर्षः— अधिक्षेपावमानाद्यैः क्रोधोऽमर्ष इतीर्य्यते ॥८॥
असूयाः— परसौभाग्यसम्पत्तिविद्यासौर्य्यादिहेतुभिः ।
गुणेऽपि दोषारोपः स्यादसूया तत्र विक्रिया ॥
मुखाववर्त्तनादयः ॥

अनुभाव है । संशयादि तथा विचारों से तर्क करना वितर्क है । अंगुलि चालनादिक अनुभाव है। इष्ट वस्तु की अप्राप्ति, अनिष्टप्राप्ति से ध्यान ही चिन्ता है । कृशता प्रभृति जिस में अनुभाव है । नाना शास्त्र समूह मथन से अर्थ निर्द्धार मति है । ज्ञान, विज्ञान, गुर्व्वादि भक्ति, नानार्थ सिद्धि, लज्जादि से चित्तकी निस्पृहता धृति है । मन की प्रसन्नता हर्ष है । नेत्र तथा मुखका विकास अनुभाव है । इष्ट वस्तु के वियोग से काल व्यतीत न सहना उत्सुकता है । अपराध तथा अपमानादि से उत्पन्न चण्डभाव ही उग्रता है । अधिक्षेप तथा अवमाननादि से क्रोध होना अमर्ष है ॥ ८ ॥

दूसरे के सौभाग्य, सम्पत्ति, विद्या, सौन्दर्य्यादि दर्शन से गुण में भी दोषारोपण असूया है । मुखफिराना प्रभृति अनुभाव है । राग, द्वेषादिकों से चित्त की लघुता चापल है । अविचार, कठोरता,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चपलता:— रागद्वेषादिभिश्चित्तलाघवं चापलं भवेत् ।
अत्राविचारपारुष्यस्वच्छन्दाचरणादयः ॥

निद्रा:— मनो निमीलनं निद्रा श्रमादेः परिकीर्त्तितं ।
घूर्णादिविक्रिया ॥

सुप्तिः— उद्रेक एव निद्राया सुप्तिः स्यात्तत्र विक्रिया ।
इन्द्रियोपरति र्नेत्रमीलनं स्रन्नगात्रता ॥

बोधः— अविद्यामोहनिद्रानां ध्वंसाज्ज्ञानं प्रबुद्धता ॥ इति

त्रयस्त्रिंशत्व्यभिचारिणः यद्यप्यन्ये दृश्यन्ते मात्सर्य्यादयस्तत्प्युक्तेस्वेवांतर्भावाः ज्ञेयाः। तथाहि असूयामात्सर्य्ययो त्रासोद्वेगयोः, अवहित्थादम्भयोः, इर्ष्यामर्षयोः विवकनिर्णयोः दैन्यक्लैव्ययोः, क्षमाधृत्योः, औत्सुक्यकुतुकोत्कण्ठयोः, लज्जाविनययोः, संशयतर्कयो :धाष्टर्य्य चापलयो रैक्यं ज्ञातव्यं । एषां सञ्चारिणां मध्ये कश्च·

स्वच्छन्दाचरण प्रभृति अनुभाव हैं । श्रमादिकों से मन की निवृत्ति निद्रा है । नेत्र का मूंदजाना प्रभृति अनुभाव है । निद्राकी वृत्ति का न रहना सुप्ति है । अनुभाव इन्द्रियों का विराम, नेत्र मूंद जाना, शरीर गिरना प्रभृति हैं ॥ अविद्या, मोह, तथा निद्रादि कों का ध्वंस से ज्ञान होना बोध है । मात्सर्य्यादि और और भाव उक्त ३३ व्यभिचारिभाव के अन्तर्गत जानना । जैसे असूया मात्सर्य्य का, त्रास उद्वेग का, अवहित्था दम्भका, इर्ष्या अमर्षका, विवेक निर्णय का, दैन्य क्लैव्य का, क्षमा धृति का, औत्सुक्य कौतुक तथा उत्कण्ठा का, लज्जा विनय का, संशय तर्क का, धाष्टर्य्य चापल की एकता जानना ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चित् कश्चिद्विभावोऽनुभावश्च भवेत् यथा निर्वेदे ईर्ष्याया विभावत्व-मेवमन्यत्र तेऽपि सञ्चारिणः कुत्रचित् स्वातन्त्र्येण रतिं पुष्णन्ति कदाचित्पराधीनतया ॥६॥

अथसन्धिः— भावानां स्वतन्त्राणां मेलनं सन्धिः ।

यथा— पूतनामखिलबालकृतान्तां गोपराजगृहिणी विनिशाम्य ।
आकलय्य पुरतो विहसं तं स्वांगजं जडतया बलिताभूत् ॥

अत्रप्रियाप्रियेक्षणाज्जाड्ययोः सन्धिः । तथान्यत्र

तथाशावल्यमपि— द्वित्राणां पञ्चषाणामेकत्रमेलनं शावल्यं ।

त्रयस्त्रिंशदिमेऽष्टौ स्थायिन इत्येकचत्वारिंशद्धि श्रीकृष्णविषयिणी रतिरेव पुष्यते । क्वचित्साहजिको भावः क्वचिदागन्तुकस्तथा ।
यस्तु साहजिको भावः सव्याप्यान्तर्वहिः स्थितः ।
यत्र स्वागन्तुको भावो न विभावोऽस्ति तत्र हि ।

इन संचारि भावों में कोई किसी का विभाव तथा अनुभाव भी होता है जैसे निर्वेद में इर्ष्या का विभाव अन्यत्र सञ्चारि भाव से है । यह भाव कँही स्वतन्त्र तथा कँही परतन्त्र रति का पोषक है ॥६॥

स्वतन्त्र भावों का मिलन सन्धि है, यथा—समस्त बालक नाशिनी पूतना की बात सुनकर, तथा सामने हँसते अपने बालका को देखकर यशोदा जडता युक्ता हो गईं । यहाँ प्रिय तथा अप्रिय दर्शन से जाड्य की सन्धि है । दो, तीन, किम्वा पाँच का एकत्र मिलना शावल्य है । ये ३३ व्यभिचारि भाव तथा ८ स्थायी भाव, मिलकर ४१ अनुभाव से श्रीकृष्णविषयक रति पुष्ट होती है । इन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ततश्च सहजभावानुगता रतिः।

श्रीकृष्णविषया भक्तिरेकरूपैव सर्वदा।
आगन्तुकैर्विभावाद्यैर्विविधेव प्रतीयते।
चित्ताधीना हि भक्तिः स्याच्चित्तमेव विचार्य्यते।
चित्तं तु द्विविधं ज्ञेयं मृदुकर्कशमेव च।
कर्कशं त्रिविधं ज्ञेयं वज्रं स्वर्णं जतू तथा
पर्वताभं तृणाभं च तूलपिण्डाभमेव च।
त्रिविधं त्रिविधं ज्ञेयं कर्कशं नवधोदितं॥ १०॥
तापसे ज्ञानिनि तथा कर्म्मठेषु विविच्यतां।

अथमृदुः— अमृतं नवनीतं च मदनं त्रिविधं मृदु।
अमृतं क्षीरधिप्रायं व्रजवासिजनानुगं।

में से कोई साहजिक, तथा कोई आगन्तुक है। साहजिक भाव भीतर तथा बाहिर व्याप्त है। जो आगन्तुक भाव है उस में विभावता नहीं है। सहज भावानुगत रति ही जानना। श्रीकृष्ण विषयक भक्ति एकरूपा होती हुई भी आगन्तुक विभावादि द्वारा विविध प्रतीति होती है। भक्ति चित्त के आधीन है। इस लिये अब चित्त का विचार करते हैं। मृदु तथा कर्कश भेद से चित्त दो प्रकार है। कर्कश का भी वज्र, स्वर्ण, लाख भेद से तीन प्रकार हैं। उक्त त्रिविध भेद पर्वताभ, तृणाभ, तथा तूलपिण्डाभ भाव से फिर तीन तीन भेद है। कुल भेद कर्कश के ६ हैं॥ १०॥

तापस, ज्ञानि, तथा कर्म्मपरायणों में यह सब कर्कश जानना। अमृत, नवनीत, तथा मदन भेद से मृदु तीन प्रकार है। अमृत,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मदनं नवनीतं च द्वयं त्रिविधमीरितं ।
समुद्राभं नदीप्रायं पल्वलाभं तथैव च ।
इत्येवं स्वान्तभेदास्तु ज्ञातव्याः सद्विवेकतः ॥

अथस्थायिभावः— विरुद्धानविरुद्धान् वा भावान् यो वशतां नयेत् ।
आस्वादाकुंरकन्दोऽसौ भावः स्थायीति संमतः ॥
विरुद्धैरविरुद्धै र्वा गतैः प्राप्तै स्थापिवा ।
एकरूपेण यस्तिष्ठेत्स स्थायीति निगद्यते ॥
स्थायीभावोऽत्र कृष्णस्य भक्तिरेवाभिधीयते ।
परमानन्दसान्द्रात्मा चित्रोष्णा रतिरुच्यते ।
शीतलै र्बलवद्भावैः पुष्टा शीतायते ह्यसौ ।
सम्यक् युक्तिविशेषेण शर्करा मरिचादिभिः ।
यथा दध्यादिकं द्रव्यं षाण्डवाख्यो रसो भवेत् ।

क्षीरसागर के सदृश तथा व्रजवासी जन के अनुगत है। मदन,तथा नवनीत, दोनों-समुद्राभ, नदीतुल्य, पल्वलाभ भेद से प्रत्येक तीन प्रकार है। चित्त के भेद इस तरह सद्विवेक से जानना। अब स्थायीभाव वर्णन करते हैं। विरुद्ध तथा अविरुद्ध भाव समूहों को वश में लेने वाला आस्वादाकुंर का बीज स्थायी भाव है। विरुद्ध तथा अविरुद्ध भाव समूह प्राप्त हो कर भी जो एक रुप से ठहरता है उसको स्थायीभाव जानना। यहाँ श्रीकृष्ण की भक्ति ही स्थायी-भाव जानना। परमानन्द सान्द्ररुपा विचित्र उष्णता मयी रति है। बलवान् शीतल भाव समूह द्वारा पुष्ट हो कर शीतलता भाव को धारण करती है। जैसे दध्यादि द्रव्य शकर तथा मरिचादि द्रव्यों

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तदत्र सर्वथा साक्षात् कृष्णादयनुभवाद्भुतः ।
प्रौढानन्दचमत्कारो भक्तैः कोऽप्यनुभूयते ॥ ११॥

अंगांगित्वेन सा भक्तिः श्रीकृष्णविषया द्विधा ।
अनुभावता भवेद्यस्याः यत्र कुत्रापि भक्तिषु ।
तदंगत्वं तु विज्ञेयं तस्याश्चैव स्वभावतः ।

अनुभावत्वराहित्यमंगित्वं परिचक्षते । अयमर्थः । अंगिरूपा पञ्चधा अंगरूपा सप्तधा तथा च न कुत्रापि अंगरूपायाः अंगिनः अनुभवत्वेन प्रतीतिः । नहि हास्यरसे सख्यस्यानुभवत्वेन प्रतीतिः अंगिनि परस्परमंगांगि भावः । वत्सलादौ शान्तस्य यथा ।

अंगिनी पञ्चधा प्रोक्ता सप्तधा चांगरूपिणी ।
शान्तो रसस्तथा प्रीतः प्रेयान्वत्सल इत्यपि ।
उज्ज्वलश्चेत्यमी ज्ञेयाः उज्ज्वलः सर्वराडिति ।

से शीतल खाण्डत्र नामक (मिखरन) रस होता है । इस तरह श्रीकृष्णानुभव प्रौढानन्दचमत्कारस्वरूप हो कर भक्त जनों द्वारा आस्वादित होता है ॥११ ॥

श्रीकृष्ण विषयक यही भक्ति अंग तथा अंगी भेद से द्विविध है। जिसकी अनुभावता है सो अंग है जिसकी अनुभावता नहीं है सो अंगी है। अंगीरूपा भक्ति ५ प्रकार तथा अंगरूपा भक्ति ७ प्रकार की है। कहीं भी अंगरूपा की अनुभवता अंगी हैं। गौण हास्य रस में मुख्य सख्य रस की अनुभवता प्रतीति नहीं है किन्तु अंगीरस में परस्पर अंगांगी भाव है। जैसे वत्सलादि में शान्त का। अंगी रस पाँच है। यथा शान्त, दास्य, सख्य, वात्सल्य, मधुर।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हास्योद्भुतस्तथा वीरो रौद्रः करुण इत्यपि ।
भयानकश्च बीभत्सः सप्तैते ह्यंगतां गताः ।

अयं तु भक्तिरसः केषाञ्चिद्धृदये उदेति न सर्वस्य एक एवाखराडो रसो अंगानि तु श्रवणादीनि केषांच श्रवणादावेव रसास्वादः केषाञ्चिच्छ्रवणादिद्वारा भक्तिरसास्वादः । यथा चन्द्रे उपासकस्य देवत्वमेव चन्द्रः चन्द्रस्वरूपास्वादकस्य देवतं गुणः ॥१२॥

वैराग्यज्ञानदग्धा ये शुष्केश्वरविभावकाः ।
मीमांसकविशेषेण भक्त्यास्वादवहिः कृता ।
इत्येवं कृष्णरसिकै र्वर्त्मेकश्च वृकादिव ॥
रसः श्रीकृष्णविषयः रक्षणीयः सदैव हि ।

इनमें मधुर रस सबका राजा है । हास्य, अद्भुत, वीर, रौद्र, करुणा, भयानक, वीभत्स भेद से अंगरस ७ प्रकार का है । यह भक्तिरस कोई कोई पुण्य शीलों के हृदय में उदय होता है सबके नहीं । रस एक तथा अखण्ड है । श्रवणादि अंग हैं । किसी किसी के श्रवणादिकों में रसास्वादन किसी किसी को श्रवणादि द्वारा भक्तिरसास्वादन होता है । जैसे चन्द्र में उपासकों का देवत्व भाव ही चन्द्र तथा चन्द्र स्वरूप आस्वाद कारियों का देवत्व गुण है ॥१२॥

वैराग्य तथा ज्ञानादिकों से दग्ध, शुष्केश्वरका भावुक, कर्कश मीमांसक प्रभृति विशेष करके भक्ति आस्वादन से वहिर्मुख है इस लिये श्रीकृष्णरसिक गणों को मार्ग में चोरों से महाधन की तरह श्रीकृष्ण विषयक भक्तिरस को गोपन रखना चाहिये । अब आल-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथालम्बनसंग्रहः—शान्ते ब्राह्मण एव स्यात्प्रीते दासः प्रकीर्त्तितः।
प्रेयसि स्युः सखायोहि यशोदा वत्सले स्मृता ॥
मधुरे राधिका ज्ञेया हास्ये स्यान्मधुमगंलः।
सखीयूथोऽद्भुते ज्ञेयो वीरे चारणगोवृषाः।
करुणे वत्सवृद्धादिः जटिलाद्यास्तु रौद्रके।
गोवर्द्धनोऽभिमन्युश्च भयानक उदीरितौ।
तपस्विन्यादयो ह्यत्र वीभत्से परिकीर्त्तिताः।
व्रजस्था नियता ज्ञेया आलम्बनविभावकाः ॥१३॥

तत्र शान्तिरतिः— संकल्पेन विकल्पेन रहितं मन एव हि।
शान्तारतिरितिप्रोक्ता शमत्वेनाभिधीयते ॥
विभावैरनुभवैश्च शमिनां स्वाद्यतां गता।
स्थायी शान्ति रतिः प्राज्ञैः शान्तभक्तिरसः स्मृतः॥
उत्तमप्रकृति स्वच्छः श्रीनारायणदैवतः॥

म्बन का संग्रह कहते हैं। शान्त रस में ब्राह्मणगण, दास्य में दास गण, सख्यरस में सखागण, वत्सल में श्रीयशोदा, शृंगार में श्रीराधिका आलम्बन है। गौणरस के हास्य में मधुमगंल, अद्भुत में सखीयूथ, वीर रस में चारणगौवृष, करुणा में वत्स तथा वृद्धादि, रौद्ररस में जटिलादि, भयानकरस में गोवर्द्धन तथा अभिमन्यु, वीभत्स में तपस्विनी प्रभृति, व्रज में नित्य आलम्बन हैं ॥ १३ ॥

जटिला—श्रीराधिका की सस।
गोवर्द्धन—श्रीचन्द्रावली के विवाहित पति।
अभिमन्यु—श्रीराधिका के विवाहित पति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उक्तं च साहित्य— शान्तः शमः स्थायिभाव उत्तमः प्रकृतिर्मतः ।
दर्पणे— कुन्देन्दुसुन्दरच्छायः श्रीनारायणदैवतः ॥
प्राय आत्मसुखाक्रान्तघनीभूतं सुखं भवेत् । यत्तु
विष्णुधर्म्मोत्तरे— न यत्र दुःखं न सुखं न चिन्ता न द्वेषरागौ
न च काचिदिच्छा ।
रसः स शान्तः कथितो मुनीन्द्रैः सर्वेषु भावेषु
समप्रधानः ॥ इत्यादौ तत्तु
लौकिकसुखाद्यभावविषयं अलौकिकस्तु सुखादिवर्त्तत एव ।
तत्रालम्बनाः— श्रीकृष्ण ईश्वरत्वेन रसज्ञात्रीकृताश्च ये ।
तत्रश्रीकृष्णः— आत्मारामादयो ज्ञेया आलम्बनतयाऽत्र ते ॥
नमोऽस्तुतेऽध्यात्मपरब्रिह्मपरात्मने ह्यनात्मने स्वात्म विभक्तमृत्यवे ।
सकारणाकारणलिंगमीयुषे स्वमायया संवृतरुद्धदृष्टये ॥
सच्चिदानन्दपूर्णत्वविभुसाम्यादयो गुणाः ॥

संकल्प विकल्प से रहित मन की वृत्ति शान्त रति है तथा शम नाम से व्यवहृत है। शान्ति स्थायीरति विभाव तथा अनुभावों से शमधारियों द्वारा आस्वादित होकर शान्तभक्तिरस नाम से कथित होता है। शान्तभक्तिरस उत्तम स्वभाविक तथा स्वच्छ है। श्रीनारायण जिसके देवता हैं। साहित्यदर्पण में भी कहा है शान्तरस का शम स्थायीभाव तथा उत्तम प्रकृतिक, कुन्द तथा चन्द्र तुल्य, नारायण देवता हैं। प्राय आत्मसुख से आक्रान्त निविड़-सुख शान्तरस में है। विष्णुधर्म्मोत्तर में कहा है जहाँ न सुख, न दुःख, न चिन्ता, न द्वेष, न राग, न कोई इच्छा है मुनीन्द्रगण उसको

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथभक्ताः— अभेदोपासका केचिद्भक्तसंगेन सेवकाः ।
न मोक्षेण विना भक्तिसुखं निर्विघ्नितं भवेत् ॥
इत्येवं बुद्धियुक्ता ये त एव लम्बना मताः ॥१४॥

यथा कदा वृन्दारण्ये विपुलविटपिप्रान्त वसति
जीर्णवस्त्राच्छन्नो विहितचणकस्वादनरुचिः ।
हृदि स्मारं स्मारं सकृदपि दृगन्तांगणगतं
चिदानन्दं कृष्णं तृणमिव विनेष्ये वय इदं ॥

महापुरुषसंग तीर्थादय उद्दीपनाः रोमाञ्चादयोऽनुभावाः निर्वेद हर्षादयो व्यभिचारिणः ॥

(अथप्रीतिभक्तिरसः)

स्वोचितस्तु विभावाद्यैः प्रीतिरास्वादयतां गताः ।
प्रियानां हृदये नीता प्रीतभक्तिरसो भवेत् ॥

शान्त कहते हैं। जो लौकिक सुख-दुःख का अभाव जानना अलौकिकरस में सुखादिक अवश्य है। श्रीकृष्ण, ईश्वर हैं ऐसे कहने वाले आत्मारामगण आलम्बन विभाव हैं। श्रीकृष्ण—

सच्चिदानन्द, पूर्णत्व, विभुत्व, तथा साम्यत्व प्रभृति गुण श्रीकृष्ण के हैं। अनन्तर भक्तगणों को कहते हैं।—मोक्ष बिना भक्ति सुख निर्विघ्न से नहीं होता है, ऐसी बुद्धि रखने वाले तथा भक्तसंग से सेवक भाव प्राप्त अभेद उपासक गण आलम्बन भक्त हैं ॥ १४ ॥

यथा।—मैं कब श्रीवृन्दावन में विराज वृक्षों के निकट वास करके जीर्णवस्त्र से युक्त, चने चबा कर हृदय में नेत्र प्रांगण गत चिदानन्द श्रीकृष्ण को स्मरण करता हुआ जीवन बिताऊँगा।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रीतो भक्तिरसो द्विधा हार्देनादरतोऽपि च ।
हार्देन या रतिः कृष्णे सा स्याद्गोकुलवासिषु ॥

तत्रादरप्रीतो भक्तिरसः
प्रियाभिमानिनां कृष्णे प्रीतिरादरपूर्विका ।
भावाद्यैः पुष्यमाणेयमादरप्रीति उच्यते ॥

तत्रालम्बनाः—
श्रीकृष्णस्तत्प्रियाश्चेति ज्ञेया आलम्बना इह ।
श्रीकृष्णस्तु त्रिधा प्रोक्तो भगवान्गोकुलेश्वरः ॥
भगवत्ताविशिष्टस्तु बन्धुरित्यादिभेदतः ।
भगवन्नारदादौ तु व्रजे स्याद्गोकुलेश्वरः ।
युधिष्टिरादिभक्तेषु भगवान्बन्धुरित्यादि ॥१५॥

भगवान्कृष्णोयथा— "यस्यैकनिःश्वसितकालमथावलम्ब्य" इति ।
प्रियाअपि तथा ज्ञेयाः आश्रिताधिकृतानुगाः ॥

महापुरुषों के संग, तीर्थादि इसमें उद्दीपन भाव हैं। रोमाञ्चादिक अनुभाव तथा निर्वेद, हर्षादि व्याभिचारी भाव है। अब दास्यभक्ति-रस कहते हैं। प्रीति स्थायीभाव आत्मोचित विभावादि भावों से प्रियों के हृदय में जाकर प्रीत-भक्तिरस होता है। हार्द तथा आदर से प्रीत रस दो प्रकार का है। हार्द से जो रति उतपन्न होती है वह व्रजवासीओं में जानना। आदरयुक्त प्रीति श्रीकृष्ण में प्रियाभिमानियों के विभावादि भावों से पुष्ट होकर आदर-प्रीति-भक्तिरस होता है। श्रीकृष्ण तथा प्रियगण आलम्बन हैं। श्रीकृष्ण तीन प्रकार के हैं। भगवान; गोकुलेश्वर, भगवत्तायुक्त बन्धु भेदों से। नारदादिकों में भगवान्, व्रज में गोकुलेश्वर, युधिष्ठिरादि भक्तों में भगवान्बन्धु हैं॥ १५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्राश्रिताः— शरणाप्ता ज्ञानिचराः आश्रिताश्चेति ते त्रिधा ।
शरणाप्तः— इहलोके परत्रापि स्वसामर्थ्यं विहाय ये ।
उभयोः साधनं कृष्ण इति ते शरणागताः ॥

यथादशमे-राजानः—कृष्ण कृष्णाप्रमेयात्मन् प्रपन्नभयभञ्जन ।
वयं त्वां शरणं यामो भयभीताः पृथग्धियः ॥

तद्दूतवाक्यं च— प्रपन्ना पादमूलं ते दीनानां शं विधीयताम् ।
ज्ञानिचराः— मुमुक्षवस्तु ये पूर्वं मुमुक्षां भक्तसंगतः ।
विहाय भजनासक्तास्ते स्युर्ज्ञानिचरा इह ॥
यथा— सूत सूत महाभाग वदनो वदतां वर
शौनकादय:प्रथमे—कथां भागवतीं पुण्यां यदाह भगवान् शुकः ।
॥ इत्यादिना

मुमुक्षादिकं विहाय कथानिष्ठैव गम्यते ।

भगवान् कृष्ण यथा । —जिसके एक निश्वास के समय में ब्रह्माओं के साथ अनन्त कोटि ब्रह्माण्ड जीवित रहते हैं, ऐसे महाविष्णु जिन श्रीकृष्ण के कला विशेष हैं उन आदिपुरुष गोविन्द को मैं भजता हूँ । कृष्णप्रिय भी तीन प्रकार के हैं: आश्रित, अधिकृत तथा अनुगत । प्राप्त शरण/ज्ञानिचर भेद से आश्रित दो प्रकार है । इस लोक तथा परलोक में अपने प्राप्त बल पुरुषार्थ छोड़ कर श्रीकृष्ण ही उभय लोक के साधन हैं ऐसे मानने वाले शरणागत हैं । जो मुमुक्षुगण भक्तसंग से मुमुक्षुभाव छोड़ कर भजन में आसक्त हैं वह ज्ञानिचर हैं । यथा—शौनकादिक श्रीसूत जी से कहते हैं । हे सूत, हे भाग्यवान् हे ज्ञानिश्रेष्ठ ! वह भागवती कथा है

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथाहरिभक्तिसुधोदये-

अहो महात्मन् वहुदोषदुष्टोऽप्येकेन भात्येष भवो गुणेन ।
सत्संगमाख्येन सुखावहेन कृताद्यनो येन कृशा मुमुक्षा ।

आश्रिता द्विविधा ज्ञेया अनुगा अधिकारिणः ।
अनुगा भजनाशक्ता मुमुक्षादेरदूषताः ॥
आधिके तु नियुक्ता ये तेऽधिकारिण ईरिताः ।
प्रह्लादनारदाद्या ये तेऽनुगाः परिकीर्त्तिताः ॥१६॥
ब्रह्मरुद्रयमाद्या ये तेऽधिकारे निरुपिताः ॥

अथभगवान्बन्धुः कृष्णः ॥ यथा पृथावाक्यं ॥—

अप्यद्यनस्त्वं प्रकृते हितप्रभो जिहासि स्वसुहृदोऽनुजिविनः
येषां न चान्यद्भवतः पदाम्बुजात् परायणं राजसुयोजितांहसाम् ॥

यथा वा दशमे-- तथा मे कुरुतं कामं युवां योगेश्वरेश्वरौ ।
भोजराजकुलान्पुत्रान् कामये द्रष्टुमागतान् ॥

जिसको भगवान् शुक ने कही है। अनुग तथा अधिकारि भेदसे आश्रित दो प्रकार के हैं। मुमुक्षु आदिकों में अदूषण पूर्वक भजनासक्त अनुग तथा माधिक ब्रह्मा एडादिकों में नियुक्त अधिकारी है। प्रह्लाद, नारदादि अनुग हैं ॥ १६ ॥

ब्रह्मा, रुद्र, यम, प्रभृति अधिकारी भक्त हैं। अब भगवान्बन्धु कहते हैं। यथा दशम में पृथादेवी का वाक्य ।:—

लाल्य, गौरवयुक्त, पार्षद, अधिकारी, भृत्य, पाल्य प्रभृति प्रिय हैं। प्रद्युम्न, साम्बादि लाल्य, आहुक गौरवित, उद्धवादि पार्षद, चैत्र प्रभृति भृत्य, हैं। अधिकार पाँच प्रकार के हैं।—हस्ती, अश्व, रथ, वाहन, (शिल्प) कारव भेद से। समस्त प्रजागण पाल्य, तथा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र प्रिया— लाल्या गौरविताश्चेति पार्षदाश्चाधिकारिणः।
भृत्या पाल्याश्च ते सर्वे प्रियाह्यत्र प्रकीर्त्तिताः॥
पाल्याः प्रद्युम्नसाम्बाद्याः आहुका गौरवान्विताः।
पार्षदा उद्धवाद्याश्च भृत्या जैत्रादयः स्मृताः॥
अधिकारः पञ्चविधो हस्त्यश्वरथपत्रयः।
कारवश्च तथा सर्वे पाल्याः सर्वा प्रजाःमताः।
लाल्याः प्रद्युम्नशाम्बानिरुद्धादयः॥

यथा— स तु विस्मित उत्थाय तूर्णमन्यदगाद्गृहं।
तत्र व्याचष्ट गोविन्दं लालयन्तं शतान् शिशूनिति।

गौरवान्विता— उग्रसेना तत् सदृशवृद्धादयः।
यथा— मातामहं तूग्रसेनं यदूनामकरोन्नृपतिं।
पार्षदा उद्धवसात्यकि श्रुतदेवादयः। यथोद्धवः॥१७॥

प्रद्युम्न, साम्ब, अनिरुद्ध प्रभृति लाल्य हैं। यथा श्रीनारद जी ने विस्मय पूर्वक उठ कर अन्य गृह में जाकर वहाँ भी शत सहस्र बालकों को लालन करने वाले श्रीगोविन्द जी के दर्शन किये। गौरवान्वित भक्त उग्रसेन तथा उनके सदृश वृद्धगण हैं। यथा- मातामह उग्रसेन को यादवों का राजा बनाया। उद्धव, सात्यकी श्रुतदेवादिक पार्षदभक्त हैं॥ २७॥

ऋषी ने जो कहा हैः- आपका साचिव्यता सदैव पाती है सो ठीक है।

दारुक, जैत्र, नन्द, उपनन्द, भद्रादिक भृत्य है। यथा श्री भागवत में- अनन्तर भगवान् देवकी सुत, दारुक प्रभृति भृत्यों

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यदुक्तमृषिणा देव साचिव्यं पततस्त्वया।
कार्य्यं पैतृष्वसेयस्य रक्षा च शरणैषिणामित्यादि।

अथ भृत्याः— दारुकजैत्र नन्दोपनन्दभद्रादयः।

यथा श्री भागवते- अथादिशत्प्रयाणाय भगवान्देवकीसुतः।
भृत्यान्दारुकमैत्रादीननुज्ञाप्य गुरूनिवभुरित्यादि॥

अथाधिकारिणः—अस्त्राश्वरथपत्रयः शिल्पिनश्च। तत्तदधिकारस्थाः।

यथा— "ततोरथद्विपभट्टसादिनायकै करालयापरिवृत-
आत्मसेनया।"

अथ पाल्याः— तमुपश्रुत्य निनदं जगद्भयभयावहं।
प्रत्यु द्ययुः प्रजा सर्वाः भर्त्तृ दर्शनलालसाः।

अथ गोकुलेश्वरः- हार्दप्रीतिरसास्वादो व्रजस्थैर्दृश्यते यथा।

कृष्णः— श्री भागवतपद्येषु तद्भक्त्याश्रित चेतसा।
विलासैकनिधिः कृष्णो विलासभरलालसः।
विलासिजनसख्यश्च गोकुलेशः प्रकीर्त्तितः।

को चलने के लिये आदेश किये। अस्त्र, अश्व, रथ, वाहन, शिल्पियों के अधिकारी अधिकार भृत्य हैं। अब पाल्य कहते हैं। जगत के भय का भी भय स्वरूप उस शब्द को सुनकर प्रजा समूह स्वामी श्रीकृष्ण के दर्शन लालसा से दौड़ने लगे॥ गोकुलेश्वर श्रीकृष्ण—श्री भागवतपद्य में व्रजवासियों के जो हार्द प्रीति रस का आस्वाद दीखता है। जैसे विलास का निधि, विलास लालस, विलासिजन सखा गोकुलेश आदि प्रकीर्त्तित है यथा-कहीं विविधरंगसंगरूपा श्री राधिका से हँसते हैं। कहीं श्री राधिका से

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथा— क्वचिद्धसति राधिकां विविधरंगसंगेश्वरीं।
तया यदपि निर्जितो ललितया परं गर्वितः।
अखर्वसखीमण्डली तदनुरूपलीलां दधत्।
विनोदयति सर्वदा युवतिकादिकुञ्जेश्वरः ॥१८॥

अथ प्रिया.— आश्रिताश्च तथा लाल्याः पाल्याश्चाधिकृता अपि।
एते पञ्चविधाः प्रोक्ताः प्रिया अनुचरैः सह ॥

तत्राश्रिताः— सूतमागधवन्दिशिल्पिप्रभृतयः ॥

अथलाल्याः ।- प्रजाः प्रसिद्धा एव

अथाधिकृताः- नियतस्यैव कार्यस्य कर्त्तारोऽधिकृताः स्मृताः
ते तु द्विधा विनिर्दिष्टाः स्थावरैर्जंगमैस्तथा।
स्तानाराणां पुष्पफलादिकमेवकार्यं जंगमा छत्रादयः॥

अथानुचराः— प्रभुताज्ञानसंयुक्ताः विश्वस्ता विनयान्विताः
निदेशवशगाः सर्वे दासा ह्यत्र प्रकीर्त्तिताः।

पराजित होकर ललिता द्वारा गर्व कर रहे हैं इस प्रकार मधुर लीलाओं से कुञ्जेश्वर श्रीहरि सखीमण्डली को विनोदित कर रहे हैं ॥ १८ ॥

प्रियभक्त-आश्रित, लाल्य, पाल्य, अधिकृत, अनुचर भेद से पाँच प्रकार के हैं। सूत, मागध, वन्दि, शिल्पि प्रभृति आश्रित हैं। प्रजागण लाल्य हैं। नियत कार्य्य को करने वारे अधिकृत भक्त हैं। स्थावर तथा जंगम भेद से अधिकृत भक्त दो प्रकार के हैं। पुष्प फलादि कार्य्य का समाधान स्थावरों के द्वारा जानना, छत्रादिक जंगम हैं। स्वामीपन के ज्ञानयुक्त, विश्वासपात्र, विनय-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रसद: सारदश्चेति मधुरो वकुलस्तथा ।
आनन्दश्चन्द्रहासश्च प्रेमकन्दो बिलासवित् ।
रसालो मधुकण्ठोऽथ रक्तकः पत्रकस्तथा ।
पत्री मधुव्रतश्चेति गर्भदासा इमे स्मृताः ।
चित्तानुवर्त्तिनः केचित् केचिदाज्ञानुवर्त्तिनः ।
धूर्य्यो धीरश्च वीरश्च शूरश्चेति चतुर्विधा ।
प्रकारा नकुमारस्य शुद्धदासाः प्रकीर्त्तिताः ॥

तत्र धूर्य्यः— प्रियेषु द्वादशेष्वेव यथायोग्यं प्रवर्त्तते ।
प्रीत्या धुर्य्य इति प्रोक्तः श्रीकृष्णे प्रीतिमान्स्वतः ॥

अथ धीरः— श्रीराधाकृष्णयोः प्रौढां कृपां प्राप्य सुनिर्वृतः ।
नान्यं चापेक्षते यस्तु स धीरत्वेन संमतः ॥ ॥१६॥

परायण, आज्ञापालक समस्त दास हैं। रसद, सारद, मधुर, वकुल, आनन्द, चन्द्रहास, प्रेमकन्द बिलासवित, रसाल, मधुकण्ठ, रक्तक, पत्रक, पत्री, मधुव्रत प्रभृति जन्म से ही दास हैं। इनमें से कोई कोई चित्तानुवर्त्ती, कोई कोई आज्ञानुवर्त्ती हैं। धूर्य्य, धीर, वीर, तथा शूर भेद से श्रीनन्द नन्दन के चारि प्रकार के दासगण हैं। श्री राधाकृष्ण युगल के अत्यन्त कृपापात्र, अन्य निरपेक्षक धीर हैं ॥१६॥

श्री कृष्ण के कृपाप्रार्थी, तथा कृष्णनिष्ठा का गर्व रखने वाले, और को नहीं गिनने वाले शूर हैं। अब दशा वर्णन करते हैं। अधिकार भेद से वियोग में ताप, निरालम्बत्व, जागरण, कृशता, अधृति जड़ता, व्याधि, उन्माद, मूर्च्छा, मरण दश दशा होती हैं। ताप अंगमे,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ शूरः— श्रीकृष्णस्य कृपाकांक्षो तन्निष्ठत्वेन गर्व्वितः ।
नान्यं तु गणयेद्यस्तु स शूर इति संस्तुतः ॥
अधिकारभेदेन प्रीतरसे दशावस्थाः ॥
ताप आलम्बराहित्यं जागर्य्यं कृशता तथा ।
अधृतिर्जडता व्याधिरुन्मादो मूर्च्छनं मृतिः ॥
वियोगे तु भवन्त्येता दशावस्था अमू स्मृताः ।

तापः अंगे चित्तस्यानवस्थितिरालम्वराहित्यं जागर्य्यं प्रसिद्धमेव, कृशता तथैव, अधृतिः शरीरेन्द्रियचित्तानाम धैर्य्यं, जडता चेष्टा राहित्यं, व्याधिः प्रसिद्धः, उन्मादः भ्रमः, मूर्च्छितं मूर्च्छा, मृतिः ॥

अथ संयोगः— श्री कृष्णविषयो योगः स षोढा परिकीर्त्तितः ।
सिद्धिस्तुष्टिः स्थितिर्भोगः क्रीड़ा स्वाधीनता तथा ।

सिद्धिः— उत्कण्ठिते तु कृष्णस्य प्राप्तिः सिद्धिरिहोच्यते ।

चित्त की अस्थिरता निरालम्वत्व है। जागरण, कृशता प्रसिद्ध है। शरीर, इन्द्रिय तथा चित्त का अधैर्य्य अधृति है, चेष्टा राहित्य होना जड़ता है। व्याधि प्रसिद्ध है। भ्रम उन्माद, मूर्च्छित होना मूर्च्छ है मरना मृति है। श्री कृष्ण विषयक योग संयोग है। सिद्धि, तुष्टि, स्थिति, भोग, क्रीड़ा तथा स्वाधीनता भेद से छै प्रकार का है। उत्कण्ठा की अवस्था में कृष्ण का प्राप्त होना सिद्धि है। वियोग से पीछे प्राप्ति तुष्टि है। स्वरूप में तथा गृहादि में निवास, स्थिति है। सब प्रकार के स्वरूप तथा माधुर्य्य का आस्वाद भोग है नृत्यादिक क्रीडा है। अपनी आज्ञा के वश में रखना स्वाधीनता है ॥ २० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तुष्टि:— प्रियोगानन्तरं प्राप्तिस्तुष्टि रित्यभिधीयते ॥

स्थिति:— स्वरूपेण गृहादथ्यौ वा वास: स्थितिरिहोच्यते ॥

संभोग:— भोगः स्वरूप माधुर्यास्वाद: सर्वात्मना मत : ॥

स्वाधीनतृप्रक्रीडे— क्रीडा नृत्यादिका स्वाधीनता स्वाज्ञानुवर्त्तिता ।२०

(अथ प्रेयान्भक्तिरस:)

विभावाद्यं: सख्यरति: सखीनां चित्तसद्मनि ।
पुष्टिं नीता सख्यरस: प्रेयानित्येवमीरित: ।

तत्रालम्बना: — श्रीकृष्णस्तत्सखायश्च तस्मिन्नालम्बना मता: ।

तत्र श्रीकृष्ण: ।—श्रीकृष्णश्च द्विधा मित्रबन्धुत्वाभ्यां सखा तथा ।

श्रीकृष्णस्वरूपं ।—नवाम्बुदचयोपमः सकलमाधुरीवारिधि:
स्फुरत्पुरटचम्पकप्रकरनिन्दिपट्टाम्बर: ।
लसन्मुरलिकाधर: सखि कटाक्षसंवीक्षितो
वयस्य वरवेषया व्रजति राधयासौ व्रजं ॥

सख्य नामक स्थायी रति, सखायों के चित्त गृह में विभावादिकों से पुष्ट होकर प्रेयान्-सख्यरस, होता है। श्रीकृष्ण तथा सखा गण आलम्बन हैं। मित्र तथा बन्धु भाव से कृष्ण दो प्रकार हैं।श्री कृष्ण स्वरूप यथा—नवीनमेघ समूह से उपमाप्राप्त समस्त माधुर्य के समुद्र, खिले हुए सुवर्ण चम्पक विनन्दक पीतवस्त्र धारी, अधर में मुरली, कटाक्ष विमोहित, सखा गण द्वारा सुन्दर वेष से विभूषित श्रीकृष्ण श्रीराधिका के साथ व्रज को जा रहे हैं। वयस, वेष, विलासादिकों से तथा गुणों से भी समता प्राप्त, विश्वास से युक्त, सख्य, रतिके पात्र सखागण है जो सम, ज्येष्ठ, कनिष्ट भेद से तीन प्रकार

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ सखायः ॥—वयो वेषविलासाद्यैर्गुणैश्च समतां गताः।
विश्वासनिभृतात्मानस्तद्रतेर्मित्रतां गताः।
त्रिविधास्ते तु विज्ञेयाः समज्येष्ठकनिष्ठकैः।
तत्रापि त्रिविधा ज्ञेया वयोगुणविशेषतः।
एवं नवविधाः स्थूला सूक्ष्मभेदैस्त्वनेकधा॥

यथा- समाः वयो गुणैः १ वयसा समाः गुणै ज्येष्ठाः २ वयसा समाः गुणैः कनिष्ठा ३ वयसा गुणै ज्येष्ठाः १ वयसा ज्येष्ठाः गुणैः समाः २ वयसा ज्येष्ठाः गुणैः कनिष्ठाः३ वयसा गुणैश्च कनिष्ठा१ वयसा कनिष्ठाः गुणैः समाः २ वयसा कनिष्ठा गुणं ज्येष्ठा ३ एवं नव भेदाः॥ २१॥

यथा श्रीदशमे।— पादसम्वाहनं चक्रुः केचित्तस्य महात्मनः।
अपरे हतपाप्मानो व्यजनैः समवीजयन्॥

के हैं। तो भी वयस, तथा गुणों का विशेषता से प्रत्येक तीन प्रकार भेद से गुणित होकर स्थूल से ९ प्रकार के हैं। सूक्ष्म भेद से बहु प्रकार के जानना। वयस तथा गुण से समा १ वयस से समा गुण में ज्येष्ठ २ वयस में सम गुण में कनिष्ठ ३ वयस तथा गुण से ज्येष्ठ १ वयस से ज्येष्ठ गुण में समा २ वयस में जेष्ठ गुण में कनिष्ठ ३ वयस तथा गुण से कनिष्ठ १ वयस में कनिष्ठ गुण में सम २ वयस में कनिष्ट गुण में ज्येष्ठ ३ इस प्रकार नौ भेद हैं॥ २१॥

यथा दश में।-कोई कोई नइनीय उनकी चरण सेवा करने लगे। और निष्पाप हृदय-वीजन करने लगे। यहाँ पर चरण सम्वाहन कनिष्ठों के द्वारा तथा वीजन (वायु) सम-सखा के द्वारा जानना। ज्येष्ठों का शयन, गमनादिक लालन के अन्तर्गत है। अब वयस तथा गुण में सम कहते हैं। अत्यन्त रहस्य वार्त्ता में नियुक्त,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अन्नपादसंवाहनं कनिष्ठानां बीजनं समे, नवांगानां ज्येष्ठानां शयनगानस्य लालनान्तः पालित्वात्

अथ वयोगुण- आत्यन्तिकरहस्येषु नियुक्ता भाववेदिनः।
समाः :— तद्रसाक्रान्तमनसः सखाय समतां गताः।
सुवलोज्वलगन्धर्वाः रसदो रसविस्तथा।
ऋषभश्च विशालश्च वसन्तादयाः प्रकीर्त्तिताः॥

सख्यावधिर्यथा-राधासन्देशहारी मिलति हि सुवलः पश्य पश्यास्य कर्णे
कामांगायाश्च लेखं ह्युपहरति तथा स्तोककृष्णो रहस्ये
श्रीमालां च कण्ठे विकिरति रसदस्त रकादत्रपत्रं
हस्ते दत्ते विलासो विविधसहचरास्तन्वि तन्वन्ति सख्यं॥

अथवयसा- श्रीदामा वसुदामा च भद्रसेनोऽथ किंकिणी
गुणैर्ज्येष्ठाः— सुदामाद्या इमे गोपा गुणैर्ज्येष्ठाः प्रकीर्त्तिताः।

भावज्ञ, श्रीकृष्ण के भाव रस से आक्रान्त मन वाले सम सखा गण हैं। सुवल, उज्वल, गन्धर्व, रसद, रसज्ञ, ऋषभ, विशाल, वसन्तादिक हैं। सख्यावधि-यथा।-हे सखि देखिये देखिये राधा सन्देश वार्त्ताहारक सुवल श्रीकृष्ण के कर्ण के पास कुछ कह रहे हैं और स्तोककृष्ण रहस्य-स्थल में अनगं लेख प्रदान कर रहा है रसद श्रीमाला को कण्ठ से अर्पण तथा विलास श्रीकृष्ण के हाथ में पत्र अर्पण कर रहा है। इस प्रकार सहचर गण सख्यता विस्तार कर रहे हैं। श्रीदाम, वसुदाम, भद्रसेन, किंकिणी, सुदामादि वयस गुण से ज्येष्ठ हैं। अर्जुन, स्तोककृष्ण, दाम, भद्रक, विलासी, पुण्डरीक, विटकांत्तादि वयस में सम गुण में कनिष्ठ हैं; ॥२२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वयसा समा गुणैः- अर्जुन स्तोककृष्णश्च दामांशू भद्रकस्तथा।
कनिष्ठाः— विलासी पुण्डरीकश्च विटंकाद्यादयस्तथा।
वयः समा कनिष्ठास्तु गुणैः प्रियतमाः स्मृताः॥२२॥
वयो गुणैर्ज्येष्ठाः— वयो गुणैरधिकतां लावण्ये न्यूनतां गताः।
वात्सल्यगन्धसख्याये तेऽधिकाः परिकीर्त्तिताः।
रामश्च मण्डलीभद्रो गोभद्रोऽथ वरुथपः।
भद्रवर्द्धनभद्रांगौ विजयः सुभटस्तथा,
इमे वयो गुणै ज्येंष्ठाः गोपा अत्र प्रकीर्त्तिताः॥

सख्यं तु रक्षकाभिमानपूर्वकं।

अथ वयसा ज्येष्ठा--देवप्रस्थस्तथौजस्वी वृषभो मणिवन्धकः
गुणैः समाः— मकरन्दः कुसुमापीडो ज्येष्ठा अपि गुणैः समाः।
वयसा ज्येष्ठाः गुणैः कनिष्ठाः—भद्रवर्द्धनपद्मेन्द्रभट्टकरन्धमादयः।

वयस गुण से अधिक, लावण्य में न्यून, वात्सल्य गन्धमिश्र सखा गण अधिक से परिकीर्त्तित हैं। राम, मण्डलीभद्र, गोभद्र, भद्रवर्द्धन, भद्रांग, विजय, सुभट प्रभृति वय गुण से ज्येष्ठ हैं। रक्षकत्व अभिमान सख्य है। देवप्रस्थ, औजस्वी, वृषभ, मणिवन्धक, मकरन्द, कुसुमापीड वयस में ज्येष्ठ गुण में सम हैं। भद्रवर्द्धन, पद्मेन्द्र, भट्टकरन्धमादि वयस में ज्येष्ठ गुण में कनिष्ठ हैं। दास्य क्रिया में मुख्य, सख्यानन्द में सेवाकारी अर्जुन, कलविंकादिक कनिष्ठ है। अंशुमान, वरूथीरक प्रभृति वयस में कनिष्ठ गुण में सम तथा तेजस्वि वलोद्रेक। दक्ष वयस में कनिष्ठ गुण में ज्येष्ठ हैं सखाओं में कोई कोई सजातीयपन से कोई भिन्नता

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वयसा गुणैः कनिष्ठाः—दास्यक्रियाप्रधाना ये सख्यानन्दैकसेविनः।

अर्जुनः कलविंकाद्याः कनिष्ठाः परिकीर्त्तिताः॥

वयसा कनिष्ठाः गुणैः समाः—अंशुमान् वलवीरकादयः।

वयसा कनिष्ठाः गुणे ज्येष्ठाः—तेजस्विवलेन्द्रकादयः।

साजात्येन स्थिताः केचित्सन्मन्त्रित्वेन केचन।

वैहासकोपमाश्चान्ये हासकृत्वेन तद्गताः।

प्रागल्भ्येनार्जवेनापि ते तह्यानन्दयन्त्यमुं।

वामवक्रिमवृन्देन केचिद्विस्मापयन्त्यमुं।

केचिद्वितण्डां कुर्व्वन्ति प्रगल्भा अमुना समं।

एवं विविधरूपेण प्रकृत्या मधुरा अपि।

विशुद्धमैत्रीचरितां मुदं कृष्णस्य तन्वते॥ २३॥

अथोद्दीपनाः— विनोदनर्म्मविक्रान्तिवयोरूपादयस्तथा।

प्रियवर्गनिकुञ्जादिर्हरेरुद्दीपना मता इति।

वयः पौगण्डादि। प्रसाधनं धातुभिश्चित्रीकरणादि। नियुद्धकेलि नृत्यसर्ववीथीगमनादिचेष्टितं। मण्डनं तु वेत्रावर्णोषशाशयष्ट्यादयः

यष्टिः श्यामा त्रिहस्ता च चिवुकाश्रयरूपिणी।

मणिस्वर्णैस्तु वद्धाग्रा स्वर्णवद्धांतभागिनी॥

भाव से कोई हास्य रस प्रकाश से, कोई चतुर या सरल भाव से, कोई सरल तथा कुटिल भाव द्वारा कोई वितण्डादि द्वारा विविध भाव से श्रीकृष्ण को सुख देते हैं॥ २३॥

विनोद, परिहास, चेष्टा, वयस, रूपादिक तथा प्रियवर्ग, निकुञ्ज प्रभृति उद्दीपन हैं। पौगण्डादि वयस, धातुओं से चित्र करणादिक,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथानुभावाः— जलक्रीडा नियुद्धं च कन्दुकं द्यूतवाहकं।
पर्य्यंकासनदोलादि परीहासोऽत्र चित्रकं।
इत्यादिक्रीडनं ज्ञेयमनुभावतया हरौ ॥

सात्विकाः प्रसिद्धा एव। अथ स्थायी-गौरवाद्यविनिर्मुक्ता विस्रंभात्समयो द्वयोः ॥
सख्यं रतिः स्थायिभावः सा ज्ञेया भक्तिवत्संगैः।
इयमेव रतिः प्रयाणादिरूपा भवति ।।

अथवत्सलः ॥

विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः।
स्थायी पुष्टिमुपागम्य वात्सल्यं रस उच्यते ॥
एष वत्सलनाम्ना हि कृष्णे भक्तिरसो भवेत्।
तत्रालम्बनाः ॥—श्रीकृष्णश्च तथा वृद्धा अत्रालम्बनतां गताः॥ २४॥

प्रसाधन, युद्धक्रीडा, नृत्य, मार्ग-गमनादिक चेष्टा हैं। वेत्र, उष्णीष पाश, यष्टी प्रभृति मण्डन द्रव्य हैं। श्यामवर्ण, तीन हाथ प्रमाण, चिवुकाश्रयकर (ठोढी तक लंबी) मणि तथा सुवर्ण से जड़े हुए अग्र भाग सुवर्णमयी यष्टि हैं। जलक्रीडा, युद्ध, कन्दुक, द्यूतवाहक, पर्य्यंकासन दोलादि अनुभाव हैं। सात्विक भाव प्रसिद्ध हैं। गौरवादि कोंसे रहित विस्रंभ से दोनों की समता ही सख्यरति है। सख्यरति प्रणयादि रूप को भी धारण करती है। अथ वत्सलरस कहते हैं। वत्सलता स्थायी—विभाव, अनुभाव, सात्विक, तथा व्यभिचारी भाव से पुष्ट हो कर वत्सल नामक भक्तिरस होता है। श्रीकृष्ण, तथा वृद्धगण आलम्बन हैं ॥ २४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्र श्रीकृष्णः— तावांघ्रियुग्ममनुकृष्य सरीसृपन्तौ
घोषप्रघोषरुचिरं व्रजकर्दमेषु ।
तन्नादहृष्टमनसावनुसृत्यलोकं
मुग्धप्रभीतवदुपेयतु रन्तिमात्रोः ॥

प्रायः वात्सल्ये कुमारस्यैव प्राधान्यं ॥

अथवृद्धाः— आधिक्यरक्षकाभ्यां हि लालकत्वादिना तथा ।
रक्षकत्वाभिमानाद्यै र्वृद्धा अत्र प्रकीर्त्तिताः ॥
पितृवर्गो मातृवर्गस्तत्सख्यं ये समागताः ।
ब्राह्मणाः कुलवृद्धाश्च ते वृद्धाः परिकीर्त्तिताः ॥
नित्यसिद्धाः समाख्याताः व्रजस्था अवधिंगताः ।

अथपितृवर्गः— पितामहः पिता चापि पितृव्याश्चापिकीर्त्तिताः ।
तत्र पिता श्रीव्रजेश्वरः परमयुवा श्यामपटो गौरां-
गोन्नततुन्दिलः ।

कृष्ण तथा बलराम दोनों-चरण युगल से (घुटुअन) व्रजकर्दम में चलने लगे। कटि तथा चरणों में पहिने हुए भूषण किंकिणी के शब्द बड़े मनोहर थे। और उन शब्दों से प्रसन्न होते थे। मनुष्यों के पीछे पीछे मुग्ध की तरह दो तीन पग चल कर फिर भय से माता के निकट भागते थे। प्रायः करके वात्सल्य रस में कौमार अवस्था प्राधान्य है। अब वृद्ध कहते हैं बड़ापन तथा रक्षक भाव और पालक भाव से युक्त वृद्ध गण हैं। पितृवर्ग, मातृवर्ग, उभय के सखा गण, ब्राह्मण गण, कुलवृद्ध प्रभृति वृद्धगण जानना। यह सब व्रजस्थ सीमाप्राप्त नित्यसिद्ध हैं। पितामह, पिता, पितृ-

Dr. Urmila Sharma Collection, Varanasi

CC0: In Public Domain, Digitizagtion by eGangotri

अथमातृवर्गः— माता मातामही चैव तद्भगिन्यास्त्रयस्तथा ।
पितृव्यपत्न्यस्तागोप्यो याः पद्मजहृतात्मजाः ।

मातुः पितुः सख्यग्रामाश्च । ब्राह्मणाः द्विविधाः कुलगुरवःआश्रिताश्च । वृद्धाः कुलवृद्धा ॥ २५ ॥

अथोद्दीपनाः ॥—

वयः कौमारमेवात्र ह्यवधि परमं गताः ।
अप्राप्ये प्रापणकृतिः शैशवं चापलं तथा ।
जल्पित स्मितलीलाद्या अत्र उद्दीपना मताः ॥

अथ कौमारं ॥—कौमारं त्रिविधं ज्ञेयमवस्थाभेदमाश्रितं ।
श्रीकृष्णस्य किशोरत्वं सर्वत्रानुगतं भवेत् ॥
किशोरेनान्यगमनं धर्मधर्म्मि स्वभावतः ।

व्यगण, पितावर्ग हैं । उन में से पिता व्रजराज, परमयुत्रक श्याम वस्त्रधारी, गौरवर्ण, उन्नत-उदर युक्त श्रीनन्द हैं । माता, मातामहि, उभय की भगिनीगण, पितृव्यपत्नीगण, तथा ब्रह्माद्वारा हरे हुए पुत्रगण जिनके, मातृवर्ग हैं । ब्राह्मणगण दो प्रकार हैं । कुलगुरु गण, आश्रितगण. वृद्ध शब्द से कुलवृद्ध हैं ॥ २५ ॥

वात्सल्य रस में कौमार वयस सीमा प्राप्त है । अप्राप्य वस्तु की प्राप्ति इच्छा, शैशवता, चपलभाव, बोलना, स्मित, लीला प्रभृति उद्दीपन विभाव जानना । अवस्था भेद से कौमार त्रिविध हैं किन्तु श्रीकृष्ण को किशोर अवस्था सर्वत्र अनुगत है । यानी श्रीकृष्ण नित्य किशोर हैं । नित्यकिशोर अवस्था में रहते हुए भी और अवस्था की प्राप्ती धर्म्म धर्म्मि स्वभाव से जानना । आद्य कौमार में मध्यदेश की स्थूलता, अपांग की शुभ्रता तथा दो किम्वा तीन दाँतों

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri
आम्नाय-ग्रन्थालय,
सरस्वती निधि, करौंदी
वाराणसी

कौमार आद्यावस्था—कौमारे स्थूलता मध्ये श्वेतिमापांगयोस्तथा।
दशने द्विशिता वापि सर्वांगे व्यक्तमार्दवं॥

कौमारे मध्यावस्था—मुखारविन्दे केशान्तः कर्णयोः छिद्रिता तथा।
कलोक्तिर्नग्नता मध्ये कौमारे रिङ्गणं तथा॥

अथ चरमं॥—क्वचित्कृशं मध्यभागे वक्षसः प्रथिमा तथा।
कटीरे फणपट्टं च शिरसः काकपक्षिता।
कौमारं चरमं ज्ञेयमनुभावैस्तथापरैः।

कैशोरादिके तु अपांगयोः रक्तिमा वक्षसि तुंगत्वं रोमावलीत्यादि वत्सान्मुञ्चन्क्वचिदसमये क्रोशसंजातहास……इत्यादि बाल्यचापल्यं। अथानुभावाः पालनं हितोपदेशः आशीर्वादः लालनं, शिरोघ्राणादिकं सात्विकाः स्तन्यस्रावस्तम्भादयः। अथव्यभिचारिणः हर्षादयः॥ २६॥ इति श्रीनारायण भट्ट विरचितायां भक्तिरसतरंगिण्यां भक्तिरसप्रकाशस्तृतीयोल्लासः॥

का उठना सर्वांग में मृदुता प्रभृति होता है। मध्य कौमार में मुखारविन्द पर केश, अलक बिखरना, कानों का छिद्र वा मीठा बोलना, नग्नता, घुटवन प्रभृति है। अन्त्य कौमार में मध्यस्थल की कृशता, वक्षः का विस्तार, कमर में सर्प छाल, मस्तक में काक पक्ष प्रभृति जानना, आदि कैशोर में किन्तु अपांग की लालिमा, वक्षः की उचाई तथा रोमावली का प्रकट है "वत्स गण को असमय पर खोल देना" प्रभृति श्लोक में बाल्य चापल्य वर्णन है। पालन, हितोपदेश, आशीर्वाद, लालन, शिराघ्राणादि अनुभाव, स्तन्य क्षरण, स्तम्भ प्रभृति सात्विक भाव, तथा हर्षादिक व्यभिचा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्व मे रूपं राधे कथय रसभृंगावलिगतं
क्व ते रंगो यस्मिन्भ्रमति सदयं कृष्णहृदयं
इति भ्रामं भ्रामं भ्रमभरविविदूनो रसनिधे
भ्रमांवानैकेषीन्तव चरणसेवां शुभफलं ॥

अथ मधुरोरसः॥—विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः।
रतिः स्वादुत्वमापन्ना सैव भक्तिरसो भवेत्॥

तत्र विभावाः द्विविधाः आलम्बना उद्दीपनाश्च उद्दीपना तु वक्ष्यामः आलम्बनाश्च।-अस्मिन्नालम्बनः कृष्णः तथा तस्य च वल्लभाः।

तत्र श्रीकृष्णः॥—वर्हापीडं नटवरवपुः कर्णयोः कर्णिकारं
विभ्रद्वासः कनककपिशं वैजयन्तीञ्च मालां।
रन्ध्रान्वेणो रधरसुधया पूरयन्गोपवृन्दै
र्वृन्दारण्यं स्वपदरमणं प्राविशद्गीतकीर्त्तिः॥

की भाव जानना ॥ २६ ॥ श्रीनारायणभट्टजीविरचित भक्तिरस तरंगिणी का तृतीयोल्लास समाप्त हुआ। मधुर रस

अब मधुररस का वर्णन करते हैं। विभाव, अनुभाव, सात्विक तथा व्यभिचारी भावों से मधुरा नामक रति आस्वादको प्राप्त हो कर मधुर नामक भक्तिरस होता है। आलम्वन, उद्दीपन भेद से विभाव दो प्रकार के हैं उद्दीपन आगे कहेंगें। इस रस में श्रीकृष्ण तथा उनके प्रियागण आलम्वन हैं।

श्रीकृष्ण मयूरपुच्छ निर्म्मित शिरो भूषण, तथा नटवर वेष, कानों में कर्णिकार (पुष्प गुच्छ) गोपीगण कर्त्तृक गीतकीर्त्ति सुवर्ण सदृश वस्त्र तथा वैजयन्ती माला धारण पूर्वक अधर सुधा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तद्गुणाः॥— सुन्दरांगः किशोरश्च रुचिरो नित्यनूतनः ।
सत्कीर्त्तिर्वलवान्धीर उदारो रसवित्स्थिरः ।
मानापनोदनपटुस्तेजस्वी सर्वरञ्जकः ।
युवतीरञ्जकश्चैव वंशीनादे विशारदः ।
इत्याद्यो गुणाः ॥१॥

अथ नायकभेदाः—कृष्णश्चतुर्विधोऽसौ धीरोदात्तश्च धीरललितश्च ।
धीरप्रशान्तनामा ततश्च धीरोद्धतः ख्यातः ॥
पतिश्चोपपतिश्चैव वैशिकश्चेति स त्रिधा ।
त्रिभिश्चतुर्द्धा गुणितः कृष्णो द्वादशभेदगः ॥
अनुकूलः शठो धृष्टो दक्षिणश्चेति भेदतः ।
एतैश्च गुणितोऽष्टचत्वारिंशद्विभेदगः ॥
उत्तमो मध्यमोऽन्त्यश्च त्रिभिरेतैस्त्रिभेदितः ।
शताधिकचतुश्चत्वारिंशद्भेदैस्तु भेदितः ॥

से वेणु के छिन्द्रों को भरते हुए स्वचरण चिन्हों से प्रीति जनक वृन्दावन में प्रवेश करने लगे ।

सुन्दरांग, किशोर, रुचिशील, नित्यनूतन, सत्कीर्ति परायण, बलवान्, धीर उदार, रसज्ञ, स्थिर, मान दूर करने में चतुर, तेजस्वी, सर्वरंजक, युवतीरंजक, वंशीनाद में पण्डित प्रभृति गुण हैं ॥१॥

अब नायक भेद वर्णन करते हैं। धीरोदात्त, धीरललित, धीरप्रशान्त, धीरोद्धत भेद से श्रीकृष्ण चार प्रकार के हैं। पति, उपपति, वैशिक भेद से प्रत्येक तीन भेद गुणित होकर श्रीकृष्ण १२ प्रकार हुए हैं। फिर, अनुकूल, शठ, धृष्ट, दक्षिण भेद से प्रत्येक

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धीरोदात्तः— दयावानतिगम्भीरो विनीतः सत्यसारवान् ।
दृढव्रतस्तितिक्षावानात्मश्लाघापराङ्मुखः
निगूढाहङ्कृतिर्धीरैर्धीरोदात्त उदाहृतः ॥

यथाः—न पारयेऽहं निरवद्य संयुजां स्वसाधुकृत्यं विबुधायुषापि वः
याम्माभजन दुर्जरगेहशृङ्खलाः संवृश्च्य तद्वः प्रतियातु साधुना ।

यथा वाः— मम प्रतिभटवरदर्पहारि लीलः
शरणागतावलिरक्षणव्रतोऽसौ ।
सुरगणकृतसंस्तवेन लज्जां
वधुरिमपूरसुधाम्बुधिस्तनोति ॥२॥

अथ धीरललितः—पितृभ्यां गमितोऽत्यन्तं नैश्चिन्त्यं प्रेयसीवशः ।
विदग्धो नवतारुण्यो धीरलालित्यधर्मभाक् ॥

चार प्रकार के हैं । गुणित होकर ४८ भेद हुए हैं फिर उत्तम, मध्यम तथा अधमकनिष्ठ भेद से गुणित होकर १४४ प्रकार-नायक भेद वाले श्रीकृष्ण हुए हैं । दयावान्, अत्यन्त गम्भीर, विनीत, सत्यवान्, दृढव्रत, क्षमाशील; आत्मप्रशंसासे विरहित तथा गुप्त अहंकारयुक्त धीरोदात्त हैं । हेगोपीयों मैं नित्य सत्परायण आप सबोंका ब्रह्मा की परमायु पाकर भी प्रत्युपकार नहीं कर सकूंगा । क्योंकि आप सबों ने अच्छेद्य गृह शृङ्खला तोड़कर मुझसे प्रीति किया है ।

किम्वा—प्रतिपक्षी योद्धाओं का अभिमान चूर्ण करने वाले, शरणागत भक्तों की रक्षा में व्रती, माधुर्य्य प्रवाह के सागर श्रीकृष्ण आज देवतागण से स्तुत होकर लज्जित हो रहे हैं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृष्णसम्बन्धिनः सर्वे नित्या एव गुणामताः।
भक्तस्यैव यथाचित्तमाविर्भावो मतो बुधैः॥

सर्वरसकदम्बः श्रीकृष्णस्तत्र रसराजो मधुरोऽन्ये परिकरास्तथा गुणराजो धीरललितोऽन्ये धीरोदात्तादयः परिकराः श्रीकृष्णे तेषामाविर्भावःतत्त द्भक्तहृदयानुसारात् । एवं जातिभेदेऽपि अनुकूल एव स्वरूपं शठधृष्टदक्षिणास्तु परिकरा इत्याद्युह्यं।

यथा—नितरां शिशुभावतः पितृभ्यांमपनीत व्यवहारकृत्यभारः।
सखिभि र्विहरन्नसौ निकुञ्जे वृषभानो स्तनयामलंचकार॥

अथ धीरप्रशान्तः—नायिका तत्सहायेषु क्लेशितोऽपि समो भवेत्।
विवेचको विनीतश्च धीरशान्त उदीरितः॥

यथा—राधां वञ्जुलकुञ्जे विनिधाय (ततो)ऽन्यकुञ्जं आत्मानं।
गमयन्त्ंयपि कृष्णो नासूयामालिषु प्रापत्॥

माता पिता से अत्यन्त निश्चिन्त हो प्रियागण के वशवर्त्ती, विदग्ध, नवतरुणाई प्रभृति धर्मधीरललित में है। श्रीकृष्ण सम्बन्धी गुण समूह नित्य हैं। भक्तों के भावानुयायी हो उसका यथोचित आविर्भाव होता है।

यथा-सर्वदा शिशु भाव से माता पिता द्वारा, गृह कार्य्य तथा व्यवहार प्रभृति का भार न देनेके कारण निश्चिन्त होकर सखाओं के साथ विचरण पूर्वक श्रीराधिका को विविध भूषण से भूषित करने लगे। विचारशील, विनीत धीरशान्त नायक है। मात्सर्य्य-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ धीरोद्धतः— मात्सर्य्यवानहंकारी भानुजान्यत्र रोषणः ।
मायावी चञ्चलाश्चेति धीरोद्धत उदाहृतः ॥ ३ ॥

यथा— चन्द्रावलीबाहुलतावलम्बिनं
विधाय मद्वेशधरं कमप्यहो ।
पश्चे नयन्तीं वृषभानुनन्दिनी
नेत्रांगणं किं न जहासि जिह्मतां ।

तत्तद्वेषेण सर्वत्र प्रवेशात् । यद्यपि मात्सर्य्यादयो दोषास्तथापित । रसविशेषानुभावत्वाद्गुणा एव ॥

अथ पतिः— पतिस्तु विधिना पाणिग्राहकः कथ्यते वुधैः ।

कात्यायनि महामायेत्यादिभावापन्नकन्यानां पतिभावा ज्ञेयाः सत्यभामादिनां प्रसिद्धमेव ।

अथोपपति—ः अनुरागेण वलिना परकीयावलार्थिना ।
तदीयप्रेमजीवातुः कृष्णस्तूपपतिः स्मृतः ॥

युक्त, अहंकार रहित, अन्यत्र क्रोधप्राप्त, मायावी, चञ्चल, धीरोद्धत है ॥ ३ ॥

यद्यपि मात्सर्य्यादि, दोष हैं तो भी रस विशेष पोषण से उन्हें गुण जानना । विधिपूर्वक पाणिग्रह करने वाले पति हैं । कात्यायनि, महामाया, प्रभृति भावयुक्त कन्यायें "पतिमन्या" हैं । सत्यभामादिकों के पतिभाव प्रसिद्ध हैं । अनुराग युक्त, पररमणी इच्छुक, पररमणी प्रेम ही जिनका जीवन, सो उपपति श्रीकृष्ण जानना । गोकुलेन्द्र श्रीकृष्ण कभी मनोहर नारीवेश धारण कर कभी सुन्दर ब्राह्मण मुर्त्ति धारण कर विविध छलों से गोप स्त्रियों

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथा— युवतिसदसि नारीवेषधारी कदाचिद्
द्विजवरवरमूर्त्ति र्दीव्यति कापि कृष्णः।
इति बहुविधभावै र्गोपकान्ता किशोरीः
कलयति किल साध्वी र्गोकुले गोकुलेन्द्रः ॥

अथ वैशिकः— वेश्योपभोगचतुरो यो भवेत्सतु वैशिकः।
वैशिकत्वादिचातुर्य्यं व्रजे नैव प्रदृश्यते।
श्रीकृष्णस्य स्वरूपेऽस्य गुणत्वेन प्रवेशनात्।
जलक्रीडावृतं कापि वारमुख्यावलावृतं।
इत्यादौ द्वारकायां तु गुणत्वेन प्रदृश्यते।
चकोरैः स्वादिते चन्द्रे देवत्वं गुणतां व्रजेत् ॥४॥

अथानुकूलः— अवधीभुतया रत्या सदात्यक्तान्यनानायिकाः।
यस्य नीरवधि प्रेम स तस्यामनुकूलकः।

के दर्शन कर रहे हैं। वेश्या उपभोग में चतुर वैशिक है। व्रज में श्रीकृष्ण का वैशिकत्व नहीं है। किन्तु श्रीकृष्ण स्वरुप में प्रवेश करने से वैशिक गुण हैं। द्वारका में दृष्ट है। यथा वारमुखी अबलागण से कहीं जलक्रीड़ा कर रहे थे जैसे चकोर से स्वादित होकर देवत्व चन्द्र में गुण है ॥ ४ ॥

अत्यन्त आसक्ति से अन्य नायिका परित्याग पूर्वक एक नायिका में जिसका निरन्तर प्रेम हो वह अनुकूल है जैसे अत्यन्त आसक्ति के कारण अन्य गोपी समूह परित्याग कर केवल श्रीराधा में निरन्तर श्रीकृष्ण का अनुकूल भाव है। रसज्ञ गण श्री सीता देवी में श्रीरामचन्द्र जी का दृष्टान्त देते हैं। श्रीकृष्ण के अन्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अतिरक्तितया तस्यां सदा त्यक्तान्यनायिकः।
कृष्णोऽनुकूलो विज्ञेयो राधायामेव नित्यदा ॥
सीतायां रामदृष्टान्तो रसज्ञैर्यदुदाहृतः।
तद्वदत्रापि विज्ञेयोरतेरद्वैत दर्शनात्।
परां काष्ठां हि संप्राप्ता रतिरत्रैव दृश्यते।
विन्दुविन्दुतयान्यासु तस्मादत्रानुकूलता ॥

यथाः— सच्चातुर्य्यकदम्बचुम्बितधियो लावण्य सारोज्वला
यस्मिन्गोकुलमण्डले व्रजपतेस्तिष्ठन्ति कि नागनाः।
राधे सुन्दरताशिखामणिरसित्वं मोदनीकौमुदी
प्रेक्ष्य त्वां हि चकोरकृष्णरसिकस्त्वन्निष्ठ एवाभवत् ॥

अथ शठः— प्रियं वक्ति पुरा ह्यस्यौ शठो गूढापराधकृत् ॥

अथ धृष्टः— नेता त्यक्तान्ययुवति भोगलक्ष्मा पि निर्भयः।
वाग्भंग्या वञ्चकश्चेति धृष्टोऽयं कथितो बुधैः॥

अथ दक्षिणः— यो गौरवभयं प्रेम दाक्षिण्यं पूर्वयोषिति।
न मुञ्चत्यन्यचित्तोऽपि ज्ञेयोऽसौ दक्षिणो यथा॥

यद्वा— नायिकास्वप्यनेकासु तुल्यो दक्षिण उच्यते ॥४॥

नायिका में विन्दु भाव से आसक्ति तथा श्री राधा में परकाष्टा आसक्ति होने से अनुकूलता है। क्या श्रीवृजराजके गोकुल मण्डल में चतुरता युक्त वृद्धि, लावण्य सारता से उज्वल अन्य ललनायें नहीं हैं, हे श्री राधे तुम सुन्दरता की शिरो मन्दिर आनन्ददायिनी कौमदी हो अतः श्री कृष्ण रसिक चकोर के समान त्वन्निष्ठ हो रहें हैं। अन्तर में गूढ़ापराधकारी तथा सामने प्रियवादी शठ है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथा—— पाली तिष्ठति मल्लिकाविरचितां मालां तथा लासिका
ताम्बुलं सुविलासिका मलयजं शुद्धांगरागं तथा।
पद्मा प्रेषितपत्रिकां सुरभितां धृत्वेति विज्ञातवान्
श्रीकृष्णः प्रथमोक्तिसाध्वसमना नात्याद्रियत्कामपि ॥

अथसत्वभेदाः——

कृष्णे ह्यष्टौ समाख्याताः सत्वभेदास्तु पौरुषाः ॥
शोभा विलासो माधुर्य्यं धैर्य्यं गाम्भीर्य्यमेवच।
ललितौदार्य्यतेजांसि सत्वभेदास्तु पौरुषाः ॥

तत्र शोभा—— नीचे दयाधिके स्पर्द्धा शौर्य्योत्साहौ च दक्षता।
सत्यं प्रकटतां याति सा शोभेति प्रकीर्त्तिता ॥

शौर्य्यं सत्वसार, उत्साहः धैर्य्यं, दक्षता शीघ्रकारित्वं।

यथा—— ब्रह्मन्संत्रासमेनं त्यज नहि मशके क्रोधितामेति सिंहः।

और में चित्त लगने पर भी पूर्व रमणी में गौरव प्रेम दाक्षिण्यादिक न छोड़ने वाले दक्षिण है। किम्वा अनेक नायिकाओं में तुल्य भाव दक्षिण है।

श्रीकृष्ण में पुरुष सम्बन्धि सत्वभेद से अष्टगुण हैं। जैसे शोभा, विलास, माधुर्य्य, धैर्य्य, गाम्भीर्य्य, ललित, औदार्य्य, तेज। नीच जन में दया करने में स्पृहा, शूरता, उत्साही, दक्षता, सत्यवादिता प्रभृति गुणविशिष्ट शोभा है शौर्य्य-सत्वसार, उत्साह धैर्य्य, दक्षता शीघ्रकारित्व जानना।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किन्तु श्रीदामधाष्ट्र्य प्रवदति परमामप्यबाधेऽपिलज्जां।
तत्राप्येनं दवाग्ने पिहितनयनतां कारयन्गर्वभंगं
कुर्वन्नन्द्रीन्द मिन्द्रप्रमदविनशनश्चादधे हंसलीलं ॥

अथविलासः— वृषभस्येव गम्भीरो गतिर्वीरं च दर्शनं।
सस्मितश्च वचो यत्र स विलास इतीर्य्यते॥

यथा— गजवरगति रद्य कानना्लीं
कमलदलेक्षण ईक्षमाण एषः।
विलसति पुरतो विलासशाली
त्रिभुवनसुन्दरतासमुद्रचन्द्रः॥६॥

तन्माधुर्य्यं— लोलाक्षीणां रसनिधिदृशां कश्चमत्कारकारी
वृष्या गत्या विविधवचसा वञ्चरूयापि रीत्या
कृष्णस्यैवं स्मितपरिमलैरुर्जितोऽसौप्रमोद
स्तुंगे गोष्ठस्थलपरिसरे राधया तर्कितोऽभूत्॥

वृषभके सदृश गम्भीर गमन, धीर-दृष्टि, मन्दहास्य वाणी, विलास हैं यथा।- त्रिभुवन सुन्दरता रूपी सागर से उत्थित श्रीकृष्ण रूपी चन्द विलासी सम्मुख में विलास कर रहे हैं। गजश्रेष्ठ का गमन है जिसमें, तथा कमल नेत्र से कानन समूह को देख रहे हैं॥ ६॥

वृषभ सदृश गमने से, सब के वञ्चन शाली विविध वचन से तथा स्मित परिमल से अत्यन्त उर्जित यह कौन है। जो कि रस-समुद्र दृष्टि परायण, चञ्चलाक्षियों को आश्चर्यकारी है। इस प्रकार उच्च गोष्ट स्थल प्रान्त में श्रीराधा द्वारा श्रीकृष्ण तर्कित हुए थे।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वञ्चनक्रिययापि प्रमोदः । कः ममापि चमत्कारीति सखीं प्रत्युक्तिः

अथ धैर्य्यं— कार्य्यादचलनं विघ्नैर्धैर्य्यमाहुर्मनीषिणः ।

अथ गाम्भीर्य्यं— मनसः क्षोभराहित्यं गाम्भीर्य्यं तदुदाहृतं ॥

अथ ललितं— शृंगारप्रचुरा चेष्टा यत्र तं ललितं विदुः ॥

यथा— अरिष्टेन व्यग्रे विविधकटुपाकं हि मिलिते
तथाप्यग्रे कृष्णः कलयति रसाडम्बरघटां ।
अहो राधा कण्ठे सुभगसुमनो राजिरचिता
मुदं चन्द्रोमांचो विरचयति मालां मुररिपुः ॥

अथौदार्य्यं— आत्मना सह सर्व्वस्वं देयमौदार्य्यमुच्यते ॥

अथतेजः— तेजस्वित्वमवज्ञादेरसहिष्णुत्वमुच्यते ॥

अथसहायाः ॥

सखा विदूषकश्चेटः पीठमर्द्दो विटस्तथा ।
सहायाः पञ्चधा ज्ञेयास्तत्तद्भेदैस्त्वनेकधा ॥

तत्रसखा— त्रिविधोऽपि वयोगुण सम सुवलादिः ॥ ७ ॥

यहाँ पर छलना करने में भी आमोद दायीक, मुझ को अचंभित आने वाले ये कौन है । यह सखी के प्रति श्रीराधिकाजी ने कहे हैं। अत्यन्त विघ्नों के कारण से भी कार्य्य से नहीं हटना 'धैर्य्य' है। मनका क्षोभ राहित्य गाम्भीर्य्य है। जहाँ शृंगार प्रचुर चेष्टा हैं उसको ललित कहते हैं। आत्मा के साथ सर्वस्व देना औदार्य्य है। अन्य की अवज्ञा न सहना तेज है। अब सहाय कहते हैं। सखा, विदूषक, चेट, पीठमर्द्द, विट भेद से पाँच प्रकार हैं। प्रत्येक भेद से अनेक प्रकार हैं ॥ ७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथा— द्यूतोद्भूतकलेः प्रसाद्य युवतीं क्रोधाद् प्रस्थितां
प्रत्यावर्त्त्य तथा करोत्यविरलं कामस्य चोद्दीपिकां।
मालां खिन्नतनुं रतान्तमिलितं विश्रामयन्केशवं
कुत्रायं सुवर्त्तोऽधिकारपदवीं नागामिसेवाविधौ।

अथविदूषकः— विकृतांगवचो वेषै र्हास्यकारी विदूषकः।
भोजने कलहे प्रीतो वसन्तादिः प्रकीर्त्तितः।

अथचेटः— सन्धानचतुरश्चेटो गूढ़कर्म्मा प्रगल्भधीः।
भृंगारो भगुंरादिश्च प्रसिद्धि गोकुले गतः॥

अथपीठमर्दः— सर्वांशे नायकसमः प्रेम्णैवानुगतो हि सः।
पीठमर्द्दः स कथितः श्रीदामादिश्च गोकुले॥

अथविटः— विटोपचारचतुरो धूर्त्तो गोष्ठीविशारदः।
कामतन्त्रकलावेदी विट इत्यभिधीयते॥

सुरत द्यूतक्रीड़ा की कलह से रोष पूर्वक गृह को प्रस्थान कारिणी युवती को प्रसन्न कर श्रीकृष्ण के पास लौटा दिया है तथा स्वयं कामोद्दीपक माला को बनाने लगा। और क्रीड़ा से श्रान्त तथा खिन्नतन श्रीकृष्ण को विश्राम कराने लगा। इस प्रकार उसे समस्त सेवा में अधिकार प्राप्त हुआ है। विकृत अंग तथा विकृत वचनकारी और हास्यशील, भोजन तथा कलह में प्रसन्न परायण वसन्तादिक विदूषक हैं। सन्धान कर्म्म में चतुर, गूढ़कर्म्मी, प्रगल्भवुद्धिशील-भृंगार भंगुरादिक व्रज में चेट हैं। सर्वांश में नायक तुल्य, प्रेम से अनुगत, श्रीदामादिक गोकुल में पीठमर्द कहे गये हैं। वेश्यानुकूल उपचार में चतुर, धूर्त्त, गोष्ठी में पण्डित,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तेषां गुणाः— देशकालज्ञता भाषामाधुर्य्यं च विदग्धता।
प्रोत्साहने कुशलता यथोक्तकथनं तथा।
निगूढमन्त्रता चेति सहायानामिमे गुणाः ॥८॥

यथा— योषिद्वेषवतामुनः रतिकलालुब्धेन राधागृहे
होलीपर्वणि शर्व्वरीमुखमियं नीताधुना नागतः।
इत्थं गोपविटैः शुभैरमिहिता गार्गीपुरार्चाघटी
हानिव्याजरुषा समस्तललनामध्याद्धरिं प्रापयत् ॥

अथ श्रीकृष्णवल्लभाः ॥

कृष्णसाधारणगुणैरुपेताः कृष्णवल्लभाः।

ततश्च श्रीकृष्णसाधारणगुणं बिना नायकात्वं न सिध्यति। सिद्धे नायिकात्वे समत्वं समत्वे सर्वासां श्रीकृष्णस्यावतारत्वं तद्वल्लभानामवतारत्वमिति एवं सर्वाजम्बनमिति वस्तुनस्तु रसविचारेन श्रीकृष्णस्यावतारित्वं मधुररसेऽवतारित्वस्था प्रवेशात् पूर्ण-

---

कामकलाभिज्ञ विट है। देश काल पात्रज्ञता, मधुरभाषणता, कर्म्म में चतुरता, उत्साह देने में कुशलता, यथा यथ कहना, गुप्त मन्त्रणा करना सहायकारियों का गुण समझ जानना ॥ ८ ॥

यथा—श्रीकृष्ण ने योषिद् वेश धारण पूर्वक रतिकेलि में लुब्ध हो कर इस होलिका पर्व में राधिका के गृह में रात बितायी। अब तक यहाँ पर नहीं आया। गार्गी ने इस प्रकार कह कर गोपबालक गण द्वारा देव पूजा के महूर्त्त की हानि का छल से क्रुद्ध हो कर श्रीकृष्ण को गोपस्त्रीओं के बीच में लाइ है। अब कृष्ण-वल्लभागण वर्णन करते हैं। श्रीकृष्ण के साधारण गुण समूह

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्यापकत्वादिवत्। ततश्च कृष्णस्य प्रियवर्गाणां च रसप्रवर्त्तकत्वमेवावतारित्वं न त्वैश्वर्य्येण ॥

अथ सामान्यतः नायिकानां निरूपणं।

स्वकीया परकीया च सामान्या नायिका त्रिधा।
स्वकीया त्रिविधा ज्ञेया प्रौढा मुग्धा च मध्यमा ॥६
धीराधीरा च धीराधीरा चेति भेदतः।
प्रौढा मध्या त्रिधा भिन्नाषट् भेदा उभयो मताः।
ज्येष्ठाकनिष्ठाभेदेन द्वैविध्य च ततः परं ॥
त्रयोदश विधा स्वीया मुग्धया सह कीर्त्तिता।
उत्तमाधममध्यैः सा त्रिशन्नवभिदां गता।
द्वादशत्रिशती स्वीया स्वा एडसादच्यष्टभेदतः ॥

से युक्त कृष्ण वल्लभा हैं। श्रीकृष्ण के बिना साधारण गुणों से नायिकात्व सिद्ध नहीं है। नायिकात्व सिद्ध होने से समान है। समानत्व सिद्ध होने पर वल्लभा गण श्रीकृष्ण के अवतार हुए है। वास्तविक रस विचार में श्रीकृष्ण का अवतारीत्व सिद्ध है मधुर रस में अवतारीत्व अन्तः प्रवेश का कारण से जैसे पूर्ण व्यापकत्वादि गुण श्रीकृष्ण में प्रवेश होते हैं। इसलिये श्रीकृष्ण तथा प्रियवर्ग समूह का रस कारण से अवतारित्व है किन्तु ऐश्वर्य्य कारण से नहीं है। अब सामान्य प्रकार से नायिका निरूपण करते हैं। नायिका स्वकीया, परकीया तथा सामान्या भेद से पहिले तीन प्रकार है। फिर प्रौढा, मुग्धा, मध्यमादि भेद से स्वकीया त्रिविध है ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परकीया द्विधा कन्या विवाहिता । विवाहिता पूर्ववत् त्रयोदशधा एवं च कन्यया चतुर्दशधा ततश्चोत्तमादित्रिभेदैः द्विचत्वारिंश द्विद्विधा ततः खण्डितादष्टभेदैः त्रिशतृषट् त्रिशत् द्विधा । एवं परकीयावत् सामान्यापि ततश्च सामान्यतः चतुरशीत्यानवशतापि भेदाः ज्ञेयाः । तत्र द्वारकायां स्वकीयासामान्ययोः प्रसिद्धिः दशमे वारमुख्यावला-वृतमित्यत्र कश्चिदोकुलकन्यासु श्रीकृष्णे पतिभावना तासां स्वकीयता सिद्धिरर्चनादेव निश्चिता ॥

अथपरकीया— परकीया द्विधा ज्ञेया कन्योढा चेति भेदतः ।
रसस्य परमाकाष्ठा सुस्थिरात्रैव संमता ॥
अन्यथा निर्गुणत्यागी शुकः किमिति वर्णयेत् ॥

धीरा, अधीरा, धीराधीरा भेद से प्रौढा और मध्या दोनों के ६ भेद हैं । प्रत्येक फिर ज्येष्ठा कनिष्ठा भेद से द्विविध है । कुल मुग्धा के साथ स्वकीया १३ प्रकार हुए हैं । प्रत्येक उत्तम, अधम, मध्यम भेद से ३९ प्रकार तथा खण्डितादि आठ प्रकार से गुणित होकर ३१२ प्रकार स्वकीया भेद है । परकीया दो प्रकार हैं कन्या तथा विवाहिता । विवाहिता पूर्व की तरह १३ प्रकार की है । कन्या एक प्रकार है । कन्या की साथ मिलकर १४ प्रकार विवाहिता है । उत्तम, मध्यम, कनिष्ठ भेद से ४२ प्रकार हैं । फिर खण्डितादि आठ प्रकार से गुणित होकर ३३६ प्रकार की परकीया है । परकीया की तरह सामान्य नायिका भी जानना । कुल ६८४ भेद हैं । द्वारका में स्वकीया तथा सामान्या की प्रसिद्धि है । यथा दशम में "वारमुखों अवलागण से वृत होकर" । कोई कोई गोकुले कन्या की श्रीकृष्ण

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कन्या त्वनूढा सा च त्रिधा मुग्धा मध्या प्रगल्भा चेति। मध्या-प्रगल्भयोः धीरादिभेदेद षट् विधत्वं ततश्च गुणैर्ज्येष्ठा कनिष्ठा चेति भेदेन द्विधा ततश्च द्वादशधा। मुग्धाचेति त्रयोदशभेदवती कन्येति यथा दशमे।—

मानयं भो! कुथास्त्वांतु नन्दगोपसुतं प्रियं।
जानीमोंग व्रजश्लाघ्यं देहि बासांसि वेपिताः।

आचार्य्यैमुग्धादीनामेव वाक्यत्वेन व्याकृतः। वस्तुतस्तु "गान्धर्व्ववृत्तिः स्वीयात्ते हेतुरार्याचने किल।

शकुन्तला वत् ज्ञेयो हि विवाहस्याप्यभावतः।
उढ़ास्तु— अनुरागार्पितात्मानो विलासभरलालसाः।
प्रीत्यैव स्वीकृता यास्तु परकीया इति स्मृताः
सर्वानन्दकदम्बेऽपि शरीरे दुर्वलादिकं।

में पतिभावना है। कात्यायनी व्रतादिओं से उन्हीं के स्वकीयात्व सिद्धि है। अब परकीया वर्णन करते हैं। कन्या तथा ऊढ़ा भेद से परकीया द्विविध है। परकीया से रस की पराकाष्ठा होती है। नहीं तो निर्गुण, त्यागी श्रीशुक जी ने कैसे वर्णन करते॥

कन्या अविवाहिता है। कन्या मुग्धा, मध्या, प्रगल्भा भेद से त्रिविध है। मध्या तथा प्रगल्भा धीरा, अधीरा, धीराधीरा भेद से ६ प्रकार की है। फिर गुण से ज्येष्ठा तथा कनिष्ठा भेद से १२ प्रकार और १ प्रकार मुग्धा मिलकर १३ प्रकार की कन्या है। जैसे दशम में:—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अतः पतीनां देवीनां न भवेत्स्पर्शयोग्यता ।
अतो वीभत्सरोगादेरुपयोगोऽपि दृश्यते ॥
भंग्या वलितशीलेन वञ्चितैः पतिभिः सदा ।
न जातु व्रजदेवीनां संगमो विनयादिभिः ॥
द्विधात्र ता विनिर्दिष्टाः सादयो नादयस्तथा ।
मुनयो लौकिका देव्यः श्रुते च शिरसस्तथा ।
सादयस्तु चतुर्धा स्युरेकधा नादयो मताः ॥
तत्रमुनयः— श्रीकृष्णोपासकाः सर्वे मन्त्रनिष्ठैकमानसाः ।
सौन्दर्य्यं वीक्ष्य रामस्य प्रोत्पन्नरतयस्तदा ।
लब्धभावा व्रजे गोप्यो जाता पाद्मे इतीरितं ॥
भावविशेषेणैव श्रीकृष्णस्वरुपास्वादिता ॥

आचार्य्योंओं ने मुग्धादिकों का ··· वाक्य करके कहे हैं। वास्तविक, गान्धर्व्व वृत्ति स्वीया का हेतु है। कात्यायनी अर्च्चन में दृष्ट हैं। जैसे बिना विवाह से भी शकुन्तला है। केवल अनुराग युक्तात्मा होकर विलास समूह में लुब्ध, प्रीति से स्वीकृत परकीया है। समस्त आनन्दकदम्ब से युक्त शरीर में योगमाया द्वारा दुर्बलतादिक प्राप्त है। इसलिये व्रजगोपीयों को पति की स्पर्शयोग्यता नहीं थी। इसी कारण वीभत्स रोगादि की भी उपयोगित दिखने में आई है। छल से विनयादि पूर्वक पतियों से वञ्चित होती थी अर्थात् कभी संग नहीं हुआ था।

गोपियाँ दो प्रकार की हैं। सादि, तथा अनादि हैं। मुनि, लौकिक, देवी, उपनिषद् भेद से सादि चार प्रकार तथा अनादि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उत्तरोत्तरखण्डे पाद्मे पञ्चाशत्तमेऽध्याये—

पुरा महर्षयः सर्वे दण्डकारण्यवासिनः।
दृष्ट्वा रामं हरिं तत्र भोक्तुमिच्छन्सुविग्रहं।
ते सर्वे स्त्रीत्वमापन्ना समुद्भूताश्च गोकुले॥
हरिं संप्राप्तकामेन ततो मुक्ता भवार्णवात्॥

अथलौकिकाः— लौकिकाः साधनैः सिद्धाः द्विविधोपासनानुगाः।
राधोपासनया काश्चित्युगलस्यापि काश्चन।
वृन्दावने चतुर्द्धास्युः सालोक्यादिविभेदतः॥
सालोक्यादिविभेदोऽत्र राधया नतु कृष्णतः।
यतः प्रभुत्वं राधायाः श्रीकृष्णस्यांगता सता॥१२॥

एक प्रकार की हैं। मुनिगण-श्रीकृष्ण उपासक, मन्त्रनिष्ठ बुद्धिशील, मुनिगण श्रीराम का सौन्दर्य देख कर उत्पन्न रति से भाव को प्राप्त होकर व्रज में गोपी रूप लेकर जन्मे थे। तथा उन्होंने भाव विशेष से श्रीकृष्ण स्वरूप का आस्वादन किया था। यथा पद्मपुराण में—पहिले दण्डकवन निवासी महर्षिगण ने श्रीहरि रामचन्द्रजीको देखकर सुन्दर विग्रह भोग करने का इच्छा की। वे सब गोकुल में स्त्री रूप हो कर जन्मे तथा श्रीकृष्ण के अनुराग को प्राप्त हुए। श्रीराधा उपासना, तथा युगल उपासना नुयायी साधनों से सिद्धि प्राप्त लौकिक है। सालोक्यादि भेद से चार प्रकार का है। यहाँ पर सालोक्यादि भेद श्रीराधा से जानना, किन्तु कृष्ण से नहीं है। कारण श्रीकृष्ण का अंग (अंश) ही राधा की प्रभुता है॥ १२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तथोक्तं पाद्म कार्त्तिके— वृन्दावनेऽधिपत्यं च दत्तं तस्याः प्रतुष्यता ।
कृष्णोनान्यत्र देवी तु राधा वृन्दावने वने ॥
तथा तत्रैव श्रीराधापूजा युगलपूजा च ।
राधिकाप्रतिमां विप्राः पूजयेत्कार्त्तिके तु यः ॥
तस्य तुष्यति तत्प्रादयै कृष्णो दामोदरोहरिः ।
द्विजं दामोदरं कृत्वा तत्पत्नीं राधिकां तथा ।
कार्त्तिके पूजनीयौ तौ वासोलंकारभूषणैः ॥

अत उपासनया सालोक्य-सामीप्य-सार्ष्टि-सारूप्यानि श्रीराधया । तत्र सालोक्यसामिप्ये त्रिभेदेन सखीत्वेन, दासीत्वेन, दूतीत्वेन च सार्ष्टिसारूप्ययोरेकभेदे सखीत्वनैव ।

अथ देव्यः— देव्यस्तु स्वर्गवैकुण्ठ्यो नतु कर्म्मविनिर्म्मिताः ।
अंशत्वाद्व्रजदेवीनां यथा कृष्णस्य विष्णवः ॥

पद्म पुराण में कार्त्तिक महिमा में कहा है कि उसी राधिका की प्रीति से प्रसन्न श्रीकृष्ण वृन्दावन में उन्हें आधिपत्य दिया है और स्थल में देवी तथा वृन्दावन में राधा ही है। वहाँ श्रीराधिका की पूजा तथा युगल पूजा का विधान है। यथा-जो विप्र कार्त्तिक में भी राधिका प्रतिमा की पूजा करे। इत्यादिक।

उपासना में सालोक्य सामीप्य सार्ष्टि-सारूप्य श्रीराधा के संबन्ध में है। सखी, दासी दूती भेदसे सालोक्य तथा सामीप्य जानना। सार्ष्टि तथा सारूप्य को एक मात्र सखी भाव से जानना। देवी शब्द से स्वर्गवैकुण्ठवासी है किन्तु कर्म्म परायण प्राकृत स्वर्गवासी नहीं हैं। वे सब देवी व्रज गोपियाँ को अंश भूता है जैसे श्री

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ननु कथं व्रजदेवीनामंगित्वमन्यासामगंत्वं अर्थापत्तेः पुराणादीनां प्रमाण्याच्च। तथाहि अर्थापत्तिः "एते चांशः कलाः पुंसः कृष्णस्तु भगवान्स्वयमिति स्वयं वेदवेदान्तैरवधित्वेनोक्तं यद्वस्तु तदित्यर्थः। ननु "यस्यावतारा विष्णवादयः स व्यापक वैकुण्ठेश्वरः" श्रीनारायण एव किं न स्यात् न वेदनारायणयोः परस्परवाक्येन नारायणस्यांशत्वावधारणात ॥ १२ ॥

यथा वृहद्वामन— ब्रह्मानन्दमयो लोको व्यापिवैकुण्ठसंज्ञकः।
पुराणे।— तल्लोकवासी तत्रस्थैस्तुतो वेदैः परात्परः॥

तल्लोकवासी नारायणः न तु जलशायी वेदैः स्तुतः सन् वरदानार्थमुद्यतस्तं प्रति वेदानां वाक्यं

"नारायणादिरूपाणि ज्ञातान्यस्माभि रच्युतः।
सगुणं ब्रह्म सर्वेदं वस्तुवुद्धि र्न तेषु नः॥

कृष्ण का अंश विष्णु है। व्रजदेवियों का अंशित्व कैसे सिद्ध है? उत्तर-अर्थापत्ति प्रमाण से। पुराण समूह में प्रमाण भी हैं अर्थापत्ति यह है—और सब अंश तथा कला है श्रीकृष्ण किन्तु स्वयं भगवान हैं। स्वयं शब्द से वेद वेदान्त में अवधि कहे गये है। जिनके अवतार विष्णु प्रभृति हैं सो व्यापक, वैकुण्ठेश्वर, नारायण है। सो नारायण क्यों नहीं है? उत्तर-वेद नारायण का वाक्य से अंशित्व है॥ १२ ॥

वृहद्वामनपुराण में कहा है जहाँ लोक समूह ब्रह्मानन्द मय है। जिसका नाम ही व्यापीवैकुण्ठ है। वहां वेद समूहो ने तल्लोकवासी श्रीनारायण की स्तुति की है यथा—
तदनन्तर श्रीनारायणजी ने उन सबके वाक्य स्वीकार दिये।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ततः श्रीनारायणः स्वीकृत्य दर्शयामास ।—

पूर्वं वृन्दावनं ततः प्रियवर्गं पश्चात्… ।
नाना रासरसोन्मत्तं यत्र गोपीकदम्बकं ।
तत्कदम्बकमध्यस्थः किशोराकृतिरच्युतः ।
दर्शयित्वेति च प्राह ब्रूहि किं करवाणि वः ॥

यदि अवधित्वं न स्यात्तर्हि एतन्न स्यात । ततः श्रीकृष्ण एव सर्वावधिः ।

तथा श्रीदशमे :—"चतुर्भुजाः शंखचक्रगदाराजीवपाणय
किरीटिनः कुण्डलिनो हारिणो वनमालिनः ॥

स्वोपास्याः दृष्टाः श्रीकृष्णस्य चेदंशित्वमन्येषामंशत्वं तथा पार्षदादीनामप्यंशांशि भावो ज्ञेयः ॥१४॥

पुराणादयश्च--"अयत इन्दिरा शश्वदत्र हि" "गोप्यन्तरेण भुजयोरपि यत्स्पृहाश्रीः" "रमाक्रीडामभून्नृप" त्रैलोक्यसन्मोहन तन्त्रे-

---

यथा पहिले वृन्दावन, तदनन्तर प्रियवर्ग, पीछे गोपीगण मध्यस्थ श्रीकृष्ण यदि अवधि नहीं है तो ऐसा नहीं होता। इसलिये श्रीकृष्ण ही सबकी सीमा है। यथा दशम में चतर्भुज, शंख, चक्र, गदा, पद्मादि धारी अपना उपास्य देव देखा जब श्रीकृष्ण अंशी तथा और सब अंश हैं तो अवश्य ब्रजपार्षद अंशी हैं, और सब अंश हैं ॥ १४ ॥

पुराण समूह यथा-लक्ष्मी निरन्तर ब्रज में आश्रय ले रही हैं। ब्रज रमा की क्रीडा भूमी है। त्रैलोक्य सन्मोहत तन्त्र में-यथा-हे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इच्छाशक्तिः क्रियाशक्तिः ज्ञानशक्तिस्तथेशितुः ।
तवांशमात्रमित्येवं मनीषा संप्रवर्त्तते ।
मायाविभूतयोऽचिन्त्या अचिन्त्यातर्क्यं मायिनः ।
परेशस्य महाविष्णोः स्तास्ता सर्वा कलाकलाः ।
आनन्दरूपिणी शक्तिस्त्वमीश्वरि न संशयः ।
लक्ष्मीः सरस्वती कान्तिरित्याद्या वा वरस्त्रियः ।
छायामपि स्पृशंत्यस्याः कदाचिन्नैव लक्ष्यते ।
एतैर्वाक्यैः श्रीराधाया अंशित्वमेव निर्णयात् ॥

अन्यथा लक्ष्म्याः मुख्यत्वे नारायणस्यांशत्वं न स्यात् ब्रह्मण उपासकत्वेन स्वोपास्यानेकदर्शनेन श्रीकृष्णस्योपास्येषु अवधित्वेन उपासकेषु च व्रजौकसामवधित्वेन निर्णीतत्वादन्यथा पारम्येण वांछानुपपत्तेः । ततश्चदेव्यः स्वर्गवैकुण्ठस्था एव ज्ञेयाः ॥

अथश्रुतयः ॥--वृहद्वामनपुराणे श्रुतय ऊचुः ॥--

श्रीराधे ! इच्छाशक्ति, क्रियाशक्ति, ज्ञानशक्ति समूह आपके प्रेरणा से इच्छा मात्र से प्रवर्त्तित होते हैं तथा आपका अंश है । अचिन्त्य, अतर्क्य मायास्वरुप परेश महाविष्णु की मायाविभुति सकल कला की कला हैं । आप आनन्दरुपिणी शक्ति हो इसमें कोई सन्देह नहीं है । लक्ष्मी, सरस्वती, कान्ति प्रभृति उत्तम स्त्रियाँ आपकी छाया को स्पर्श करती हैं । उनसे भी आप अलक्ष्या हो । इस वाक्य समूह से श्रीराधा का अंशित्व निर्णय है । नहीं तो लक्ष्मी को अंशित्व मानोगे तो नारायण का अंशत्व कैसे सिद्ध होगा । ब्रह्मा ने वह नारायण मूर्त्ति देखी थी । उपास्यों में श्रीकृष्ण

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथा त्वल्लोकवासिन्यः कामतन्त्रेण गोपिकाः ।
भजन्ति रमणं मत्वा चिकीर्षाजनितस्तथा ।।

श्रीभगवानुवाच । आगामिनि विरञ्चौतु जाते सृष्ट्यर्थमुद्यते ।
कल्पं सारस्वतं प्राप्य व्रजे गोप्यो भविष्यथ ।।१५।।

तथा पाद्मे— गोप्यस्तु श्रुतयो ज्ञेयाः ऋषिजा गोपकन्यकाः ।

निर्व्वाणखण्डे— देवकन्याश्चराजेन्द्र न मानुष्यः कथञ्चन ।।

राजेन्द्र अम्बरीषः । अथानादयः ।।—तत्र पाद्मे निर्वाणखण्डे—

नित्यां मे मथुरां विद्धि वनं वृन्दावनं तथा ।
यमुना गोपकन्याश्च तथा गोपालबालकान् ।।

आदिपुराणे— न मां जानन्ति मुनयो योगिनश्च परंतप ।।

(की अवधि तथा उपासकों में व्रजवासीयों की अवधि निर्णीत है। नहीं तो लक्ष्मी द्वारा चरण रेणु की इच्छा कैसे सिद्ध होगी ? इस से देवी शब्द से स्वर्ग वैकुण्ठ वासी है श्रुत-वृहद्वामन पुराण में यथा ।। १५ ।।

पद्मपुराण में निर्वाणखण्ड में यथा —

राजेन्द्र यानी अम्बरीष महाराज हैं । अब अनादि कहते हैं। यथा-पद्मपुराण निर्वाणखण्ड में--मेरी मथुरा नित्या है तथा वृन्दावन भी नित्य है। और यमुना, गोपकन्या समूह तथा गोपाल बालक गण नित्य जानना । आदि पुराण में श्रीकृष्ण अर्जुन संवाद में कहा है ।-गोपींगण जिस प्रकार मुझको जानती हैं उस प्रकार मुनिगण, योगीगण, तथा रुद्रादिक देवतागण नहीं जानते है। मेरी महिमा, मेरी सेवा, मेरी श्रद्धा तथा मेरा मनोगत भाव गोपीयाँ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृष्णार्जुनसंवादे— न च रुद्रादयो देवा यथा गोप्यो वदन्ति माम्।
मन्माहात्म्यं मत्सपर्य्यां मच्छ्रद्धां मन्मनोगतं।
जानन्ति गोपिकाः पार्थ ? नान्ये जानन्ति मर्मणि
वेदान्तिनोऽपि मुनयो नमां जानन्ति तत्वतः।
यथा मां गोपसुदृशो जानन्ति मम वैभवं॥
अहंमेव परंरूपं नान्यो जानाति कश्चन।
जानाति राधिका पार्थ अंशानर्चन्ति देवताः।
निजांगमपि या गोप्यो ममेति समुपासते।
ताभ्यः परं न मे पार्थ ! निगूढ़ प्रेमभाजनं॥
अहं ता गोपीकाः पार्थ ताश्चाहं स्वयंभुवि
उभयोस्तनुभि र्भेदः प्राण एके न संशयः॥
त्रैलोक्ये पृथिवी धन्या तत्र वृन्दावनं पुरी।
ताश्चापि गोपिकाः पार्थ तत्र राधाभिधा मम॥
त्वंमेप्राणाधिको यस्मात्तस्मादेतद्वदाम्यहं
गोपिकानामयं देहः सन्देहो नात्र कश्चन॥

जानती हैं। और कोई इसका मर्म नहीं जानते हैं जो गोपीगण निज शरीर मेरा है ऐसे जान कर सेवा करते हैं। हे पार्थ ! गोपीयों से निगूढ़ प्रेम-पात्र और कोई भी नहीं है। गोपीयों का मैं देह हूँ इसमें कोई सन्देह नहीं है। अब शास्त्र प्रसिद्धा नित्य प्रिया वर्णन करते हैं। भविष्य पुराण में श्रीकृष्ण युधिष्ठिर संवाद में— यथा--हे राजा युधिष्ठिर ! गोपीयों के प्रधान प्रधान नाम सुनो। गोपाली, पालिका प्रभृति-(सरलार्थ)॥ १६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथशास्त्रप्रसिद्धाः नित्यप्रियाः ।।–भविष्ये श्रीकृष्णयुधिष्ठिर संवादे ।–

गोपीनामानि राजेन्द्र प्राधान्येन निवोध मे
गोपाली पालिका धन्या विशाखा ध्याननिष्ठिका ।
राधानुराधा सोमाभा तारका दशमी तथेति ॥१६

श्रुतिश्चाथर्वाणी–तासां मध्ये हवै श्रेष्टा गान्धर्व्वा उवाचतथंहि
वै ताभिरेवं विचार्य्य कथं कृष्णः ब्रह्मचारी कथं
दुवाश्चिनं मुनिः
तां हि मुख्यां विधाय पूर्वमनुकृत्य तूष्णीमासुः

ऋग्वेदे— राधया माधवो देवो माधवेनैव राधिका ।
विभ्राजन्ते जनेष्वा

स्कांदे— युधिष्ठिरनारद संवादे वसन्तोत्सवे एक
सप्ततिमेऽध्याये

राधा चन्द्रावली भामा ललिता च तथापरा ।
सुशीला चन्द्राभागा च सन्ध्यावाल्यादयो नृप !
वेषमित्वात्मनो ज्ञाताः वैष्णवैः सहिता स्तदा ।
ततो गच्छेत राजेन्द्र ! वसंता नयनं प्रतीति

वैष्णवानवेषयित्वा । गौतमीयतन्त्रे उत्तरभागे पञ्चपञ्चाशत्तमे पटले— इयं चन्द्रप्रभा नाम ख्याता चन्द्रावली त्वियं
चन्द्रकान्तिरियं ख्याता चन्द्रावलीरियंमताः ।

अथर्वाणी श्रुति यथा—उन सबों के मध्य में श्रेष्ठा गान्धर्वी कहने लगी ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एता चन्द्रकला नाम चन्द्रलेखा त्वियंश्रुता
एवं चन्द्रांकिता ख्याता सहस्रमिह सुन्दरि ।
इयं हि रोहिणी नाम ख्याता चेयं धनिष्ठिका ।
विशाखेयं समा ख्याता माधवीयं च विश्रुता
मालतीयमियं श्यामा गोपालीयं शुभानना ।
रत्नलेखा समाख्याता सुभद्रा भद्ररेखिका ।
सुमुखी सुरतिश्चैव चपला कुञ्जरीति च ।
कलावती रतिकला कलहंसी कलापिनी ।
हरिणी नाम विख्याता अहं च कमलेक्षणे ॥१७॥
वयं हि गोकुले गोपबाला परमशोभनाः ।

अशोकमालिनी सुनन्दा भद्रा रंगावती चन्द्रभासा चित्रगंगा निद्रायमानाक्षो चित्रफला रत्नचूड़ा

एता तु संमोहनतन्त्रे प्रह्लादसंहितायामेकादशेऽध्याये उद्धवं प्रति ललितोवाच । श्यामलोवाच । विशालोवाच । राधोवाच शैव्योवाच । पद्मोवाच । भद्रोवाचेति कण्ठोक्तिः । अथ महाजन प्रसिद्धाः ॥

रत्नप्रभा रत्नकला सुभद्रा भद्ररेखिका ।
सुमुखी च धनिष्ठा च कलहंसी कलापिनी ॥

ऋग्वेदमें यथा—

स्कान्द में यथा—युधिष्ठिरनारदसंवाद में वसन्तोत्सव प्रकरण में १७ अध्याय में राधा, चन्द्रावली, भामा, ललिता इत्यादि । गौतमीय तन्त्र का उत्तर भाग में ५५ पटल में—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

माधवी मालती चन्द्ररेखिका कुञ्जरी तथा ।
हरिणी चपला चेति सुरतिश्च शुभानना ॥
कुरंगाक्षी सुचरिता मण्डिनी मणिकुण्डला ।
चन्द्रिका चन्द्रतिलका कन्दुकाक्षी सुमन्दिरा ॥
रसालिका तिलकिनी शौरसेनी सुगन्धिका ।
रामिला कामनगरी नागरी नागवेलिका ॥
मंजुमेधा सुमधुरा सुमध्या मधुरेक्षणा ।
तनुमध्या मधुस्पन्दा गुणचूडा वरांगदा ॥
तुंगभद्रा रंसोत्तुंगा रंगवाटी सुसंगता ।
चित्रलेखा विचित्रांगा मोदनी मदनालसा ॥
कलकण्ठी शशिकला कमला मधुरेन्दिरा ।
कन्दर्पसुन्दरी कामलतिका प्रेममञ्जरी ।
कावेरी चारुकवरा सुकेशी मञ्जुकेशिका ॥
हारहरा महाहारा हारकण्ठी मनोरमा ।
मंगला विमला लीला कृष्णसारी विशारदा ॥
तारावली चकोराक्षी शंकरी कुंकुमादयः ॥१८॥
सर्वगोपीसमूहेषु राधिकैव विराजते ।
अस्या एव विनिर्गीतमालाम्बनमथो बुधैः ॥

सम्मोहन तन्त्र में प्रह्लाद संहिता के ११ अध्याय में उद्धव के लिये ।—यथा ललिता ने कहा श्यामला ने कहा इत्यादिक (सरल अर्थ है) अब महज्जनों के द्वारा प्रसिद्ध नाम कहते हैं । रत्नप्रभा इत्यादिक—(सरल अर्थ है ॥ १८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ राधायाः स्वरूपं—

हठादक्ष्णोलक्ष्मीं विरमयति पद्मांशकमलां
मुखोल्लासः कान्तिं जलजमणिवृन्दस्य सहसा।
तथा स्वर्णं व्यर्णं नयति रसिता ह्यांगिकरुचिः
सुताया रूपश्री लसति वृषभानोः सललितम्॥

अथगुणाः वृन्दावनेश्वरी राधा विनीता चपलाक्षियुक्।
गन्धोन्मादितगोविन्दा वृन्दावनविलासिनी॥
चारुसौभाग्यरेखाढ्या सर्ववेषविशारदा।
नर्म्मादिकारणं लज्जाशील भक्तिरसाकरा॥
विविधाद्भुतभाषवित् पुष्पशिल्पविशारदा।
विचित्ररूपकरणी गन्धयुक्ति नियोजिका॥
करुणार्णवपूर्णा च रासक्रीडाधिदेवता।
वाग्भंग्या जितकृष्णा च शरणागतपालिका॥

समस्त गोपीवर्गों में श्रीराधिका ही श्रेष्ठ तथा आलम्बन करके गावै जाती हैं। अब श्रीराधा के स्वरूप कहते हैं—नेत्र की शोभा पद्माधिष्ठात्री कमला को बलपूर्वक तिरस्कार करती है। इस प्रकार मुख की माधुरी जलजात मणि समूह की शोभा तथा अङ्ग की कान्ति स्वर्ण समूह की शोभा को तिरस्कार कर रही है। आज श्रीवृष-भानु सुता की रूप शोभा लीलापूर्वक सुशोभित है। गुण समूह यथा—श्रीराधा-वृन्दावन कीईश्वरी, विनीता, चञ्चलनेत्र विशिष्टा, गन्ध से गोविन्द उन्मादकारिणी, वृन्दावन विलासिनी, मनोहर सौभाग्य रेखा से युक्ता, समस्त वेष में पण्डिता, नर्म्मकारिणी,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रहेलिकाविधात्री च स्वगीतिहरिमोहिनी ।
लावण्ययौवनाक्रान्ता रूपसौन्दर्य्यसंश्रिता ॥
मृद्वी च सुकुमारी च धैर्य्यादिगुणशालिनी ।
गुणा ऐश्वर्य्यसंश्लिष्टा अन्ये ज्ञेया मनीषिणा ॥१६॥

अथोदाहृतयः— वृन्दावनेसिता—
ईशिता वशवर्त्तित्वमंगोक्तिमनसा रसात् ।
आधरवा तु वृत्तादे र्वनं मूर्त्तिमदीरितम् ।
वृत्तादेरेकतां प्राप्तमित्येवं परमार्थता ।
वनस्य हि रसप्राप्तिरंगेनैव ध्रुवारमता ॥
निधिपालकवज्ज्ञेया वृत्ताणां सर्वथैव हि ।

तत्र तत्र प्रियवर्गान्विता गमनविलासोपयोगिरसेन स्थितिः रिति भावः

लज्जाशालिनी, भक्ति रस की समुद्ररूपा, विविध भाषा विज्ञा, पुष्पशिल्प में पण्डिता, विचित्ररूपधारिणी, गन्धवती, प्रेरिका, करुणा समुद्र से पूर्णा, रास क्रीड़ा की अधिदेवी,वाणी की भंगी से कृष्ण जय कारिणी, शरणागत पालिका, प्रहेलिका विधायिनी,अपनीगान से हरि-मोहित कारिणी, लावण्य रूपा, युवती, रूपवती, सौन्दर्य्यवती, मृद्वी, सुकुमारी, धैर्य्यवती प्रभृति गुण युक्ता हैं ॥१६॥

वृन्दावन की ईशिता—शरीर, वाणी, तथा मन से वश वर्त्तित्व ईशिता है ।

विनयः—शरीर-वाणी—मनसे औद्धत्य रहित हो विनय है । यथा—सखीओं के अवलोकन में भी देह में वाणी के साथ नयन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विनयः— अङ्गोक्तिमानसौद्धत्यराहित्यं विनयः स्मृतः।

यथा— अवलोकेऽपि सखीनां नयनद्वयसंयुतं चेतः।
प्रत्युद्गतमिव वाचा समिति देहे किमब्रूमः॥

नयनसमकालमेव मन उत्थितं क्व शरीरावयवयोरिति।

नेत्रचापल्यं— विद्युल्लतेयं चलतां पाटिता चक्षुषा तव।
दृक् विद्युता वा किं राधे सर्वं ते हि स्वभावजं॥

गन्धोन्मादितकेशवा-गन्धस्य सुगन्धस्य उन्मादकत्वं चातुरी विस्मारकत्वं

यथा— चतुर्भुजतया गुप्तो वनमध्ये हरिः क्वचित्।
राधिकाशब्दमात्रेणैव स्वरूपेण स्थितोऽभवत्॥ २०

वृन्दावनविलासः– क्वचित् दृग्भंगीभिः क्वचिदपि चलापांगविशेषैः
क्वचिद्भ्रूवल्लीभिः क्वचिदपि शिरो मन्दचलनैः।

पुगल युक्त चित्त क्या उन्नत है। नेत्रचापल्य—यही विद्युल्लता क्या आपके नेत्रों से चञ्चलायमाना है किम्वा आपके नेत्र ही विद्युत हैं। हे श्रीराधे समस्त आपको स्वभाव से ही है। सुगन्ध से उन्मादकारिणी चतुरता यह ही गन्धोन्मादित केशवा है। यथा कोई समय श्रीहरि चतुर्भुज होकर छिपने लगे। परन्तु श्रीराधा का शब्द सुन कर अपने द्विभुज स्वरूप में स्थित हो गये॥ २०॥

वृन्दावन विलास-यथा :-कहीं नेत्र भंगी द्वारा कहीं कहीं चञ्चल अपांग से कहीं भ्रूलता से, कहीं मस्तक के मन्द चालन से कहीं अवयव सकल के वक्र भाव द्वारा श्रीराधा सखीवृन्द तथा रसिक श्रीकृष्ण को प्रमुदित कर रहे हैं। शुभरेखा :-चरण में चन्द्ररेखा-दिक समस्त वेष चातुरीमयी है। हे वृन्दा श्रीराधा कहीं वेष समूहों

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कचिद्वक्रीभावैरवयवविभावैः सहृदयं
सखीवृन्दं राधा प्रमदयति कृष्णं च रसिकं ॥

शुभरेखा— चरणे चन्द्ररेखादिः सर्ववेषचातुर्य्यं ।
कचिद्वद्धा वेषैः तदनुसखिवेषैश्च वलिता ।
सखीवेशैः कापि कचिदपि च लिंगानुकरणैः ।
कदाचिद्वश्यात्मा वहति रसभावं मधुपतौ
क राधा श्रीकृष्णं न रमयति वृन्दे व्रजभुवाम् ॥

नर्म्मादिकारणं—नर्म्मणः परिहासादेः कारणं । लज्जाशीला स्पष्टं

भक्तिरसाकरा— भक्तिमूर्त्तिमती योक्ता तद्भक्तेराश्रयस्त्वतः ।
श्रीराधायास्तु खनितामुक्तवानुद्धवः कृती ॥

दृष्ट्या प्रवर्त्तितेत्यादिना सर्वभाषावित् । सवदेशपशुपक्ष्यादि

से युक्त तथा कँहीं अनुगामि सखी द्वारा श्रृंगारित, कँहीं सखी वश्यता गुण से वश प्राप्त, कहीं चिन्ह अनुकरण कारिणि कभी कभी श्रीमधुपति श्रीकृष्ण में वश्यात्मा पूर्वक रसभाव को वहन कर रही हैं। इस प्रकार व्रजगोपीयों को तथा श्रीकृष्ण को रमण करा रही हैं। परिहासादि के नर्म्मादि कारण हैं। लज्जाशीला स्पष्ट है। भक्तिरसाकरा यथा-मूर्त्तिमती जो भक्ति कही हैं उसकी आश्रयरुपा श्रीराधिका हैं। चतुर उद्धवजी ने श्रीराधा जी को खान (भण्डार) रुप से वर्णन किया है। समस्त देशस्थ पशु पक्षीयों की भाषा जानने वाला सर्वभाषावित् है। संकेतादि में दृष्ट है। पुष्प शिल्प में निपुण विदग्धा है, सब के रुपान्तर सृष्टि जानने में चतुर विचित्ररुपकर्त्तृत्व है। गन्धयुक् स्पष्ट है॥ २१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भाषाविद्राधा । संकेतादौ । पुष्पशिल्पे नैपुण्यं पुष्परचितवस्त्रकंचुकाभरणविदग्धा । विचित्ररुपकर्त्तृत्वं सत्र्य रूपान्तरसंपादनचातुर्यमिति । गन्धयुक्तिः स्पष्टं ॥ २ ॥

करुणार्णवं - त्वदीयोऽस्मीति यो ब्रूते वाङ्‌मात्रेणापि कश्चन ।
सालोक्यादिपदं तस्य ददात्येव न संशयः ॥

रासक्रीडाधिदेवता--रासे प्रवेशस्तस्यैव येन राधा प्रपूजिता ।
इदमेवाधिदेवत्व न द्वारा कृष्णतो यदि ॥

वाग्भंग्या- उत्तिष्ठाम्यतरौ मे तरुणि मम तराः शक्तिरारोहणे का
जितकृष्णा—मुग्धे प्रस्तौमि चारु तरुणि मथ का वधूगेन्तुमीष्टे ।
वार्त्तेयं नौ प्रसंगे कथमपि भविता नावयोःसगमार्था
वार्त्तापीति स्मितास्यं जितगिरमजित राधया राधयामि ॥

शरणागत पालिका—स्वारूप्यदानेन पालिकेत्येर्थः ।

प्रहेलिकाविधात्री— श्रीकृष्णं प्रति ।

करुणासागर ।-जो एकबार वाणी से भी तुम्हारा हूँ ऐसा कहता है उसको भी अपना सालोक्यादि पद अवश्य देते हैं । इस में कोई संदेह नहीं है । रासक्रीडाधिदेवता ।-जिसने श्रीराधा की पूजा की उसका रासलीला में अवश्य प्रवेश है कारण श्रीराधा ही रास की अधिदेवी है । वाणी की भंगी से जितकृष्णा ।-हे तरुणि । आगे मेरे तरु में (नाव) आरोहण कीजिये । श्रीराधा श्रीकृष्ण को पराजित करने के लिये नाव शब्द को अर्थ को छिपाकर कहने लगी भा ! तरु (वृक्ष) में आरोहण की शक्ति नहीं है फि श्रीकृष्ण कहने लगे मुग्धे ? मैं तरुणी (नाव) की बात कर रहा हूँ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथा-लुप्तवर्णं वर्णहीनं श्यामं पीतात्मकं सदा ।
अवक्रं सर्ववक्रं यत् तद्ब्रूवत्पण्डितो भवेत् ॥

लुप्तवर्णं त्रिभंगं विप्रत्वादिहीनं रहितं श्यामं पीते आत्मनो यस्य तं । अवक्रं सरलं । सर्वस्माद्वक्रं भिन्नं तत् जानन्पण्डित इत्यर्थः । सकृष्णः एतादृशमर्थमजानन् । प्रतिहेलिका श्रीकृष्णस्य ॥२२.।

प्रतिकूलेन धात्रा तु को भवेद्रसवारिधिः ।
तथा तेनानुकूलेन सरसो विरसो भवेत् ॥

धात्रापदेन प्रतिकूलेन धात्रा इति पठितेन पुनः अनेन तकाररहितेन राधा इति पदेन रसवारिधिः को भवेत् कृष्णः । तथा अथ

श्रीराधा ने भी उस अर्थ को दबा कर तरुणी (वधू) भाव ले कर कहा कौन बधू जा सकती है । श्रीकृष्ण ने कहा (नौ) नाव का प्रसंग है । श्रीराधा नौ शब्द का अर्थान्तर हम दोनों ऐसा लगाकर कहने लगी कि तुम्हारा हमारा संगम कैसा है इस प्रकार श्रीराधा द्वारा पराजित श्रीकृष्ण को आराधन करता हूँ । सारुप्य प्रदान पूर्वक पालन करना शरणागत पलिका है । प्रहेलिका विचित्री ।-लुप्तवर्ण (त्रिभंग) वर्णहीन (ब्राह्मणादि जाति से रहित) श्याम, पीतात्मक (पीतवर्ण रमणी आत्मा जिसका) अवक्र (सरल) सर्ववक्र (सबसे भिन्न) जो जानेगा सो पण्डित है । उत्तर श्रीकृष्ण हैं ॥२२ ॥

वाह्यार्थ-विधाता प्रतिकूल होने पर कौन रसज्ञ होता है तथा प्रतिकूल होने पर सरस भी नीरस होते हैं । अन्तरार्थः ।-धात्रा पद प्रतिकूल पढ़ने से तथा तकार से रहित होने पर श्रीराधा है । राधा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

च तेन धात्रा इति पदेन पितृस्मारकेन अनुकूलेन आनुकूल्यश्रुतेन सरसः रससहितोऽपि शृंगाररसवानपीति रसः कुण्ठतरसः को भवेत् ? कृष्णः। श्रीकृष्णाभिलाषितमर्थं संगोप्यार्थान्तरेण श्रीकृष्ण-मर्थमानयति। धात्रा ब्रह्मणा प्रतिकूलेन वत्सवत्सपाहरणेन क्रीड़ा-भंगं कुर्व्वता विरसः सखीनामभावेन कुण्ठतरसः रसवारिधिर्गो गोपवृद्धवृक्षतृणमाधुर्य्यास्वादनेन रससमुद्रको भवेत् कृष्णः। तथा। अथ च तेन धात्रानुकूलेन अनुगमनं कृत्वा क्रीड़ानुकूलवत्सादिस-मर्पकेन रसवारिधिः विरसः सन् तत्तद्रसान्तर्द्धानेन कुण्ठतरसः सन् सरसः रसेन सख्यरसेन सहितः को भवेत्कृष्णः। यद्वा धात्रा पित्रा प्रतिकूलेन अनुगमनं कृत्वा परावृत्तेन सरसोऽपि वात्सल्यरस-पूर्णोऽपि रसवारिधिः अन्यरसैरप्याक्रान्तःको भवेत् कृष्णः ॥२३॥

पद से रसवारिधि कौन है श्रीकृष्ण हैं और भी अर्थ।-यहाँ पर धात्रा पद से पिता व्रजराज का अर्थ लेकर कहते हैं पिता का अनुकूल भाव से सरस तथा शृंगाररस विशिष्ट होने से भी कुण्ठतरस अन्यरस युक्त कौन होता है श्रीकृष्ण है। किम्वा-विधाता द्वारा वत्स वत्सपालक हरण पूर्वक क्रीडा भंग होने से विरस कौन है श्रीकृष्ण है। यहाँ रसवारिधि शब्द का अर्थ-गौ, गोप,वृद्ध,वृक्ष, तृण, प्रभृतिओं का माधुर्य्य अनुभव से अथ च उस अपराधकारी विधाता के अनुगमन पूर्वक क्रीडानुकूल वत्सादिक समर्पण करने पर कुण्ठतरस होते हुए भी सरस (सख्यरसयुक्त) है। यद्वा।-- पिता कर्त्तृक प्रतिकूल अनुगमन (परावृत्त) होने पर वात्सल्यरस से पूर्ण होते भी अन्यरस से युक्त कौन है। उत्तर श्रीकृष्ण है ॥२३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथो अथचतेन पित्रा अनुकूलेन सायं प्रत्युगमनेन रस-वारिधिः वृन्दावनरसाक्रान्तोऽपि विरसः वृन्दावनरसात्कुण्ठितः सन् स्वरसः व्रजरसाक्रान्तः को भवेत्। कृष्णः। अनेन चतुर्गणितो स्वगीतिहरिमोहिनी—"काचित्समं मुकुन्देन स्वरजातीरमिश्रिताः।
उन्निन्ये पूजिता तेन प्रीयता साधुसाध्विति ॥

लावण्यं— मुक्ताफलेषु च्छायायास्तरलत्वमिवान्तरा।
प्रतिभाति यदंगेषु लावण्यं तदिहोच्यते ॥

यथा— अंगेषु स्फटिकादर्शदर्शनीयेषु जृम्भते।
अमला कोमलाकान्ति ज्योत्स्नैव प्रतिबिम्बता ॥

यौवनं— कैशोरयौवनया संन्धिरेवात्र विवक्षिता।
ईषच्चपलनेत्रान्तं स्मरस्मेरमुखाम्बुजं।

अथ च उनके पिता सन्ध्या समय फिर मिलत होने पर वृन्दा-वनरसयुक्त होने से भी कुण्ठितरस (व्रजरसयुक्त) कौन है? उत्तर श्रीकृष्ण है। स्वगीतिहरिमोहिनी—किसीने (श्रीराधा) श्रीकृष्ण के साथ अभिश्रित स्वरजाती उठायी श्रीकृष्ण साधु साधु कह कर प्रशंसा करने लगे। लावण्यं—मुक्ताफलों में कान्ति के झलमल भाव की तरह श्री अङ्गों में जो शोभित हैं सो लावण्य जानना। यथा—स्फटिकदर्पण सदृश अङ्गों में विशुद्ध कोमल कान्ति विरा-जित है। मानो प्रतिविम्बित ज्योत्सा है। यौवन—कैशोर तथा यौवन की सन्धि ही जानना। नेत्रप्रान्तभाग ईषत् चञ्चल, काम के मन्द हास्य युक्त मुखकमल, प्रफुल्ल गण्ड, अरुण अधर, लावण्य युक्त सुन्दर अङ्ग, भाव सौरभ से विलसित, उच्च स्तनादिक से

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स गर्वजरजो गण्डमसृसप्राङ्गणाधरं ।
लावण्योद्भेदरम्यांगं विलसद्भावसौरभं ।
उन्मीलितां कुरु कुचमस्फुटांगकसन्धिकं ॥
इत्यादिलक्षणं प्रोक्तं राधारूपं रसात्मकं ॥

रूपं— अंगान्यभूषितान्येव प्रक्षेपाद्यैर्विभूषणैः ।
येन भूषितवद्भाति तद्रूपमिह कथ्यते ॥ २५ ॥

यथा— त्यक्त भूषणमाल्यापि स्नातुं राधा विराजते ।
तस्या भूषणभूषाया विभूषा लज्जिता ह्यभूत् ॥
विभूषा विगत भू अङ्ग सम्बधा भवेत् ।

सौन्दर्यं— अङ्गप्रत्यंगकानां यः सन्निवेशो यथोचितं ।
सुश्लिष्टसंनिवंधः स्यात्तत्सौन्दर्य्यमुदीर्य्यते ।

लक्षित श्रीराधारूप यौवन अवस्था में है। जिससे अङ्ग समूह अभूषित अवस्था में विभूषण से भूषित प्रतीति होता है सो रूप है ॥ २४ ॥

यथा—भूषण माल्यादि परित्याग पूर्वक श्रीराधा स्नानार्थ विराजी हैं उस समय भूषणादिक लज्जित हो गये। विभूषा (विगत भू-अंग सम्बन्ध) सौन्दर्य्य-अंग प्रत्यंगों का यथा स्थान सन्निवेश प्रगाढ बन्धन ही सौन्दर्य्य है। यथा—लम्बायमान नेत्र, शरत् चन्द्रमा की कान्ति सदृश मुख, लतारूप वाहू, स्तनों से युक्त वक्ष, क्षीण कटि, सुन्दर नितम्ब और जंघा प्रभृति से युक्त श्रीराधा का अंग है मानो श्रीकृष्ण को नचाने को अथ च आलिंगन करने को है। मृदुता—जिससे अङ्ग स्पर्श का भय होय सो मृदुता जानना

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथा— दृष्यच्चं शरदिन्दुकान्तिवदनं वाहूलताबंशयाः।
संचेपान्निविडोन्नतस्तनमुरः पार्श्वे प्रमृष्णे इव।
मध्यः पाणिमितो नितम्बिजघनं पादावरालांगुली
कृष्णं नर्त्तयितुं प्रवृत्तमिति वाश्लिष्टं तथास्यावपुः॥

मृदुता— स्पष्टं। येनांगमस्पृष्टक्षितिस्यान्मार्दवं हि तत्॥

सुकुमारता— यत्स्पर्शासहतांगेषु कोमलस्यापि वस्तुनः।
तत्सौकुमार्य्यं त्रेधा स्यादादिमध्योत्तमादिभिः॥

आतपासहं— करस्पर्शासहं। अत्र तु मुख्यमेव।
अंगपुष्पादि संस्पर्शासहं येन तदुत्तमं॥

अथावस्था

कन्योढ़ा च-तत्र कन्या भविष्ये—यथा—

वाल्येऽपि भगवान् कृष्णस्तरुणं रुपमाश्रितः।
रेमे विहारैर्विविधैः प्रियया सह राधया॥
राधा वाल्येऽपि प्राप्तयौवना तथेत्यर्थः॥ २५॥

जिसमें अत्यन्त कोमल वस्तु का स्पर्श ही असह्य होता है सो सुकुमार जानना। आदि, मध्य, उत्तम से तीन प्रकार का ही सुकुमार है। आतप न सहना कर स्पर्श न सहना मुख्य है। पुष्पों का स्पर्श असहन उत्तम है अब अवस्था कहते हैं-कन्या, ऊढ़ा है॥ २५॥

अथ ऊढ़ा—मुग्धा, मध्या, प्रगल्भा। मध्या-धीरामध्या अधीरामध्या धीराधीरामध्या। प्रगल्भा—धीराप्रगल्भा, अधीराप्रगल्भा, धीराधीराप्रगल्भा भेद से ७ प्रकार श्रीराधा हैं मध्या का स्वरूप,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथोढ़ा— मुग्धा मध्या प्रगल्भा। मध्या—धीरामध्या अधीरामध्या धीराधीरामध्या॥ तथा प्रगल्भा—धीराप्रगल्भा, अधीराप्रगल्भा, धीराधीराप्रगल्भा। एवं सप्तभेदवती श्रीराधा। तत्र मध्या स्वरूपः मुग्धादयस्त्ववस्थाः॥

तत्रमुग्धा— मुग्धा नववयाःकामा रतौ वामा सखीवशा।
रतचेष्टासु सव्रीड़ा चारुगूढ़प्रयत्नभाक्।
कृतापराधे दयिते वीक्षते रुदती सती।
नववया : प्रियाप्रियोक्ति मानेषु न शक्ता च कथञ्चन॥

यथा—विरमति शैशवजडिमा प्रविशति यौवनविति- विशालाद्याः।
क्रीड़ति लोचननटिका वदनसुधांशुश्च विस्फुरति नवकायाः॥

मुग्धादि अवस्था जानना। अब मुग्धा कहते हैं। नववयशालिनी, काम परायणा, रतिमें वामा,सखीवशा, रति चेष्टादिकों में लज्जिता, मनोहर·गुप्त चेष्टाकारिणी, अपराधकारी प्रियके प्रति रोती हुई दीखने वाली, तथा प्रिय अप्रिय वचन और मानादिकों में अशक्ता मुग्धा है। श्रीराधा के शैशव का विराम तथा यौवनका प्रवेश हो रहा है, नेत्र नटि नाच रही है तथा वदनचन्द्र शोभित होरहा है।

हे श्रीराधे! श्रृंगार साधनादि विषय में विचित्र भाव धारण करती हो, श्रीहरिरस का आदर करने वाला निज सखीगण-कर्तृक श्रीकृष्ण रसमें श्रवण देती हो। मैंने जानलिया कि तुम्हारे हृदय में श्रीहरि का नव·भाव उत्पन्न हुआ है। रतिवामा—मैं बालिका हूँ परिहास उचित नहीं है। मेरा मार्ग छोड़ दीजिये हे विलासि देखिये बन में विलासिनी गण विचरती हैं॥ २६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथा— राधे प्रसाधनविधौ विदधासि चित्रं
दत्तादरा हरिरसे श्रवणं गते किं ।
संप्रापसे निजसखीजनकृष्णहासे
ज्ञातं मया हृदि हरौ नवभाव जन्मः ॥

रतौ वामा—
बालाहमीदृशं नर्म्म नोचितं पदवीं त्यज ।
विचरन्ति विलासिन्यो विलासिन् ! वनगोचराः ॥ २६ ॥

सखीवशा— कृष्णे तृष्णाकुलाद्योयं पुरतः प्रार्थयत्यपि ।
निरीक्ष्यमाणा ललितावदनं राधिका स्थिता ॥

सव्रीडरतयथा— निकुञ्जं गच्छन्ती त्रिचतुरपदानि प्रचलिता
ततो व्यावृत्त्यात्मा कलितललिता वागियमसौ ।
सखि ! कासीत्येवं रचितवचना लोलनयना
पुनर्मन्दं मन्दं प्रविशति निकुञ्जं मम सखी ॥

सखीवशा—आगे प्रार्थनाकारी श्रीकृष्ण में भी तृष्णाकुल होकर केवल ललिता का मुख देखती हुई राधिकाजी खड़ी हैं ॥ सव्रीडरत यतना—ललिता द्वारा प्रेरित होकर दो तीन पग निकुञ्ज की तरफ जा रही है फिर वहाँ से ललिता को पाश फिर कर बोली हे सखि ललिते ! तू कहाँ है ? ऐसा कहकर चञ्चलनयन से फिर धीरे धीरे निकुञ्ज की तरफ जा रही हैं। मध्या—समानलज्जावती तथा समान कामपरायणा, तारुण्यशालिनी, किञ्चित्प्रगल्भावाणी विशिष्टा, अंतर में मोह तथा सुरति में क्षमाशालिनी मध्या है। मध्या मान समय में कभी कोमला कभी कर्कशा है। पद्मिनी जाति प्रायः करके है ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथमध्या— समानलज्जामदना प्रोद्यत्तारुण्यशालिनी।
किञ्चित्प्रगल्भवचना मोहान्तसुरतक्षमा।
मध्या स्यात्कोमला क्वापि माने कुत्रापि कर्कशा॥

मध्येयं पद्मिनी जाते: मृद्वी मानेऽथ कर्कशा।

समानलज्जामदना—विदधति दृशं कृष्णे सतृष्णे प्रेक्षतेऽन्यतः।
अन्तः स्मेरमुखी राधा व्यतानीद्विविधं रसं॥

उच्चतारुण्या— कटाक्षेपो राधे कुवलयति कामस्य विशिखान्
भ्रुवो नृत्यतथ्यं विरमयति मीनध्वजधनुः।
तथा रम्भाशोभां शुभफलमिदं ह्यूरुयुगलं
वरोरुणां यूथे तरुणिमणिचूड़ामणिरसौ।

किञ्चित्प्रगल्भवचना·कृष्णसर्प भुजंगस्त्व भुजंगामी सदाह्यसि।
सर्वं त्वयि विभाव्यते भुजंगोऽपि ह्यूरंगमः॥२७॥

समान लज्जामदना—श्रीकृष्ण सतृष्ण दृष्टि करने पर आप अन्यत्र- दृष्टि पात करने लगीं। इस प्रकार अन्तःप्रसन्ना श्रीराधा विविध आनन्द प्रदान कर रही हैं। उच्चतारुण्य कटाक्ष पात से काम के वाण समूह को ग्रास तथा भ्रूनृत्य द्वारा काम के धनु को वे- काम कर रही हैं। ऊरु दोनों कदली खम्भ की शोभा को तिरस्कार कर रहे है हे राधे तुम तरुणिसमूह की चूड़ामणि हो। किञ्चि- त्प्रगल्भ वचनः—तुम कृष्णसर्प भुजंग हो भुजगामीता तुम में है। तुम में सब संभव है। तुम भुजगामि होकर भी ऊरुगामी हो॥२७॥

हे कृष्णसर्प जाओ जिस हेतु तुम भुजंग यानी सर्प हो क्यों? भुजंग वक्र गमन करता है। भुजंग होने पर भी भुज आलम्बन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हे कृष्णसर्प? गच्छ यतस्त्वं भुजंगः सर्पः कुतः भुजंगामी सदा वक्रगमनः। भुजंगोऽपि सदा भुजालम्बनः अथ च सदा उरंगमः हृदयस्थः ॥

मोहान्तसुरतक्षमा—श्रमजलवदनां विकीर्णकेशां
रसनिवहादनधीनदेहवल्लीं।
मुकुलितदृशमसृणांतान्यभावां
प्रियहृदयेनिशि राधिकांस्मरामि ॥

मानेमृद्वी— कृष्णेन शक्ता मानाय बभाषे राधिकासखीं।
एहि वृन्दावनं यामः पुष्पसंपादनाय हि।

माने कर्कशा— अहो राधे! कृष्ण क्वथमपिगतः कुञ्जपदवीं
यत्ते पंथा इति हृदये ताम्यति पुनः रुषं।
धत्तेऽस्माभिः प्रियविरहवार्त्ता प्रकथने
न जाने कोऽयं ते हृदि विशति शुष्के च दहनः

अथ च सदा हृदय स्थित हो ॥ मोहान्त सुरतक्षमा।— प्रिय श्री कृष्ण के हृदय में रात में स्थित श्री राधिका को स्मरण करता हूँ। जिसका बदन श्रम-जल-कणों से युक्त, बिखड़े हुए केश, देह लता रस से पराधीन, ईषत् मुकलित नेत्र, स्निग्धहृदय है ॥ मान में मृद्वी।— मान शीला श्री राधिका सखी से कहन लगी हे सखी चलो पुष्प चयनादि के लिये बृन्दावन चलें।

पद्मिनी जाति।— कमल के कली के सदृश सुकुमारी, प्रफुल्लित कमल गन्धा, सुरत जल का सरोवररुपा, दिव्य सौरभ युक्ता, भय-शीला मृगनयनी तथा प्रान्तभाग में ईषत लाल युक्त नेत्र हो जिसकी, श्री फल तिरस्कारि स्तन युगल विशिष्ठा हे उसको पद्मिनी जानना। २८।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पद्मिनीजातिः— कमलमुकुलमृद्वी फुल्लराजीवगंधिः
सुरतपयसि यस्याः सौरभं दिव्यमंगे।
चकितमृगदृशाभे प्रान्तरक्ते च नेत्रे
कुचयुगलमनर्घ्यं श्रीफलश्रीविडम्बि ॥२८॥
तिलकुसुमसमानां बिभ्रती नासिकां च
द्विजगुरुसुरपूजां श्रद्दधाना सदैव।
कुवलयदलकान्तिः कापि चाम्पेयगौरी
विकचकमलकोशाकारकामातपत्रा॥
व्रजति मृदुसलीलं राजहंसीव तन्वी
त्रिवलिकलितमध्या हंसवाणी सुवेषा।
मृदु शुचि लघुभुंक्ते मानिनी गाढलज्जा
प्रवलकुसुमवासो वल्लभा पद्मिनी सा॥

तिल पुष्प सदृश नासिका, ब्राह्मणगण तथा गुरुजन की पूजा में रता, कुवलय पत्र सदृश कान्तियुक्त, चंपापुष्प की तरह गौर-वर्णा विकसित कमल-कोश-सदृश काम-छत्र धारिणी पद्मिनी है। मनोहर लीला युक्त राजहंसी सदृश गामिनी, मध्य भाग में त्रिवलि हैं जिसकी, सुन्दर वेषशाली, मृदु, पवित्रा, मानिनी, अत्यन्त लज्जा परायण, प्रवाल पुष्प के सदृश वस्त्र से विभूषिता पद्मिनी है।
धीरामध्या।-अपराधकारी प्रिय को वक्रोक्ति से धीरा कहती है यथा।-हे प्रिय आपका इसमें क्या दोष है? क्योंकि आप इस मौक्तिकमाला को कण्ठ में पहिने हो। आपके सर्वांग में काजल तथा नखचिन्ह लगे हैं। और गण्डस्थल चित्र विचित्रता से युक्त

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथधीरामध्या— धीरा तु वक्ति वक्रोक्त्या सोत्प्रासं सागसं प्रियं।

यथा— को दोषस्तव मौक्तिकस्य यदियं कण्ठे कृता मालिका
सर्वांगे वलितस्य कज्वलनखैः यद्गण्डचित्रावलेः।
कित्येकं विमृशामि नागरमहं हंहो रसानां निधि
र्व्यक्तांगाः सुदृशां हरेवद्भ्रमतामित्येव दोषः परं॥

अधीरामध्या— अधीरा परुषावाक्यै वर्जयेद्वल्लभं रुषा॥

यथा— निःशङ्कमागतमवेक्ष्य कृतापराधं
कृष्णं निशान्तविभृतान्यरति सतृष्णं।
किं चाटुकारुभिरलं सहसा प्रिया हि
याहीति खिन्नमकरोदसकृद्ब्रुवाना॥ २९॥

धीराधीरामध्या— धीराधीरा तु वक्रोक्त्या सोत्प्रासं सागसं प्रियं।

हे नागर ! हे रस समुद्र। रमणी से मुक्त आपका श्रीअंग पार्वती रहित हर सदृश हो रहा है। अधीरामध्या।-अधीरा कठोर वाक्य से प्रिय को वर्जन करती है। कृत अपराधी निशंक आने वाले प्रिय को देखकर अधीरा कहने लगी। और चाटुवाक्य की जरूरत नहीं है, अपनी प्रिया के पास जाओ, जाओ॥ २९॥

धीराधीरा भी वक्रोक्ति से अपराधकारी प्रिय को भर्त्सना करती है। अन्यनायिका के भोग चिन्हों से युक्त श्रीकृष्ण को देखकर खिन्नमना कोई जाओ जाओ प्रियाकेपाश ऐसा कहनेलगी। प्रगल्भा।- परिपूर्ण यौवन से उन्मत्ता, नायिका, आरुढ़-मन्मथा रतिकेलि में प्रिय अंग में विलीन होने की चेष्टा कारिणी, अत्यन्त प्रौढ़ कहने वाली, तथा अत्यन्त प्रौढ़ चेष्टाशालिनी, मान में अत्यन्त

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यथा— श्रीकृष्णं भोगचिन्हांकं दृष्ट्वा काचिद्विभिन्नधीः।
स्वप्रियाया विभूषार्थं गेन्छ गच्छेत्यभाषत ॥

अथप्रगल्भा— संपूर्णयौवनोन्मत्ता प्रागल्भा रूढ़मन्मथा।
दयितांगविलीनेव यतते रतिकेलिषु।
अतिप्रौढ़ोक्तिचेष्टा च माने चात्यन्तकर्कशा॥

सम्पूर्णयौवनत्व – उत्तुंगौ कुचकुम्भौ रंभास्तम्भोपमानमुरुयुगं।
तरले दृशौ च तस्याःसुकृतं कृष्णस्य वाहितं विधिना॥

अथमदान्धा— कुंजशय्यागतात्मानं सखीं च समवस्थितां।
रिरंसया स्थितं कृष्णं नास्मरत्काचिदंगना॥
विशेषस्मरणाभावमन्धत्वमिह कीर्त्तनं॥

आरूढ़मन्मथत्वं—निःशंकोल्लसदुन्नतस्तनतटि खर्वत्वसंपादकं
निर्दंष्टाधरविम्बकं च करणैर्लुप्तांगेरागं प्रियं।

कठोरा प्रगल्भा है। सम्पूर्णयौवनत्वं।- उच्चा कुच कुम्भ, कदली-खम्भ सदृश-ऊरु युगल, तथा चञ्चल नेत्र युगल हैं। माना विधाता ने श्रीकृष्ण के हित के लिये बनाया है। मदान्धा।- कोई रमणी कुञ्जशय्या में आए हुए अपने को, साथा सखी समूह को तथा रमण करने के इच्छुक श्रीकृष्ण को भी भूल गयी। आरूढ़मन्मथा- रतिरण में उद्योगी अजित केशव का वाणीयों से उन्माद कर रही हैं। निशंकता पूर्वक मनोहर उन्नत स्तन को खर्व्वता कारक, विशेष क.के अधर त्रिम्ब दंशनशाली, अंग में लुप्त रागकारी, कांची भेद शाली, स्थानच्युत वलयादि सम्भारने वाली, है। कामशीला परायण प्रगल्भा और और भी प्रगल्भा की चेष्टा जानना। मानवृत्ति कारण से प्रगल्भा भी धारादि भेद से त्रिविध हैं॥ ३२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कांचीभेदकरं विभिन्नवलयं कामास्त्रशिक्षापरं
वाग्भिर्मर्दयति प्रिया रतिरणोद्योगेऽजितं केशवं ॥
अन्यदपि प्रगल्भचेष्टादिकं ज्ञेयं ।

मानवृत्तेः प्रगल्भापि त्रिधा धीरादिभेदनः ॥ ३० ॥

धीरप्रगल्भा ।— उदास्ते सुरते धीरा सावहित्था च सादरा ॥

यथा ।— गुरुजन परिचयमिषतो राधा किल मालिकां नैच्छत् ।
दिनकरपूजाकरणव्याजात्ताम्बुलवीटिकां नादात् ॥

अधीरप्रगल्भा ।— संत्यज्य निष्ठुरं रोषादधीरा ताडयेत्पतिं ।

धीराधीरप्रगल्भा ।- धीराधीरगुणोपेता धीराधीरेति कथ्यते ॥

यथा ।— नास्ति क्रोधस्य गन्धोऽपि मम चित्ते भुजगंम ।
याहि शीघ्रमिमाः सख्यो बद्धुमिच्छन्ति साम्प्रतं ॥
एवं ज्येष्ठकनिष्ठात्मकौ भेदौ ज्ञेयौ ॥

धीरप्रगल्भा ।- सुरत में उदासिनी, आकार गुप्तकारिणी, आदरपरायणा धीरप्रगल्भा है । यथा ।-गुरुजन के परिचय छल से राधिका ने माला की तथा सूर्य्य पूजा के छल से भी ताम्बुल को नहि ग्रहण किया । अधीरप्रगल्भा निष्ठुरता छोडकर रोष से पति को ताडना करती है ॥ धीराधीराप्रगल्भा धीरा तथा अधीरागुण से युक्त है । यथा ।- हे भुजंगम ! मेरे चित्त में क्रोधकी गन्ध नहीं है उसी सखी के पास पधारिये । वह सब आपको प्रेम रस्सी में बान्धवे को चाहती हैं ॥ इस प्रकार ज्येष्ठ, कनिष्ठ, भेद भी जानना । अब अवस्था कहते हैं । प्रोषितभर्त्तृका, वासकसज्जिका,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथावस्थाः

प्रथमं प्रोषितपतिका वासकसज्जा ततश्च विरहोत्का।
अथ खण्डिका मता स्यात् कलहान्तरिताभिसारिका चेति॥
कथिता च विप्रलब्धा स्वाधीनपतिस्तथा चान्या।
शृंगारकृतावस्था भेदात्तास्त्वाष्टधा भिन्नाः॥

प्रोषितभर्त्तृका।– दूरदेशं गते कृष्णे भवेत्प्रोषितभर्त्तृका।
प्रियसंकीर्त्तनं दैन्यं जागरः कृशता तथा।
नवीनवेषराहित्यमित्याद्यास्तत्र विक्रियाः॥
दूरदेशत्वमत्रोक्तं रात्रेर्यद्व्यवधायकं॥ ३१॥
वृहद्वनादिकं तत्तु नतु मण्डलतः पृथक्।
निमेषव्यवधानं तु नास्ति व्रजनिवासिषु।

यथा।— वृहद्वनं गते कृष्णे विवाहप्रेक्षणोन्मुखे।
शर्वरी चन्द्रसहिता वर्वरीति स्तवाधिका॥

विरहोत्कण्ठिता, खण्डिता, कलहान्तरिता, अभिसरिका, विप्रलब्धा, स्वाधीनपतिका, भेद से आठ प्रकार हैं। प्रोषितभर्त्तृका।— प्रिय दूरदेश में जाने पर प्रोषितभर्त्तृका होती है। प्रियकीर्त्तनदैन्य, जागरण, कृशता, नवीन वेष से रहित प्रभृति क्रिया होती हैं। यहाँ पर दूर देश शब्द से रात्रि का जो विच्छेद (विरह) है॥३१॥

यह वृहद्वनादिक जानना किन्तु व्रजमण्डल से अलग नही है। व्रजवासियों में निमेषका भी वियोग नही है। विवाह दर्शन की इच्छासे श्रीकृष्ण वृहद्वन जाने पर चन्द्र तथा रात्रि भी तुमारे लिये बुरी हो गई है।वासकसज्जा।—स्त्रीयों के वार ही वासक

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वासकसज्जा ।— भरताद्यैरभिदधे स्त्रीणां वारस्तु वासकः ।
स्ववासकवशात्कान्तः समेष्यति गृहान्तिकं ।
सज्जीकरोति चात्मानं या सा वासकसज्जिका ॥
अनुभावाः कामक्रीड़ा वर्त्मेक्षणादि ॥

विरहोत्कण्ठिता ।— अनागसि प्रियतमे चिरयत्युत्सुका तु या ।
विरहोत्कण्ठिता भाववेदिभिः सा समीरिता ॥
वेपथुहृत्तापादयश्चेष्टाः अत्र तु प्रिया भोग्य-
वस्तूपादानार्थं विरचयति ॥

खण्डिता । उल्लंघ्य समयं कृष्णे आगतेऽन्योपभोगवान् ।
भोगांकत्वेन चेत् ज्ञातो तदा हि खण्डिता मता ॥
विनानिश्वासतूष्णीभावा स्युह्यालापादयोविक्रियाः ।
एकैनैव दत्ताया रात्रिः कस्याश्चित्तत्र यो हरिः ।
विस्मृतत्वात्तदर्थस्य श्रीराधा खण्डिता भवेत् ॥३२॥

सज्जा है ऐसा भरतादिक ने कहा है। अपना वासक वश से "कान्त गृह में आवेगा" इसलिये जो अपनेको सजाती है वह वासकसज्जा है। कामक्रीड़ा, मार्गदर्शन प्रभृति अनुभाव हैं। विरहोत्कण्ठिता।— प्रियतम के न आने पर उत्कण्ठित होकर व्यग्र होना बिरहोत्कण्ठिता है। वेपथु, हृदय में ताप प्रभृति चेष्टा तथा भोग्य वस्तु संग्रहादिक क्रिया हैं। खण्डिता।— जो नायिका समय बिता कर श्रीकृष्ण के आने पर, भोगचिन्हों से और नायिका द्वारा उपभोग युक्त जानती हैं सो खण्डिता जानना, निश्वासरहित, तूष्णीभाव, आलापादिक क्रिया हैं।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

केचित्तु स्वदत्तां द्यूतादिजितां वा रात्रिं विस्मृत्य खण्डितात्वं वर्णयन्ति। अन्ये स्वाहार्यत्वेन। अपरे तु स्वाधीनपतिकात्वेन। रसज्ञास्तु स्वाधीनपतिकात्व स्वरूपं खण्डितात्वादयोऽवस्थाः। प्रकारभेदमाश्रित्य सर्वरसाश्रयत्वात्। यद्वा श्रीकृष्णेन श्रीराधायाः अवस्थान्तररसास्वादार्थं मिथ्यैव तत्तदाचरणेन सर्वोऽपि रसः आस्वाद्यते यथा द्वारकेश्वरस्य श्रीरुक्मिण्यां।

श्रीदशमे यथा— मुखं च प्रेम संरम्भं स्फुरिताधरमीक्षितुं।
कटाक्षेपारुणापांगं सुन्दरभ्रु कुटीतटमिति॥

कलहान्तरिता— या सखीनां तु पुरतः पादयोः पतितं प्रियं।
रुषा निरस्य तपति कलहान्तरिता तु सा॥
तापादयः क्रियाः॥

श्रीकृष्ण ने रात में आने का संकेत किया था। परन्तु अन्य कोई नायिका के प्रेमवश होकर भूल गये। उनके न आनेपर श्रीराधा खण्डिता सी हो गयी॥३२॥

कोई कोई अपने द्वारा दी हुई और पाशक्रीडा चौसरखेल में जीते हुए श्रीकृष्ण के रात्रि भूलजाने से नायिका को खण्डिता वर्णन करते हैं। अपर आहार्य करके कहते है और कोई स्वाधीनपतिका नायिका को खण्डिता वर्णन करते हैं। रसज्ञगण स्वाधिनभर्तृका का स्वरूप तथा खण्डिता प्रभृति अवस्था हैं ऐसे भेद मानते हैं। कारण श्रीकृष्ण समस्त रसको आश्रय है। किम्वा श्रीकृष्ण ने श्रीराधा के अवस्थान्तर आस्वादन के लिये छल पूर्वक अवस्थान्तर से रस आस्वादन करते हैं। जैसे द्वारकानाथ का

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अभिसारिका— याभिसारयते कान्तं स्वयं वाभिसरत्यपि।
तमो ज्योत्स्नानुकूलेन गच्छंती साभिसारिका॥

विप्रलब्धा— कृत्वा संकेतमप्राप्ते दैवात् कृष्णोति वल्लभा।
व्यथमानान्तरा प्रोक्ता विप्रलब्धा मनीषिभिः॥

स्वाधीनवल्लभा— स्वायत्तासन्नदयिता हृष्टा स्वाधीनवल्लभा।
सलिलारण्यविक्रीडाकुसुमावचयादिकृत ॥३२॥

श्रीगीतगोविन्दे— रचय कुचयोः पत्रं चित्रं कुरुष्व कपालयो
र्घटय जघने काञ्चीमञ्च स्रजा कवरीभरं।
कलय वलयश्रेणीं पाणौ पदे कुरु नूपुरा
विति निगदितः प्रीतः पीताम्बरोऽपि तथाकरोत॥

श्रीरुक्मिणीदेवी में है। कलहान्तरिता।-जो सखीयोंके आगे चरण पतित प्रिय को क्रोधसे हटाकर नम्र होती है सो कलहान्तरिता है। जो अन्धकार तथा ज्योत्स्नानुयायी वेष से कान्त को अभिसार कराती और स्वयं अभिसार करती है सो अभिसारिका है। जो संकेत करती हुई भी दैववश श्रीकृष्ण न प्राप्त होने से व्यथित हृदय होती है सो विप्रलब्धा है अपने अधीन में श्रीकृष्ण रहने से स्वाधीनभर्तृका है। जलक्रीडा, वनविहार, कुसुमचयन प्रभृति चेष्टा जानना ॥३२॥

यथा गीतगोविन्द में मेरे स्तनों पर पत्रावली की रचना कीजिये। कपाल में चित्र तिलक, जघन मे काञ्ची रखिये, कवरी में पुष्प स्थापन करिये। हस्त में वलय समूह और चरण में नूपुर पहिराइये। इस प्रकार श्रीराधा कर्तृक कथित हो कर श्री कृष्ण

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ब्रजेन्द्रनन्दनास्वाद्या राधैवेति सुनिश्चितं ।
कृष्णस्तु राधिकास्वाद्य इत्येवं सुविनिर्णयः ॥
अन्यासां तत्प्रसादेन कृष्णस्यास्वादनं मतं ।

उक्तंहि हरिभक्तिसुधोदये—

योगिचित्तरमास्पर्शं सेवकादिमहोत्सवं ।
दूरस्थभक्तश्रवणकरजिह्वाश्रयं तथा ॥
योगिनश्चितेनैव रमायाः स्पर्शे नैवेत्यादिह्येयं ।

आल स्वयैस्वरुपेण सदानुकूलया

मंदारस्तवे— प्यपूर्ववद्विस्मयमादधानया ।
गुणेन रुपेण विलासचेष्टितैः
सदा तवैवोचिततया तव श्रिया ॥

स्कन्दोमाख्यं भगवद्भार्य्यया योग्याः कश्चिदप्सरसःस्त्रियः ।
मन्ये— रमावेशात्कदाचित्स्युः ताः स्वेका पिंगलाऽभवत्
तदन्यासां महादोषो भगवद्भर्त्तृता स्मृतौ

ने ऐसा ही करने लगे ॥ श्री ब्रजेन्द्रनन्दन कर्त्तृक आस्वादित राधा तथा श्रीराधा कर्त्तृक आस्वादित ब्रजेन्द्रनन्दन हैं । और के श्रीकृष्ण का आस्वादन श्री राधिका जी की कृपासे जानना । हरिभक्ति सुधोदय में कहा है ।—

आलमन्दारस्तव में— गुण, रूप, विलास, चेष्टाओं से लक्ष्मी आपके तुल्य है ।

भगवद् प्रिया के योग्य कोई कोई अप्सरा है । अप्सरा ओं में रमाका आवेश होने से । उनों में एक पिंगला हुई है । और का भगवद्भर्त्तृता होना महादोष है ॥ ३४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ततश्च श्रीनारायणादीनामवतारत्वे निश्चिते श्रीकृष्णस्य चावतारित्वे तद्भोग्यायाः श्रीराधायाश्चावतारित्वमर्थशास्त्राभ्यां निर्णीतं । विशेषस्तु स्वरूपनिरूपणे बोद्धव्यः ।

अस्याः सख्यश्च दास्यश्च दूत्यश्चापि सहस्रशः ।
काश्चित्सख्यस्तु शुद्धाः स्युः काश्चिद्दास्येन संगताः ।
दौत्येन मिश्रिताः काश्चिद्दित्येका त्रिविधामता ॥

तथाहि ।—सख्यरस एव ॥१॥ दास्येन मिश्रिताः ॥ २ ॥ दौत्येनमिश्रिताः ॥३॥ एवं सख्यास्त्रिधा । दास्ये शुद्धाः ॥१॥ सख्येन मिश्राः ॥२॥ दौत्येन मिश्राः ॥ ३ ॥ एवं दास्यास्त्रिधा प्रोक्ता ॥ दौत्ये शुद्धाः ॥१॥ दास्येन मिश्राः ॥२॥ सख्येन मिश्राः ॥३॥ एवं त्रिधा दूत्यं ।

तुल्यरूपगुणाः सख्यः किञ्चिन्नूनास्तु दासिकाः ।
दूत्यस्तु विविधा ज्ञेया जातिरूपादिभेदतः ॥

सख्यस्तूक्ताः ।— दास्यश्चतुर्विधा ज्ञेया समाश्येष्ठाकनिष्ठिका ।
बहिरंगा पराश्चापि शुद्धदास्यरसादिकत् ॥

जब श्रीनारायण अवतार तथा श्रीकृष्ण अवतारी हुए और श्रीकृष्ण द्वारा भोग्या श्रीराधिका है तो अवश्य अर्थ तथा शास्त्रों से श्रीराधिका के अवतारित्व सिद्ध है। विशेष स्वरूपनिरुपण में जानना। श्रीराधा के हजार हजार सखी, दासी तथा दूती हैं। कोई कोई सखी शुद्ध हैं कोई कोई दास्य से मिलित, कोई दौत्य से मिलत हैं। शुद्ध सख्य, दास्यमिश्र, दौत्यमिश्र से सख्य तीन प्रकार है। शुद्धदास्य, सख्यमिश्र, दौत्यमिश्र से त्रिविध दास्य तथा शुद्ध दौत्य, दास्यमिश्र, सख्यमिश्र से तिन प्रकार दौत्य है। तुल्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ दूत्यः ।— स्वयंदूत्याप्तदूति वा अमितार्था तथैव च ।
पत्रहारी निसृष्टार्था दूत्यः पञ्चविधा मताः ॥३५॥

तत्र स्वयंदूती— अत्युत्कण्ठा गलद्व्रीड़ा रागाधिक्येन मोहिता ।
चक्षुर्वचोऽगंसभूतैः कर्म्मभिर्योजयेत्प्रियं ।
स्वयं दूतीति विख्याता नायकस्यातिमोहिनी ॥

तत्र चाक्षुषाः— नेत्रस्मितार्द्धमुद्रत्वैर्नेत्रान्तभ्रमकूणने ।
साचीक्षा वामदृक् प्रेक्षा कटाक्षाद्यास्तु चाक्षुषः ॥

नेत्रस्मितं— वैभवं रतिपते र्विदधतीः नन्दनन्दन पुरः कपटेन ।
आकलय्य नेत्रयुग्मं वृषभानुतनूजा चार्द्ध निमिलितं॥

नेत्रार्द्धमुद्रा— गर्गोक्तौ चन्द्रसूर्य्यौ तु वर्त्तते कृष्णनेत्रयोः ।
इतीव राधिकानेत्रपद्मं चार्द्ध निमीलितं ॥

रूप गुण सख्य है । किञ्चित् न्यून दासिका तथा जाति, रूपादि भेदसे विविध प्रकार दूती है । सखी पहले कही हैं, शुद्ध दास्य रसादि कारक है । दास्य-समा, ज्येष्ठा, कनिष्ठा, वहिरंगा भेदसे चारि प्रकार हैं । स्वयंदूती, आप्तदूती, अमितार्था, पत्रहारी, निसृष्टार्था भेद से दूती पांच प्रकार है ॥३५॥

अति उत्कण्ठिता, लज्जारहिता, अत्यधिक राग से मोहिता, नेत्र, वाणी, शरीर उत्पन्न कर्म्मों से प्रिय को योजना करने वाली स्वयंदूती है । स्वयंदूती नायक की अत्यन्त मोहिनी है ॥ नेत्रस्मित, नेत्र का अर्द्ध मुद्रत्व, नेत्रान्त भ्रमण, तथा संकोचन, वक्रदृष्टि, वामदृष्टि, कटाक्ष प्रभृति चाक्षुष है । नेत्रस्मित-यथा--श्रीनन्दनन्दन रतिपति काम के वैभव धारण करते हुए, आगे वृषभानुनन्दिनी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नेत्रान्तभ्रमः— न दृष्टो रसराजस्तेन रहः केलिसंभ्रमः।
किं राधे कृष्णवदनेऽपांगं नटयसि ध्रुवं॥

नेत्रकूणनं—त्रपावृतं किञ्चिदवक्रचचंलदृगञ्चलराधिकया प्रवत्तितं।
निकुञ्जराजे प्रथमाधीनतां प्राप्ते दृशो विस्मयमानयानया॥

साचीक्षा— वक्रावलोकनं।

वामदृकूप्रेक्षा — सख्यनेत्रेण चापीय कृष्णस्य वदनाम्बुजं।
तरलेनैव राधे त्वमुन्मनीभवसे कथं॥

कटाक्षः— यद्गतागतविश्रान्तिवैचित्र्येण विवर्त्तनं
तारकायाः कलाभिज्ञास्तं कटाक्षं प्रचक्षते॥
अन्येत्यूह्यं॥ ३६॥

अथवाचिका:— वाचिको ह्यर्थशब्दाभ्यां व्यंग्य एवात्र संमतः।
शब्दार्थाभ्यां तु यो व्यंग्यौ श्रीकृष्णविषयौच तौ॥

को देखकर नेत्र युगल अर्द्ध निमीलित किये। नेत्रार्द्ध मुद्रा--श्रीकृष्ण के दोनों नेत्रों में चन्द्र सूर्य्य दोनों विराजित हैं। ऐसा गर्गजी के कहने पर श्रीराधिका के नेत्र कमल अर्द्ध निमीलित हुए॥ नेत्रान्तभ्रम.- हे राधे क्यों श्रीकृष्ण वदन में अपांग नचाती हो देखिये उस अपांग से रहः केलि सम्भ्रम श्रीकृष्ण कुछ नहीं दिख रहे हैं। नेत्र कूणन।- लज्जावृत श्रीराधिका ने किञ्चित् अवक्र चञ्चल दृगञ्चलों को रोका। उससे प्रथम अधीन प्राप्त निकुञ्जराज श्रीकृष्ण विस्मित हो गये। वक्र अवलोकन करना साचीक्षा है। वामदृकूप्रेक्षा।-राधे सखी का नेत्रद्वारा श्रीकृष्ण मुख कमल पानपूर्वक तरलतापूर्वक क्यों उन्मना हो रही हो। कटाक्ष -नेत्र तारा का आना जाना विश्रान्ति वैचित्र्य से विवर्त्तन कटाक्ष है॥ ३६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विषयत्वं च कृष्णस्य द्विधात्र परिकीर्त्तितं ।
साक्षाच्च व्यपदेशाच्च श्रीकृष्णो विषयो मतः ॥
पुरस्थश्च तथा कृष्णः इत्येवं द्विविधो मतः ।
साक्षाच्छब्देन यो व्यंग्यः स कृष्णो बहुहेतुगः ।
गर्वाक्षेपैश्च याञ्चा वा इत्याद्य ह्यास्तु हेतवः ॥

गर्वेण शब्दोत्थाव्यंग्य । श्रीकृष्णः । १ । गर्वेणार्थोत्थोव्यंग्यः श्रीकृष्णः ।।२।। आक्षेपेण शब्दोत्थो व्यंग्यः । श्रीकृष्णः । ३ । आक्षेपेणार्थोत्थो व्यंग्यः श्रीकृष्णः ॥ ४ ॥ स्वार्थयाञ्चयाशब्दोत्थो व्यंग्यः श्रीकृष्णः । ५ । स्वार्थयाञ्चयार्थोत्थो व्यंग्यः श्रीकृष्णः ॥ ६ ॥ परार्थयाञ्चयाशब्दोत्थो व्यंग्यः । ७ । परार्थयाञ्चयार्थोत्थयंग्यः ।८ व्यपदेशेन शब्दोत्थो व्यंग्यः श्रीकृष्णः ।।९।। व्यपदेशेनार्थोत्थव्यंग्यः श्रीकृष्णः ॥ १० ॥ निकटस्थः कृष्णः शब्दोत्थो व्यंग्यः ॥ ११ ॥ निकटस्थः कृष्णोर्थोत्थव्यंग्यः ॥ १२ ॥ ३७ ॥

अर्थ तथा शब्द से व्यंग्य वाचिक है। शब्द अर्थ दोनों से व्यंग्य श्रीकृष्ण विषयक है। श्रीकृष्ण का विषय साक्षात् तथा व्यपदेश से एकविध है। पुरस्थ भेद से द्विविध है। साक्षात् शब्द से यो व्यंग्य श्रीकृष्ण से बहु कारणगत है। गर्व से शब्दोत्थ व्यंग्य श्रीकृष्ण, गर्व से अर्थोत्थव्यंग्य श्रीकृष्ण, आक्षेप से शब्दोत्थव्यंग्य श्रीकृष्ण, आक्षेप से अर्थोत्थव्यंग्य श्रीकृष्ण, स्वार्थयाञ्चा से शब्दोत्थव्यंग्य श्रीकृष्ण, स्वार्थयाञ्चया से अर्थोत्थ व्यंग्य श्रीकृष्ण, व्यपदेश से शब्दोत्थव्यंग्य श्रीकृष्ण, व्यपदेश से अर्थोत्थव्यंग्य श्रीकृष्ण, निकट स्थित श्रीकृष्ण शब्दोत्थव्यंग्य, निकट स्थित श्रीकृष्ण अर्थोत्थव्यंग्य, है ॥ ३७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अयोदाहृतयः— गर्वेण शब्दोत्थो व्यंग्यो यथा।—

ललिता संगगर्विष्ठा देवीनां तु पुरः सरा।
ते हितं मापते गच्छ मा कुरु त्वं भुजंगतां ॥

पक्षे—विलाससंगेन देवीनां व्रजदेवीनां देवीणां क्रीडापराणां वा मापते! लक्ष्मीपते। पक्षे—मां गच्छ भुजंगतां सर्पतां धूर्त्ततां वा पक्षे—मा मां भुजं बाहुं गतां।

गर्वेणार्थोत्थोव्यंग्यः—सतीनां मूर्द्धाऽहं जगति विदिता गोकुलपते
सतोऽपांगश्रेणीं किमिति कुरुषे श्यामलतनुः।
इयं मार्गी सव्ये प्रसरति वतिः सापि कुपिता
समाक्रांते प्रान्ते मम सरसरंगे वनतटे॥

पक्षे— सत श्रीं सुन्दरीणां मुख्या॥ ३८॥

आक्षेपेण शब्दोत्थो-मापते! गच्छ माध्वनमावृणु त्वं भुजंगतां।

व्यंग्यः— कुर्व्वन् सगरमात्मानं अभिव्यंजन्नराजते॥

ललिता संग से गर्व प्राप्ता देवीयों के समक्ष में अग्रसरा श्रीराधा हैं।

पक्षे—विलास अङ्ग से देवीयों का (व्रजदेवीयों) किम्वा क्रीड़ा-परायणा गोपीयों का। मापते! लक्ष्मीपते—पक्षे—"मा गच्छ भुजंगतां" सर्पता को मत कीजिये किम्वा धूर्त्तता मत कीजिये। पक्ष में—बाहु-गता मत मुझको। गर्वेणोत्थव्यंग्य—हे गोकुल पते मे सती समूह की श्रेष्ठ जगत में विदिता हूं हे श्यामल शरीर! क्यों कटाक्षपात करते हो॥ ३८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आक्षेपपक्षे हे मापते पन्थानं गच्छ अध्वानं मावृणु अन्यथा भुजंगतां सर्पतां कुर्वन् सगरेणात्मानं अभिव्यंजन् न राजसे न शोभां प्राप्स्यसि। व्यंग्यपक्षे-हे पते मा गच्छ अध्वानं मार्गं किन्तूत्पथं गन्तव्यमिति भावः। उत्पथे गत्वा मा मां प्रावृणु ततः भुजंगतां बाहुगतां कुर्व्वन् रलयोरैक्यात्

मां सरा वत्वंगलग आत्मा शरीरं यस्यास्तां मां अभिव्यञ्जन् राजसे किं अपि तु सर्वात्मना राजस इत्यर्थः ॥

आक्षेपेणार्थोत्थो व्यंग्यः ॥

महारण्ये कुञ्जे सकलजनसंघैर्विरहिते
विलुण्ठन् धूर्त्तस्त्व विहरसि सपुष्पं करगतं।
इदं हत्या ह्यग्रे यदि हरसि हा हृदि गतं
विदूरे गोष्ठं मे किमिह शरणं नीति रहिते ॥

याञ्चया शब्दोत्थोव्यंग्यः—सा याञ्चा स्वार्था परार्था च।

आक्षेपसे शब्दोत्थव्यंग्य—आक्षेप पक्ष में-हे मा पते अपने रास्ते जाओ मेरा मार्ग मत रोको। नहीं तो आप सर्पभाव करके सगर (गरल सहित) शोभा को नहीं प्राप्त होंगे। व्यंग्यपक्ष मे-हे पति! मार्ग को मत जाओ। किन्तु उत्पथ मे जाओगे यह भाव है। उत्पथ मे जाकर मेरे को मत घेरो बाहुगत करते हुए। र, ल, का ऐक्य है इसलिये।

मैं कैसी हूँ स गलमात्मनं-गले में लगा हुआ आत्मा (शरीर) जिसकी ऐसी मुझको प्रकाशित करके शोभित पाते हो किम्वा सर्वात्मना से शोभित हो? आक्षेप से अर्थोत्थ व्यंग्य-हे कृष्ण!

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्रस्वार्थो— नव्यया ललितया तवानया कृष्ण मञ्जुलतयाभि-
रक्षिता ।
देव सेवनपराहमागता प्रस्फुरत्सुमन संविधे हि मां ॥

मञ्जु मनोहरालता तया स्थितां प्रापिता देवस्य सूर्य्यस्य पुष्पार्थमागत्येत्यर्थः । अथः प्रस्फुरन्तः सुमनसो यस्याः व्यंग्यपक्षे— हे कृष्ण ! तव मञ्जुलता मनोरमता तया अभितः रक्षिता भर्त्तादितः । अतो देवस्य क्रीडाचतुरस्य सेवनपरा रसास्वादनपरा आगता । अतो मां विराजमानमनसं । याचयार्थोत्थो व्यंग्यः— यथा—

पुष्पैं देवी तु संपूज्या ह्येशाकिन्या मया सदा । ॥३६॥
सविधे पुष्पवाद्यन्ते मदीयत्वं विधीयता ॥

यह घन वन की निकुञ्ज है तथा जन शून्य है । पुष्प को हाथ से तोड़ कर निर्भय घूसते हो समक्ष में इस मेरे हृदय हार को यदि हरण करोगे तो गोकुल गांव तो दूर नहीं है अनीति करोगे तो कौन शरण देगा । याञ्चासे शब्दोत्थव्यंग्य–स्वार्थ परार्थ भेद से याञ्चया दो प्रकार की है । स्वार्थ—हे कृष्ण ! नवीना ललिता भली भाँति मुझको बचावेगी देवता की सेवा करने आयी हूँ । मनोहरलता द्वाराअभिरक्षित पुष्पोचयनार्थ, हे देव—श्री सूर्य्य । इसलिये जिसमें पुष्प प्रस्फुरित है । व्यंग्यपक्ष में—हे कृष्ण ! भर्त्तादिकों से तुम्हारी मनोहरतामें रंगे हुए हैं । इसलिए क्रीड़ा चतुर, देव तुम पर रसास्वादन परायण होकर आये हैं । इसलिये विराजमान हैं मन बुद्धि जिसकी–ऐसी मुझको । याञ्चयार्थोत्थ व्यंग्य ॥ ३६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परार्थयाञ्चयाशब्दोत्थो व्यंग्यः—

कृष्णसर्पेति शय्यान्ते वदन्तो विह्वला सखी ।
अतोऽद्य कालियहरं त्वामहं शरणं गता ॥

परार्थ याञ्चयार्थोत्थोव्यंग्यः—

न राधा भर्त्तारं क्वचिदपि च दृष्ट्या गृहगतं
समद्राक्षीन्नित्यं तव सरसमूर्तिर्विलिखती ।
तत्राप्येतद्वक्षो वहति रुचिरां तत्प्रतिकृतिं
ततः कृष्णप्रेम्णाहमपि विदधे दौत्यमखिलं ॥

व्यपदेशेन शब्दोत्थो व्यंग्यः—

जल्पव्याजेन केनापि व्यपदेशोऽत्र कथ्यते ॥
पद्मिनी घनरसेन समन्तात् त्यजते यदि मरालक त्वया ॥
सेव्यते च यदि चन्द्र चित्रिणी त्रिचित्रायाश्रेणी आवली ॥

व्यपदेशेनार्थोत्थो व्यंग्य— चन्द्रावलीत्यर्थः ॥

मधुपैश्चा न च घ्रातांत्यक्तानूतस्य मञ्जरी ।
रसज्ञकोकिलस्त्वं वै भ्राम्यसेऽत्र कथं वने ॥

परार्थ याञ्चार्थोत्थव्यंग्य—हे कालिय मर्दन ! शैय्या पर कृष्ण-सर्प आया है ऐसी सखी व्याकुल होकर कह रही है । इसलिये मैं आज तुम्हारी शरण में जा रही हूँ ॥ परार्थयाञ्चार्थोव्यग्यं—हे श्रीकृष्ण ! श्रीराधा ने गृह में रहते हुए अपने स्वामी को कभी एक नजर नहीं देखती किन्तु सर्वदा तुम्हारी मूर्त्ति हृदय में अंकित करती रही है। तुम्हारा यह हृदय भी मनोहर राधा प्रतिकृति धारण कर रहा है इसलिये हम भी प्रेम से समस्त दौत्य करती हैं ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निकटस्थ: श्रीकृष्ण: शब्दोत्थोव्यंग्य:—

शृण्वतोऽपि हरेर्मत्वा व्याजादश्रुतिवत्किल ।
जल्पोऽन्यत: स्थिते जन्तौ निकटस्थेन कथ्यते ॥

यथा— आहूतास्मि कथं चूतपुष्पाय भ्रमरस्वनैः ।
प्रमोदयति मामेष शोकहर्त्ताञ्जु नो ह्यलं ॥

निकटस्थकृष्णोऽर्थोत्थव्यंग्य:—

हरिष्णुः कृष्णोऽयं सकलयुवतीनां धृतिकृतिं
यशो लोके ख्यातं कुसुमितलतावेष्टिततनुः ।
महारण्ये कुञ्जे ग्रथितशतवीरुत्सु पतिता
कथं मोदये शीघ्रं कथय लतिके कोऽत्र शरणं ॥

अथाङ्गिका:

अंगुलिस्फाटनं चाग्रे व्याजेनांगस्य संवृतिः ।
दोर्मूलनाभिवक्षोजप्रकाशो व्याजतो भवेत् ॥

व्यपदेश से शब्दोत्थव्यंग्य-कोई जल्प व्याज से व्यपदेश होता है।

हरि को सुनते हुए भी छल से न सुनने के भाव प्रकाश करना अन्यत्र स्थित जीव को निकट स्थित कहना जल्प है। निकटस्थ श्रीकृष्ण अर्थोत्थ व्यंग्य यथा।-यह श्रीकृष्ण समस्त युवतीयों के धैर्य्य, तथा कर्मको हरण करते है। यश त्रिजगत में फैला हुआ है। कुसुमित लता से हमारे अंग वेष्टित हो गयी हैं। हाय इन महानिर्जन कुञ्ज में शत शत लता गुल्म के जालों पर पड़ गयी हूं में कैसे उससे मुक्त हो पाऊँगी। हे लतिके! कहो यहाँ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कबरीमोक्षसंरोधौ कर्णकण्डूयनं तथा।
तिलकालिंगने सख्याः पदाभूलेखनं तथा ॥
अंगस्य स्फोटनं जृम्भा दंशः स्वाधरगो भवेत्।
वेशक्रिया भ्रुवो घूर्त्तिः सखीताडनमेव च ॥
दृक् पथे तस्य गमनं हारादीनां तु गुम्फनं।
इत्याद्यास्त्वांगिकाः स्युरभियोगा हरौ किल ॥४०॥

अथातदूती— कायवाङ्मानसैः कापि विस्रंभं न भिनत्ति या।
स्निग्धा च वाग्मिनी दूती सा चाप्ता विनिगद्यते ॥

अमितार्था— द्वयोर्वैकतरस्यैव भावं ज्ञात्वा तु मेलयेत्।
राधाकृष्णौ विदग्धौ या सामितार्थाभिधीयते ॥

तत्रहारिणी— सन्देशमात्रं कृष्णस्य श्रीराधाया स्तथैवच।
नयेत्परस्परं वापि सा भवेत्पत्रहारिणी ॥

कौन शरण होगा। अंगुलि बजाना, छल से अंग का ढ़ाकना, छल से बाहु मूल, नाभि, वक्षोज दिखाना, कवरी से ताला खोलना, संरोध, कर्ण कण्डयून, तिलक, आलिगंन, पद से भूलिखन, अंग मरोड़ना, जभाँई, अधरदंशन, वेशक्रिया, भ्रू नेत्र घूर्णन, सखी-ताडन, कृष्णका नेत्र पथ में जाना, हारगुंथन, प्रभृति आंगिक, अभियोग है ॥ ४० ॥

शरीर, वाणी, मन से कही भी विश्वासा (भरोसा) नहीं छोड़ने वाली मधुरभाषिणी चतुरा दूती आप्तदूती है। दोनों के किम्बा एक के भाव जानकर दोनों विदग्ध को मिलाती है सो अमितार्था है। कृष्ण के सन्देश मात्र तथा राधा के सन्देश मात्र, किम्वा परस्पर

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निसृष्टार्थां— अन्यवंचनकार्य्यादिभारस्वीकरणा द्वयोः।
युक्तयोर्भी घटयेद् या सा निसृष्टार्था निगद्यते ॥
अथदूतीनां स्वरूपभेदाः ॥
शिल्पकारस्त्रियो धात्री दैवज्ञस्य तथा स्त्रियः।

धात्रेयी तापसी चैव वनदेवी सखी तथा ॥ धात्रेयी धात्र्याः पुत्री। तापसी-तपस्विवेषवती। वनदेवी।-वनाधिष्ठात्री देवता:। सख्य: समानशीला:। परिचारिका-लवंगमञ्जरी, लवंगपुष्पा, भानुमती स्वरसाद्याः। अथ दौत्यं द्विधा वाच्यं व्यंग्यं च। तदपि वाच्यं व्यंग्यं च साक्षात्परंपरा च ॥

प्रथसामान्यतः— कलाकौशलमुत्साहो भक्तिश्चित्रज्ञता स्मृति।
कर्म्म — माधुर्य्यं नर्म्मविज्ञानं वाग्मिता चेति तद्गुणाः४१

के सन्देश लेती हैं सो पत्र हारिणि। पति प्रभृति को वञ्चन करने का जो भार है उसको स्वीकार करती है तथा दोनों को मिलाती है सो निसृष्टार्था है। अब दूतीयों के स्वरूप भेद कहते हैं। शिल्प कारस्त्री, धात्री, देवज्ञस्त्री, धात्रेयी, तापसी वनदेवी सखी है। धात्रेयी-धात्री की पुत्री, तपसी-तपस्वि वेषवती, वनदेवा-वनाधिष्ठात्री देवता, सख्य-समान स्वभाविका, परिचारिका-लवंगमञ्जरी, लवंग पुष्पा, भानुमती, स्वरसा प्रभृति, है। दौत्य दो प्रकार है। वाच्य, व्यंग्य,। सो भी वाच्य तथा व्यंग्य-साक्षात, परस्परा से दो भेद हैं। सामान्य कर्म्म-कलाकौशल, उत्साह, भक्ति, चित्रज्ञता, माधुर्य्य नर्म्म, विज्ञान, वाग्मिता प्रभृति गुण, हैं ॥ ४१ ॥

दोनों के प्रेम तथा गुण समूह का दोनों के प्रति कीर्त्तन,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ विशेष प्रेमवतीनां—

उभयोः प्रमगुणायोः कीर्त्तनं तत्तदग्रतः।
आशक्तिकारिता चैव नर्म्मास्वादनमेव च।
अलंकृत्यादिकरणं कृष्णे राधासमर्पणं।
तथा कृष्णार्पणं तत्र स्वहृदुद्घाटनं तथा।
अभिसारो द्वयोश्चैव छिद्रसंरोधनं तथा।
पत्यादेर्वञ्चनं शिक्षा काले संगमनं तथा।
व्यजनादिभिश्च सेवा च सन्देशप्रेषणं तथा।
उपालम्भो द्वयोरेव नायकाप्राणरक्षणं।
इत्यादीनि तु कर्म्माणि ज्ञेयानि सुविशारदैः॥

अथासां परस्परभेदा॥

स्वपक्षः प्रतिपक्षश्च सुहृत्पक्षो इतित्रिधा।
सर्वांशेनानुकूलो यः सः स्वपक्ष इतीरितः॥

करना दोनों का दोनों में आसक्त कराना, दोनों का नर्म्म आस्वादन करना, अलंकारादिक निर्म्माण, श्रीकृष्ण में राधा को समर्पण, तथा श्रीराधा में श्रीकृष्ण अर्पण, अपना हृदय उद्घाटन, दोनों का अभिसार कराना, दोष गोपन करना, पति प्रभृतिओं को वञ्चन करना, शिक्षा, समय पर मिलाना, व्यजन प्रभृतिओं से सेवा, सन्देश भेजना, दोनों का उपालम्भ, नायक प्राण रक्षण प्रभृति कर्म्म सखियों के जानना। अब परस्पर भेद वर्णन करते हैं। स्वपक्ष, प्रतिपक्ष, तथा सुहृत्पक्ष भेद से तीन प्रकार के हैं। सर्वांश में अनुकूल कारक स्वपक्ष, सर्वांश में प्रतिकूल कारक प्रतिपक्ष,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रतिकूलास्तु सर्वांशे प्रतिपक्षतया मताः।
प्रातिकूल्येऽनुकूले च सुहृत्पक्षो ह्युपेक्षकः॥
अजातशत्रुतासिद्धा श्रीराधायाः स्वरूपतः।
श्रीराधागुणकोट्यंशो नान्यत्र परिदृश्यते॥ ४२॥
ईर्ष्यया तु विपक्षाः स्युश्चन्द्राद्या स्वत एव हि।
तत्कृतं तु विपक्षत्वं गतं राधागणेष्विति।
यथा युधिष्ठिरराज्ञि कौरवादिकृतं मतं।
स्वपक्षस्तु द्विधा कृष्णे समो विषम एव च।
राधाकृष्णौ समौ प्रेम्णा सा समः परिकीर्तितः।
न्यूनाधिकतया प्राप्तौ यस्य वैषम्यभाक् स तु।
कृष्णस्य भक्तवर्गेषु द्वेष या नोचिता इति।
ये वदन्ति रसज्ञास्ते अपूर्वा इति मे मतिः॥
श्री भागवते बहूनां गन्धस्त्वेषां न संगतः।

प्रतिकूल तथा अनुकूल कारक से रहित सुहृत्पक्ष है। श्रीराधा की अजात शत्रुता सिद्ध है। श्रीराधा के गुणों का कोटि अंश भी अन्यत्र दीखता नहीं है॥ ४२॥

चन्द्रावली प्रभृति ईर्षा से विपक्षा तथा श्रीराधिका-गणों में ईर्षा करती हैं जैसे युधिष्ठिर महाराज में कौरवादिओं का ईर्षा है। स्वपक्षनायिका दो प्रकार की हैं। श्रीकृष्ण में तथा श्रीराधिका में समान प्रेम, और छोटे बड़े भाव से विषमता प्रेम है। श्रीकृष्ण के भक्तवर्गों में द्वेषादि उचित नहिं है किन्तु रसपुष्टि के लिये जो रसज्ञ गण वर्णन करते हैं सो अपूर्व है। व्रजभक्तों की गन्ध भी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कन्दर्पो मूर्त्तिमान् रत्या कृष्णराधानुगः सदा।
अंशेन वा विभूत्या वा इतरत्र विराजते।

यथा— लक्ष्मी कटाक्षेण सदा वर्त्तते जीवराशिषु।
ईशे त्वंशेन मत्स्यादाविसेवं परमार्थता॥

अथविभावेषूद्दीपनाः।
कायिका वाचिका हार्दा एतत्संबंधिनस्तथा।
तटस्था अपि विज्ञेया एवं पञ्चविधा मताः॥
श्रीराधायां तथा कृष्णे ज्ञातव्यो रसवेदिभिः॥४३॥

तत्र कायिकाः— वयो रुपं च लावण्यं सौन्दर्य्यमभिरुप्यता।
मार्दवं सौकुमार्य्यं च मण्डनं नृत्यमेव च।
नामादिकं च विज्ञेया आलम्बनगता इमे॥

और कहीं नहीं है। कारण मूर्त्तिमान् कन्दर्प, रतिके साथ सर्वदा श्रीकृष्णराधा के अनुगत हैं। अन्यत्र अंश तथा विभूति से विराजित हैं। लक्ष्मी कटाक्ष से जीवराशि में रहती है।

अब विभावों में से उद्दीपन।—श्रीराधा, तथा श्रीकृष्ण में-कायिक, वाचिक, हार्द, एततसम्बन्धि, तटस्थभेदसे पाँच प्रकार उद्दीपन है॥४३॥

वय, रूप, लावण्य, सौन्दर्य्य, अभिरुप, मार्दव, सुकुमार, मण्डन, नृत्य, नामादिक कायिक आलम्बन हैं। गुञ्जा, मयूरपुच्छ, भूषण, वनमाला, चन्दन, भूषणशब्द, शिल्पकौशल, वीणा, गैरिकादि धातु प्रभृति सम्बन्धी हैं। इनके लक्षण द्वितीयोल्लास में कहे हैं। जो नहीं कहे हैं सो कहते हैं। श्रीराधिका की वय दो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संबन्धिनः— गुञ्जाशिखण्डिपिञ्छानि भूषणं वनमालिका।
चन्दनं भूषणाकारः शिल्पकौशलमेव च।
वीणा धात्वादिका ज्ञेया इमे सम्बन्धिनो बुधैः

एवल्लक्षणं द्वितीयोल्लासादावुक्तं। न यत्रोक्तं तदुच्यते। तत्र श्रीराधाविषयकं वयः।

यौवनं तु वयः सन्धिरित्येवं द्विविधं मतं।
यौवनं— नूतनं परिपूर्णं च यौवनं द्विविधं मतं।
प्रतियौवनमेतस्या चेष्टितानि पृथक् पृथक्॥
नूतनं— ईषच्चपलनेत्रान्तं स्मरस्मेरमुखाम्बुजं।
सगर्वजरजो गण्डमसृणारुणाधरं॥
लावण्योद्भेदरम्यांगं विलसद्भावसौरभं।
उन्मीलिताकुंरकुचमस्फुटांगकसन्धिकं॥
इत्येवं यौवनं तत्र वर्त्तते सेवया सदा।
अपेक्षते मृदुस्पर्शं सहते नोद्धतां रतिं॥
सखाकेलिरसास्थांगसंस्कारकलितादरात्।

प्रकार की हैं। यौवन, तथा वयःसन्धि। नूतन, परिपूर्ण भेद से यौवन दो प्रकार का है। प्रत्येक अवस्था में भिन्न भिन्न चेष्टा जानना। नूतन यौवन-यथा-नेत्रभाग ईषत् चञ्चल, मन्दहास्ययुक्त मुखाम्बुज, गर्व बिन्दु से युक्त गण्डस्थल, अरुणाधर, लावण्य शोभित अंग, भाव सौरभ से विलास प्राप्त, उन्मीलितकुच, अस्फुट अंगसन्धि विशिष्ट नवीन यौवन सेवा के वास्ते विराजित हैं। मृदु स्पर्श न सहना, उद्धत रति का अपेक्षा न करना, केलि रस

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इत्यादि चेष्टितानीह विज्ञेयानि सुबुद्धिभिः ॥४४॥

यथा ।— विस्तारी स्तनभार एष गमितो न स्वोचितामुन्नतिं
रेखोद्भासि तथा वलित्रयमिदं न स्पष्ट निम्नोन्नतं
मध्यो स्यादाजुरायतार्घ कपिशा रोमावली दृश्यते
रम्यं शैशवयौवनव्यतिकरोन्मिश्रं वपुर्वर्त्तते ॥

पूर्णं ।— स्तनौ पीनौ तनुर्मध्यः पाणिपादस्य रक्तिमा ।
ऊरूकरिकराकारावंगव्यक्तांगसन्धिकं ।
नितम्बौ विपुलौ नाभिर्गम्भीरा जघनं घनं
मानाधिक्यं सखीस्नेहोऽपराधस्यासहिष्णुता ।
रतिकेलिष्वनिभृता चेष्टते गर्विता रहः ।

वयः सन्धिः ॥— बाल्ययौवनयोः सन्धिर्वयः सन्धिरितीर्यते ।

संस्कार में आदरता प्रभृति चेष्टा जानना ॥ ४४ ॥

यथा ।—स्तनभार विस्तृत होकर यथोचित उन्नति को नहीं प्राप्त हुआ है त्रिवली स्पष्ट निम्नोन्नत नहीं है । मध्य देश अभी क्षीण नहीं हुआ । शैशव तथा यौवन दोनों के मिलन होने से श्रीराधा के अंग सुन्दर हो रहे हैं । पूर्ण यौवन ।—स्तन का उच्च स्थान विस्तारित होना, मध्य देश में क्षीणता तथा हाथ पाउँ में रक्तिमा होना, उरु देश हस्ति शुण्ड सदृश, व्यक्त अंग सन्धिक, नितम्ब की विपुलता गभीर नाभि, निविड जंघा, व्यक्त रोमावली प्रभृति गुण विशिष्ट पूर्ण यौवन है । अधिक मान, सखी में स्नेह, अपराध न सहना, रति के लिये न डरना, गर्व प्रभृति चेष्टा है । बाल्य यौवन की सन्धि ही वयः सन्धि है । नाम-यथा ।— हे कुरंगाक्षि,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नाम ।— वृन्दावने कुरंगाक्षि पश्य कृष्णं कुरंगकं ।
इत्युक्तेऽनंगघूर्णांगा राधिका संबभूव ह ॥
धारा धारागता चेयं वरटा नवकार्मुकं ।
इत्युक्ते न पूर्णोऽसौ श्रीकृष्णो घूर्णं इवाभवत् ॥

भूषणं ।— शृंगारोऽलंकृतिश्चेति भूषणं द्विविधं मतं ॥४५॥

अथशृंगारः ।— आदौ स्नानमथो सुरुचीरतिलके नेत्राञ्जनं कुण्डलं
नासालंकृति पुष्पहारचिकुरान् सिञ्जत्तथा नुपूरं ।
लेपं चन्दनसंभवं स्तनपटीं क्षुद्रावली बिभ्रती
ताम्बुलं मणिकंकणं चतुरतां श्रीराधिका राजते ॥

अलंकृतिः ॥— अलंकृति द्विधा ज्ञेया प्रायिकी नित्यसंस्थिता ॥
प्रायिकी चेच्छया प्राप्ता सख्याः स्वस्य प्रियस्य च
अलंकृति र्लोकसिद्धा विज्ञेया रसिकै गुरोः ॥

अथनित्या ।— नित्यं कुण्डलकं रणो च तिलकं चूडामणिं बिभ्रती
पादांगुष्ठविभूषणं कलयभं केशान्तभूषां तथा ।

वृन्दावन में कृष्ण कुरंग को देखो। सखी के ऐसा कहने पर श्रीराधिका अनंग से घूर्णायमान शरीर होगये। धारा धारा यह शब्द सुन कर श्रीकृष्णचन्द्र घूर्णायमान हो गये। भूषण।— शृंगार, अलंकार, भेद से भूषण दो प्रकार के हैं॥ ४५॥

प्रथम स्नान अनन्तर सुन्दर तिलक, नेत्रों में अञ्जन, कुण्डल, चन्दन, नासिका अलंकार, पुष्पहार, केशकलाप, शब्दायमान नुपुर, लेपन, स्तन में कञ्चुलिका, क्षुद्रावली धारण, ताम्बुल, मणि कंकण, प्रभृति शृंगार है। अलंकार प्रायिक, नित्यसं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

पादालंकरणं तथा वलयभं मालां च मौक्तफली
कण्ठालंकरणेन सर्वरसिता विभ्राजते राधिका ॥

मुक्तामाला एकसूत्रिणी केशान्ते पद्माकृतिरलंकरणं वेणी द्विरेफी तिलकावतंस घ्राणाम्बुज श्रोत्र विभूषणानि, हारावली काचन काञ्चिनीवि थांगदे कंकण रत्नमुद्रे, गांगेयरत्नान् वल नपुरो द्वौ पादांगुलीनां वहुधा विभूषा। चतुर्दशोक्तानि विभूषणानि ॥४६॥

सौवर्णी चान्दनी पौष्पी सौत्री मणिमयी तथा।
कार्पूरी षड् विधा खलालङ्कृतिः कृष्णनिर्मिता।

यथा— क्वचित्कर्पूरैस्तां क्वचिदपि सुवर्णैर्मणिगणैः
क्वचिन्नानावर्णैः सकलपटखण्डैः स्वरचितैः।
क्वचित्पुष्पैः सर्वैर्मलयजपरागैः प्रियतमा
मलं कुर्वन्कृष्णो विहरति सजाम्बुनदरुचिं ॥

स्थित भेद से द्विविध हैं। रुक्मी, आप, विभ्या प्रिय के इच्छा से प्राप्त लोक सिद्ध प्रायिक है। नित्य-यथा।— श्रीराधिका (नित्य कुण्डल, कंकण, तिलक, चूड़ामणी, पादागुंष्ठ विभूषण, वलय, केशभूषा, पादालंकार, चरण में वलय, मुक्ताफलमाला कण्ठालंकार से विराजमान है। मुक्तामाला एक डोरा में, तथा पद्माकार अलंकार केशान्त में, बीच में काढ़ी हुई वेणी, प्रभृति जानना॥४६॥

सुवर्णमयी, चन्दनमयी, पुष्पमयी, सूत्रमयी, मणिमयी कर्पूरमयी, भेद से षड् प्रकार अलंकार श्रीकृष्ण निर्मित है। यथा। श्रीकृष्ण कहीं पर कर्पूरमय अलंकारों से, कही सुवर्णतथा मणिमय अलंकारो से, कहीं नानावर्ण के वस्त्रखण्ड से, कहीं पुष्पमय

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ नुभावाः

एते तु स्वातन्त्र्येणैवोद्दीपनाः, नायकाश्रयत्वेन रसरूपाः।
भावं मनोगतं साक्षात्स्वहेतुं व्यञ्जयन्ति ये।
ते तु भावा इति ख्याता भ्रू विक्षेपस्मितादयः॥
सत्वजास्तु दशैव स्युर्भावाद्या इतिनिश्चितं।
तदन्तः पातिलीलाद्या कथ्यन्ते सत्वजा इति॥
एत एव ह्यलङ्काराः स्त्रीणां विंशतिरात्तु ताः।
ते चतुर्द्धा चित्तगात्रभाक् वुद्ध्यारंभणसंभवाः॥

तत्रचित्तजाः-- भावो हावश्च हेला च शोभा कान्तिस्तथैव च।
दीप्तिः प्रागल्भ्यमाधुर्यं धैर्य्यौदार्य्ये च
चित्तजाः॥४७॥

अलंकारों तथा चन्दनमय अलंकारोंसे जाम्बुनद सुवर्ण सदृश प्रियतमा श्रीराधाको अलंकृत करते हुए विहार कर रहे हैं। अब अनुभाव कहते हैं। यह सब स्वतन्त्र से उद्दीपन तथा नायक आश्रय से रसरूप हैं। मनोगत भावको तथा साक्षात् कारणको जो प्रकाश करता है सो भाव है। भ्रू विक्षेप, स्मित प्रभृति जानना। भावादिक दश सत्व से उत्पन्न हैं। उनके अन्तः पाती लीलादिक सत्वज से ऊठे है। स्त्रियों के २० अलंकार है। अलंकार चित्तभाक् गात्रभाक् वुद्धिभाक् आरंभण भेदसे चार प्रकार के है। भाव, हाव, हेला, शोभा, कान्ति, दीप्ति, प्रागल्भ्य, माधुर्य्य, धैर्य्य, औदार्य्य चित्तज है॥४७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्रभाव-: निर्विकारात्मके चित्ते भावः प्रथमविक्रिया ॥

तदुक्तंप्राचीनैः--- चित्तस्याविकृतिः सत्वं विकृतेः कारणे सति ।
तत्राद्या विक्रियाभावो बीजस्यादिविकारवत् ॥

यथा— मणिपुत्रिका विवाहे तु कुर्वन्ती साधनादरं ।
आरज्यते सखीहास्ये स्मेरवक्त्रा तु राधिका ॥

अत्र तु पूर्वं शैशवेन रसानभिज्ञ चित्तस्य पाञ्चालिका परिणयादरं वीक्ष्य हसन्त्यां सख्यां स्मितं कुर्वती रज्यते ततश्च हास्यशंकादीनां सम्भवात् प्रथमभावावतारः ॥

अथहावः- ग्रीवारेचकसंयुक्तो भ्रूनेत्रादिविकाशकृत् ।
भावादीषत्प्रकाशो यः स हाव इति कथ्यते ॥

यथा- धात्रीवचोभिर्ध्वनिमर्मगर्भैः क्षणं सरोषस्मितमात्तलज्जा ।
पाञ्चालिकाद्वन्द्वमयी जयत्सा श्रीकृष्णपत्नीयसखीजनस्य ॥

